discipline for this purpose with which Śrī Śaṅkara was totally unacquainted, namely, the art of human love, and put him questions relating thereto. Śrī Śaṅkara remained silent, and he asked for time.[70] A king by name Amaruka died just then. By means of his *yogic* power Śrī Śaṅkara left his own body in charge of his disciples and entered Amaruka's body. And in Amaruka's frame Śrī Śaṅkara lived in the palace with the queen and learnt the art of human love. The queen guessed that the body only was that of Amaruka but the soul inside was not of him but of an omniscient one. She sent messengers to seek out the dead body of the *Yogi*. They succeeded at last and were about to cremate the body. Meanwhile, Śrī Śaṅkara's disciples indirectly reminded Śaṅkara in the frame of Amaruka of his mission. Śrī Śaṅkara regaining his old status, left the king's body and re-entered his own, and came out of the burning fire unharmed by praying to Lord Nṛsiṁha.[71] Śrī Śaṅkara then went back to Bijilabindu—the place of Maṇḍana—resumed his argument with Sarasavāṇī who at last confessed defeat. He then bound her by *mantra*, reached the banks of the river Tuṅgabhadrā near Śriṅgeri, established a *śrīcakra* there and consecrated Sarasavāṇī before it. He also founded an institution there to be presided over by the Bhāratī order of monks belonging to the Advaita tradition.[72]

## 4

### *Fulfilment of A Mission*

Śrī Śaṅkara promoted the spirit of harmony among the various cults by popularising the *pañcāyatana* form of worship. According to this mode, the representations of five dieties—Āditya, Aṁbikā, Viṣṇu, Gaṇanātha, and Maheśvara—are together worshipped, the principal seat being offered to that one of the five,

---

70. *ibid.,* p. 178.

71. *ibid.,* p. 182.

72. *ibid.,* pp. 182-183.

that is, the chosen deity (*iṣṭa-devatā*) of the devotee. The *Mārkaṇḍeyasaṁhitā* says that Śaṅkara told his disciples that all those who follow the path of Advaita should perform the *pañcāyatana* worship.[73]

In his mission of unifying and purifying religious cults, Śrī Śaṅkara brought from Kailāsa five crystal lingas along with the *Saundaryalaharī*. The five lingas are: *Yoga-liṅga, Bhoga-liṅga, Vara-liṅga, Mukti-liṅga and Mokṣa-liṅga*. The *Mārkaṇḍeya-saṁhitā* corroborates this version.[74] Śrī Śaṅkara installed the *Mukti-liṅga* at Kedāra and *Varaliṅga* at Nīlakaṇṭha-kṣetra in Nepal.[75]

---

73. *jagadakhilaguruḥ avādit akhilān śiṣyān prati prasannamanāḥ advaitamataniviṣṭaiḥ pañcāyatanārcanaṁ prakartavyam*, *Ms*, 72-7-27

74. *ASV*, p. 172.
*vide*:

*gatvā kailāsaśailaṁ jagadakhilaguruḥ śaṅkarācārya yogī*
*dṛṣṭvā sāmbaṁ śivaṁ taṁ svayamiti suciraṁ cintayannantarange*
*labdhvā pañcātmaliṅgānyamalataraśubhāliṅgitānyaṅgabāhyāṁ*
*bhūtyai saundaryasāraṁ himagiriduhituḥ prāpayan gāṁ ayāsīt*, *Ms* 72-7-10.

The *Śivarahasya* also corroborates the view that the five lingas were brought from Kailāsa. But it differs from Ānandagiri's *Śaṅkara-vijaya* in this that it states that Lord Viśvesvara brought the liṅgas from Kailāsa and gave them to Śaṅkara at Kāśi. (See Appendix, p. 82.) The Śiva-liṅgas are known as *Candramauliśvara* and the *Śivarahasya* refers to them as — *supāligatamahāsamudyat-candrābhaṁ* (See Appendix, p. 82.).

The copper-plate grant of Vijaya-gaṇḍa-gopāla granting the village Aṁbikāpuram to the *Kāñci-śaṅkara-maṭha* refers to the village as one 'protected by the grace of '*Indumauli*' (*indumauli-kāruṇya-rakṣitam*) This grant thus explicitly refers to the *liṅga* worshipped in the *Śaṅkara-maṭha* of *Kāñci-kāmakoṭi-pīṭha* as *candramauliśvara-liṅga*.

75. *vide*:

*muktiliṅgaṁ tu kedāre nīlakaṇṭhe vareśvaram*
*pratiṣṭhāpya mahāyogī parāṁ prītimavāpa saḥ.*, *Ibid.*, 72-7-14.
See *ASV*, p. 172.



To safeguard India's cultural unity based on Advaita and in order to hold aloft the ideal of spirituality, Śaṅkara founded monastic orders and institutions that have lasted through centuries. There are ten orders of monks that belong to the Advaita tradition. They differ only in the suffix that is added to the *sannyāsa*-name of those who belong to each order. The ten orders are collectively referred to as *daśanāmī*. The suffixes are: Sarasvatī, Purī, Bhāratī, Vana, Araṇya, Tīrtha, Āśrama, Giri, Parvata, and Sāgara.

In the different parts of the country, Śaṅkara established monastic centres and charged his principal disciples to head them so that in each centre there would come into being an unbroken succession of Advaita preceptors. Śaṅkara installed the *Bhoga-liṅga*, one of the five crystal liṅgas which he brought from Kailāsa, in the institution which he established on the banks of the river Tuṅgabhadrā and appointed his disciple Padmapāda to preside over it.[76]

Śaṅkara then reached Kāñcī presided over by Devī Kāmākṣī. Hindu piety considers Kāñcī to be one of the seven Mokṣapurīs — places conducive to release. The planning of the city itself as Viṣṇu-Kāñcī and Śiva-Kāñcī with the temple of Śrī Kāmākṣī as the focal point is ascribed to Śaṅkara. Ānandagiri describes the consecration of Śrī-Cakra and Kāmākṣī by Śaṅkara at Kāñcī.

Śrī Kāmākṣī presides over Kāñcī in the form of ether (*ākāśa*). Manmatha, the God of Love, according to a legend, performed penance at Kāñcī after his body had been reduced to ashes by the Lord Śiva, in order to regain his form. Śrī Kāmākṣī was pleased with him for his penance, and by a glance from Her eyes blessed him with a handsome body. Manmatha made a further request that he should acquire the power to win a victory over the Lord Śiva. This was

---

76. *śrī śaṅkarācāryayogī śriṅgagiristhānamagamat akhileśaḥ,*
*śrī śāradākhyapīṭhe śivaliṅgaṁ bhoganāmakaṁ cakre.*

*MS*, 72-7-16. See *ASV*, p. 183.

also granted. After this, Śrī Kāmākṣī withdrew into the *bilākāśa* (ether in the cave) which is in the temple at Kāñcī, and also retracted Her *sānnidhyam* from all the Śiva temples. Śiva felt the pangs of separation. It appeared as if that was the moment of Manmatha's triumph over Śiva. Kāñcī thus came to be known as *Śiva-jit-kṣetra.* Sometime after this Brahmā went to Kailāsa, worshipped Śiva, and looked for the Devī in order to offer his obeisance. But, she was not there. He visited all the Śiva shrines from Kailāsa onwards. But nowhere he felt the *sānnidhyam* of the *śakti* (*devī*). Then he reflected, and understood the reason for Her absence. He went to Kāñcī and prayed to the Mother that She should manifest Her *sānnidhyam* again in all the Śiva shrines. She appeared before Brahmā and told him that thereafter Her *śaktis* would become manifest in all the Śiva temples outside Kāñcī, and as a mark of her boon to Manmatha, she would pervade the whole of *Kāñcī-kṣetra* in her subtle form from Her focus — the *bilākāśa* and there should be no special manifestations of Her in the Śiva temples at Kāñcī. Even to this day, there is no separate *sanctum sanctorum* for the Devī within the limits of Kāñcī in any of the Śiva temples, nearly fifty in number, while every Śiva temple outside the limits of Kāñcī has the *sanctum sanctorum*. The lesson of this story is that Kāñcī is the most holy *Devī-kṣetra.* When Śaṅkara visited Kāñcī and went to the Śrī Kāmākṣī temple, he had the *darśana* of the Devī in the *bila* (cave) there; and in order to make Her manifest Her benignant aspect, he consecrated Her image and the *Śrī-Cakra* in front of Her Image. Referring to Śaṅkara's visit to Kāñcī, the *Mādhavīya-Śaṅkara-vijaya* (*sarga* 15) says that he had a temple for the Devī built, and replaced the *tāntrika* mode of worship, by the *vaidika.* The installation of the *Śrī-Cakra* in the Kāmākṣī temple was the culmination of Śaṅkara's mission of consecrating temples. After mentioning the founding of Śiva-Kāñcī and Viṣṇu-Kāñcī by Śaṅkara, Ānandagiri gives a description of the installation of *Śrī-Cakra* in the temple of Śrī Kāmākṣī and its significance. The *Śrī-Cakra* consists of four Śiva-Cakras and five Śakti-Cakras. The nine together constitute a unity. And the *Śrī-Cakra* represents the union of Śiva and Śakti. The worshipper of the *Śrī-Cakra* should



realize this union. It is through this mode of esoteric worship that Śrī Kāmākṣī would be pleased and shower Her grace. Śiva is Brahman, and Śakti is *Brahma-vidyā.* A discerning knowledge with introspection of the *Śiva-cakra* and *Śakti-cakra* in the *Śrī-cakra*, the *darśana* of the *Śrī-cakra* and its *pūjā* would lead the devotees to obtain Her grace and ultimately liberation. It was to help the sādhakas that Śaṅkara consecrated the *Śrī-cakra* in the shrine of Kāmākṣī. Śaṅkara established also a *maṭha* then in Kāñcī, gave for *pūjā* the *Yoga-liṅga* to Sureśvara belonging to the *Indra-sarasvatī* order, ordered him to preside over (*adhivasa*) this institution of the *Kāmakoṭi-pīṭha*; and he spent his last days at Kāñcī in complete bliss.[77]

From Kāñcī, some of his disciples who had earlier belonged to the different devotional paths went forth on a tour of the country, with the blessings of the *guru*, to propagate their respective stand-points in faith in conformity with the teaching of the Vedic scriptures and their culmination — the Advaita philosophy. They were firmly convinced of the truth of Advaita; but so far as the *saguṇa*-worship was concerned each had his own *iṣṭa-devatā*, Viṣṇu, Śiva, Śakti, and others. Admitting the non-dual nature of the supreme Self, they had their own preference in regard to the form of the Personal Godhead. They sought permission from their Master to preach their respective forms of faith; and, the permission was readily given. Among the disciples who thus wanted to tour the country on a mission of deepening the faith of the people, Paramatakālānala was a Śaiva, Lakṣmaṇa and Hastāmalaka

---

77. *ibid.*, p. 189.

*vide:*

*kāñcyāṁ śrīkāmakoṭīṁ kalimalaśamanīṁ kalpayitvā sureśe*
*śrīvidyārājapīṭhārcanamahitamahārājyasāmrājya lakṣmīm*
*samveśyātmīyaśiṣye sakalabhuvanasammodahetormahātmā*
*cidrūpasvānubhūtiṁ bhajati bhavamahāmbhodhisantāraṇāya.*
MS, 72-7-11.

*kāñcyāṁ śrīkāmakoṭau tu yogaliṅgamanuttamam*
*pratiṣṭhāpya sureśāryaṁ pūjārthaṁ yuyje guruḥ.* MS, 72-7-15.

were Vaiṣṇavas, Divākara was a Saura, Tripurākumāra was a Śākta, and Girijākumāra was a Gāṇapatya.

The *Parāśara-mādhavīya* speaks on the basis of an ancient authority of six faiths: Saura, Vaiṣṇava, Śaiva, Śākta, Gāṇapatya, and Kaumāra. According to the present work, Śaṅkara sought to establish the first five and the sixth one was *kāpālika-mata*. It should be noted here that the sixth faith, namely, Kaumāra, although not explicitly stated to have been established by Śaṅkara, yet must be taken to have been followed and established by him; for, it is said in the present work itself that Śaṅkara offered worship at the *Subrahmaṇya-kṣetra* to Lord Subrahmaṇya who is in the form of a serpent. So, according to the present work also, Śaṅkara established the sixth faith, that is, Kaumara, by following it. But, Vaṭukanātha, the Kāpālika, requested Śaṅkara to give a place for his faith also. Then Śaṅkara asked him to propagate his faith as a *prima facie* view, that is, as a step for the masses and for those who have lost their competence even though they were Brahmins for pursuing the purer Vedic paths.[78] All these disciples went around the country, spread their doctrines, and went back to Kāñcī to live with their Master.[79]

---

78. See foot-note on p. 203.

79. Vaṭukanātha is said to have remained as a servant of the other five important disciples (p. 203). The five important disciples here referred to should be: Paramatakālānala, Tripurākumāra, Girijākumāra, Divākara, and Lakṣmaṇa. Hastāmalaka who has been mentioned along with Lakṣmaṇa (p. 197) is definitely excluded from the group of these five important disciples. Lakṣmaṇa, however, is not to be excluded, as the text—

*yat-pādapaṅkaja-dhyānāt lakṣmaṇādyā mateśvarāḥ,*
*babhūvuḥ tādṛśaṁ vande śaṅkaraṁ ṣaṇmateśvaram.* [See p. 204.]

gives to Lakṣmaṇa the first prominence among the propagators of faiths. Hence the version that mentions Hastāmalaka and his so-called propagation of *pañcamudrāṅkana* is plainly apocryphal. (See foot-note on p. 198).



5

*The Last Days of Śaṅkara*

Having thus expounded the philosophy of Advaita and having organized monastic institutions to preserve and propagate the Advaita tradition for the benefit of posterity, Śaṅkara settled down at Kāñcī and spent his last days there. All the manuscripts of the present *Śaṅkara-vijaya* uniformly affirm that Śaṅkara attained *siddhi* at Kāñcī—one of the seven mokṣapuris.[80] Besides the present *Śaṅkara-vijaya*, the *Śivarahasya* already referred to states that Śaṅkara worshipped five sphaṭika-liṅgas and attained *siddhi* at Kāñcī.[81] The *Patañjali-carita* of Rāmabhadra Dīkṣita deals with the life of Śaṅkara in its last chapter and concludes by saying that Śaṅkara, after his *digvijaya* and after writing treatises on Advaita, spent his last days at Kāñcī.[82] Rājacūḍāmaṇi Dīkṣita in his work *Śaṅkarābhyudaya* states that Śaṅkara during his last days stayed at Kāñcī worshipping Kāmākṣī with divine bliss.[83]

The *Jagadguru-pāramparya-stuti*[84] and the *Guruparamparā-stotra* published by Dr Hultzch in his report on "*The Search for*

---

80. *ASV*, p. 208.

81. *tadyogabhogavaramuktisumokṣayoga-*
*liṅgārcanāt prāptajayasvakāśrayam*
*tān vai vijitya tarasā akṣataśāstra vādaiḥ*
*miśrān sa kāñcyāṁ atha siddhimāpa.* *Śivarahasya*, IX, xvi,
See Appendix, pp. 78 - 82.

82. *advaitabhāṣyamupakalpya diśo vijitya kāñcipure sthitimavāpa*
*sa śaṅkarāryaḥ.* *Patañjali-carita*, Kāvyamala series,
(Nirnaya Sagar Press, Bombay), VIII, 72.

83. *kaṁpātīranivāsiniṁ anudinaṁ kāmeśvarīmarcayan*
*brahmānandamavindata trijagatāṁ kṣemaṅkaraḥ śaṅkaraḥ*
*Śaṅkarābhyudaya*, VIII, 111.
(*vide: Sahṛdayā, Saṁpuṭa*, IV, *Sañcikā*, X, p. 240).
Sri Vani Vilas Press, Srirangam.

84. Published by the Seshadri Press, Mysore, 1946.

*Sanskrit Manuscripts in South India*"[85] state that Śrī Śaṅkara attained *siddhi* at Kāñcī.

The *Jagadgurupāraṁparya-stuti* and the Hultzch Manuscript in the first few verses briefly narrate a few events in Śrī Śaṅkara's life. It is stated in the former work that Śrī Śaṅkara reached Kāñcī from the banks of the river Tuṅgabhadrā, consecrated Kāmākṣī and attained eternal bliss there.

*svecchayā paryaṭan bhūmau yayau kāñcīpurīṁ guruḥ*
*tatra saṁsthāpya kāmākṣīṁ devīṁ paraṁ agāt padam* (p. 2).

This is given in the Hultzch Manuscript with slight variation in phraseology.

---

85. Published by the Government Press, Madras, 1905. See Part III, No. 2146

It is to be noted here that these two lists tally to a certain extent with the list given by K. T. Telang in his paper entitled "*A Note on the Age of Madhusūdana Sarasvati*" (Paper read on 12-12-1874 at a meeting of the Bombay Branch of the Royal Asiatic Society and later published as article in the Journal of the Royal Asiatic Society, Bombay, in Vol. X).

In this paper, K. T. Telang gives a list of the forty-five occupants of the *gādi* of the Śriṅgeri-maṭha, the forty-fifth occupant being Nṛsiṁha-bhāratī (1542-1561 Śālivāhana-śaka). The *Jagadguru-pāraṁparya-stuti* gives the list of the sixty-nine preceptors from Śrī Śaṅkara, the sixty-ninth being Saccidānanda-śaṅkara-bhāratī (1859 Śālivāhana-śaka). This work is in verse form. These two lists bear close resemblance to each other as regards the names and number of the ācāryas till the thirty-second preceptor Vidyātīrtha. After Vidyātīrtha both the lists differ to some extent as regards the names and the arrangement of the preceptors.

The *Guruparaṁparā-stotra* published in full by Dr Hultzch in his report on "*The Search for Sanskrit Manuscripts in South India*" contains a list of thirty ācāryas from Śrī Śaṅkara, the thirtieth being Śaṅkara-bhāratī. This list is identical with the other two as far as the names and number of the preceptors are concerned till the twenty-ninth preceptor Jñānottamabhāratī. This list bears no date. Thus these three lists from quite independent sources tally in the order of the names till the twenty-ninth *ācārya* of the Bhāratī order of sannyāsins.



*agacchat svecchayā kāñcīṁ paryaṭan pṛthvītale*
*tatra saṁsthāpya kāmākṣīṁ jagāma paramaṁ padam.*

The verse in these two lists thus substantiates the version of the *Ānandagirīya-Śaṅkara-vijaya* that Śrī Śaṅkara attained *siddhi* at Kāñcī.

Śaṅkara's life thus has been closely associated with Kāñcī; Kāñcī and its environs are replete with the reminiscences of Śaṅkara's life and mission. The temples of all denominations in Kañcī abound in sculptures representing a sannyāsin with *eka-daṇḍa* many of which could easily be identified as those of Śaṅkara.

To begin with:- (1) There is a life-size stone image of Śaṅkara installed in a shrine in close proximity to the *sanctum-sanctorum* of Śrī Kāmākṣī. The bronze *utsava-mūrti* of Śaṅkara which is in this shrine is taken every year on the Vyāsa-pūjā day to Mukti-maṇḍapa on the banks of the Sarva-tīrtha, and offered worship there. (Fig. 1) (2) In the *maṇḍapa* with one hundred and eight pillars at Śrī Varadarājasvāmī temple there is a sculptured panel in which are depicted a *brāhmaṇa paṇḍita* with *śikhā* and *yajñopavīta* in a defiant and arrogant mood, and a young *sannyāsin* with *ekadaṇḍa* in front of him, and radiating calmness. This panel illustrates the meeting between Vyāsa in disguise and Śaṅkara, at which, the former challenged, in order to test, Śaṅkara's interpretation of the *Brahma-sūtra*, There is another sculpture in the same temple on a pillar in the *maṇḍapa* to the north of the shrine of the Tāyār (*Lakṣmī*) which shows an elderly sage, with *jaṭā*, *rudrākṣa*, and *yajñopavīta*, in a sitting posture, and with one finger of the right hand raised, and an *ekadaṇḍa sannyāsin* standing nearby, offering obeisance. This sculpture evidently is the complement to the previous one: it represents Śaṅkara worshipping Vyāsa after the latter's identity had been disclosed (Fig. 2). (3) At the Iravattaneśvarar temple in Kāñcī, belonging to the Pallava period, there is a niche in a wall in which there is a figure of Vyāsa flanked by that of a young *ekadaṇḍa-sannyāsin* who must be Śaṅkara (Fig. 3). Similar sculptured figures are to be seen

in the Vaikuṇṭha-Perumāl temple of Pallava period (Fig. 4), Puṇyakoṭīśvara temple in Viṣṇu-Kāñcī (Fig. 5), Narasimha temple in Śevilimeḍu (Fig. 6) — a suburb of Kāñcī, Ekāmranātha temple (in many yogic postures) (Fig. 7), and in the Kāmākṣī temple (Fig. 8). There are also inscriptional evidences in and around Kāñcī to the four of the ten orders of sannyāsins, namely, Sarasvatī, Tīrtha, Bhārātī and Sāgara, the last one being very rare nowadays. These tend to show that the association of Śaṅkara and his followers in Kāñcī has left in the area an indelible impression which, with the passage of time, has only become deeper.

In Kāñcī — the *mokṣapurī* — Śaṅkara during the last moments of his life directed Sureśvara of the *Indra-sarasvatī* order to send the *mokṣa-liṅga* to Cidambaram and then transformed his gross body through yogic process to subtle forms finally culminating in omnipresent consciousness, that is absolute bliss. In the words of Ānandagiri:

*sarvavyāpakacaitanyarūpeṇa adyāpi tiṣṭhati*
*sa eva śaṅkarācāryaḥ guruḥ muktipradaḥ satām.*

(*ASV.*, p. 207)



Fig. 2



Fig. 1



The central panel shows Dakṣiṇāmūrti and on either side there are two great ṛṣis—Vyāsa and Jaimini. To the left of Vyāsa is Śaṅkara as a boy of sixteen with the *daṇḍa* in his hand and with his hair grown into curls and with no beard on his chin as he is so young. There are *rudrākṣa* beads on the neck of Śaṅkara.

Fig. 3



Fig. 4



Fig. 5



Fig. 7



Fig. 6



Fig. 8

|| श्रीगणेशाय नमः ||

# || श्रीशङ्करविजयम् ||

|| १ ||

## || शास्त्रोपकरणम् ||

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं [1]सदाऽभवम् ॥

अनन्तानन्दगिरिरहम[2]प्रतिहताज्ञस्य भगवतः शिष्यः [3]मम परमगुरोरवतारप्रयोजनं वर्णयामि । अत्र मम परमगुरोरवतारकथा, तदुपकृतिपोषितजगत्परंपराऽविच्छिन्नशुद्धाद्वैतविद्याप्रतिष्ठा, तदाशाविजयकौतूहलं, तद्व्यासदर्शनविचित्रप्रस्तावं, तच्छरीरावसानकालागतब्रह्मदेववचनं, व्यासदत्तायुःप्रपञ्चनं, [4]वियन्मार्गसञ्चारः, कैलासदर्शनं, भट्टदर्शनं, मण्डनमिश्रविजयः, तदङ्गनाप्रसङ्गः, देहान्तरसञ्चारविदितकामशास्त्रं, शिष्यागमनं, नृसिंहसाक्षात्कारः, सरस्वतीविजयः, शृङ्गेरीस्थाननिवासः, काञ्चीनगरनिर्माणं, कामाक्षीप्रपञ्चः, श्रीचक्रनिर्माणं, मोक्षमार्गप्रकाशः, सच्चिदानन्दैक्यं च [इत्ये] (ए) तानि प्रकरणानि । तत्तदवान्तरकथाविस्तारविजृम्भितं नानाप्रश्नोत्तरभासुरं बहुदुष्टमतनिबर्हणं इदानीं करोमि ।

|| इत्यनन्तानन्दगिरिकृतौ शास्त्रोपकरणं नाम प्रकरणं प्रथमम् ||

---

1. म3. 'सदाऽभव'मिति पाठः वर्तते, अन्यासु मातृकासु 'सदाऽस्म्यह' मिति ।
2. रा. अप्रतिहतशिष्यः ।
3. रा. 'मम' इत्यत आरभ्य 'अत्र' इति पर्यन्तो भागो नास्ति ।
4. त. मातृकायां 'वियन्मार्गसञ्चारः कैलासदर्शन' मित्ययं पाठः उपलभ्यते ।

॥ २ ॥

## ॥ गुरोरवतारकथा ॥

तत्र भगवांश्चतुर्मुखः स्वमुखबाहूरुपादेभ्यः किल ब्रह्मक्षत्रवैश्यशूद्रान्निर्माय संसारचक्राधिदेवः शिवविष्णुब्रह्मगणपत्युपासकान् कृत्वा जातिधर्मपरिपालनं तपोविधिना कल्पपर्यन्तमाचकार। ततः प्रवृत्तेषु कृतादिषु युगेषु ब्राह्मणादयः सत्यधर्मतपोयज्ञविद्यादिपरिशोभितशीलाः, "सर्वदेवमयः स्वजातिदेवः" इति सम्यग्विचारसंपन्नाः स्वेशैक्यधीनिर्जितभिदायन्तरायाः सदा श्रुत्यर्थपर्यालोचनतत्परा बभूवुः—

पूज्येषु सेवका नीचाः पुण्यमार्गक्रमानुगाः ।
तत्तद्देवपदं प्रापुर्यथाजातिकुलस्थिति ॥
विप्राणां दैवतं शम्भुः क्षत्रियाणां च माधवः ।
वैश्यानां तु भवेद्ब्रह्मा शूद्राणां गणनायकः ॥

इति (मनु] स्मृतेः।

अतो ब्राह्मणेन शिवतत्त्वविदा भवितव्यम्। क्षत्रियादिना तु तत्तत्तत्त्वविदा भवितव्यम्। स्मृतेरन्यथाकर्तुमशक्यत्वात्। परन्तु क्षीणे पुण्ये लुप्तधर्मतया तपोलेशभाजि कलियुगे, परस्परारागादिग्रस्तेषु ब्राह्मणादिषु सत्यज्ञानशून्येषु निगमाचारपरित्यक्तेष्वागमाचाररतेषु लोकप्रवृत्तिः काचिदासीत्—

केचिच्छंभुरताः परे हरिरता [1]वाणीशभक्ताः परे
चान्ये वन्हिरता दिवाकररता विघ्नेशभक्ताः परे।
केचिच्छक्तिरताश्च भैरवरताः केचित्तु मल्लारिगाः
विष्वक्सेनरताः परे मदनगाः केचिद्भजन्त्यर्थदम् ॥

1. रा· वाणीरताः केचिदन्ये वन्हि० । म2· वाणीरताः केचन, केचिद्वन्हि०।



केचित्सुरेशमपरे यममप्पतिं च
वायुं महीमुदकमम्बरमादिमूर्तिम् ।
केचिद्विराजमपरे त्रिगुणान् यथेष्टं
केचित्प्रधानमपरेऽणुमुपात्तकर्म ॥

केचिच्चन्द्रपराः परे कुजपराः केचित्तु सौम्योत्सुकाः
केचिज्जीवपराः परे भृगुपराः केचित्तु मन्दाश्रिताः ।
केचित्कालपराः परे पितृपराः केचित्तु नागेशगाः
केचित्तार्क्ष्यपराश्च सिद्धनिचयं [1]ध्यायन्ति केचित् द्विजाः ॥

केचिद्गन्धर्वसाध्यादीन् भूतवेतालगाः परे ।
एवं नाना प्रभेदा[2]सीन्नृणां वृत्तिर्यथेप्सिता ॥

केचित् [3]स्ववृत्तिं वेदाद्यैः प्रतिपाद्यां समूचिरे ।
केचित् धर्मैः [4]इयं मुक्तिः इति जल्पं समास्थिताः ॥

अन्योन्यमत्सरग्रस्ताः परस्परजयैषिणः ।
निजेच्छाकृतिमङ्गेषु [5]धारयन्तो मदान्विताः ॥

लिङ्गत्रिशूलडमरुगादिचिन्हं, शङ्खचक्रगदापद्मादिचिन्हं, कमण्डलुकूर्चादिचिन्हं, पूर्णमण्डलरक्तचन्दनादिचिन्हं, एकदन्तचिन्हं, स्वर्णवर्णपादहरिद्रादिचिन्हं, स्फाटिकार्धचन्द्रजटाविभूत्यादिचिन्हं, वटमालिकाश्वेषभाषादिचिन्हं, स्वर्णादिरचितशङ्खचक्रचतुर्बाहुत्वादिदण्डतोत्रपाणित्वादिचिन्हं, पुष्पकोदण्डाद्युपकल्पितवसन्तोत्सवभूषणादिचिन्हं, नवविधानरूपकण्ठमालिकादिचिन्हं, मणिरचितवज्रायुधधारणादिचिन्हं, त्रिस्फुलिङ्गचिन्हं, महिषरूपवेषप्रतिमादिचिन्हं, सलिलमध्यस्थलपूजादिचिन्हं, वायुरूपस्तवोपासनादिचिन्हं, भूमिदेवतोपासनादि-

1. म2· सेवन्ति केचित् धिष्ण्यम् । 2. रा. ०सीज्ज्ञानावृत्तिर्य० ।
3. रा. स्वतन्त्रं वेदार्थैः । म2· स्ववृत्तिं वेदार्थैः । 4. रा. इयं मूर्तिरिति ।
5. रा धारयन्ति अङ्कुशान्विताः । म2· धारयन्ति कृपान्विताः ।

चिन्हं, तीर्थयात्राद्युदकधारणादिचिन्हं, शून्योपासनादिचिन्हं, आदिवराहोपासनाचिन्हं, चतुर्दशलोकोपासनाचिन्हं, [1]सत्त्वरजस्तमोगुणोपासनावेषधारणादिचिन्हं, सांख्यनिर्दिष्टप्रधानोपासनाचिन्हं, तर्कराद्धान्तनिश्चितपीलूपासनाचिन्हं, जैमिनिमतसिद्धान्तकर्मप्रपञ्चसञ्चारचिन्हं, पौर्णमासादिकालविशेषचन्द्रोपासनादिचिन्हं, अङ्गारकादिपञ्चग्रहोपासनाचिन्हं, क्षपणकमतसिद्धान्तकालोपासनाचिन्हं, दर्शादिपुण्यकालासादितपवित्रादिपितृपासनाचिन्हं, स्वर्णादिरचितशेषफणाधारणादिचिन्हं, वैनतेयमूर्त्युपासनाचिन्हं, निरयनाथादिसिद्धवेषधारणादिचिन्हं, गानविशेषैर्विश्वावसूपासनाचिन्हं, चिताभस्मोद्धूलन (शल्य) [शूल] विशेषधारणादिभूतराडुपासनाचिन्हं, अक्षादिबहुकज्जलादिधारणचिन्हमित्यादि बहुविधं यथेच्छं (संप्राप्य) [संपाद्य] स्वेच्छाविहारणशीला मर्त्या बभूवुः। [2]ते 'अहरहस्सन्ध्यामुपासीत' इत्यादि विधिवचनानि पीडयन्ति।

कर्मभ्रष्टान् परानन्ददूरांश्चैतान् नराधमान्।
स दृष्ट्वा नारदश्शीघ्रमाप ब्रह्मपदान्तिकम् ॥

भो धातः! नूतनमभूज्जगदेतदर्वाक्
वाक्चित्रयुक्तिपरिकल्पितकर्मशीलम्।
कालादिजात! निगमार्थपरम्परा स्याद्
व्यर्था तदा यदि भवन्मतमप्रमाणम् ॥

भवद्भिः पूर्वमिदमुक्तम् - 'सदेव सौम्येदमग्र आसीत्' [छा. उ. ६-२-१], 'ब्रह्म वा इदमग्र आसीत्' [बृ. उ. १-४-११], 'आत्मा वा इदमेक एवाग्र आसीत्' [ऐ. उ. १-१],

1. रा. 'सत्त्वे' स्यत आरभ्य 'प्रधानोपसनाचिन्ह'मिति पर्यन्तो भागो नास्ति।
2. रा. तान्।



यदाऽतमस्तन्न दिवा न रात्रिर्नसन्न चासञ्छिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥

[श्वे. उ. ४-१८] इति।

स्मृतिश्च—

क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥

[भ. गी. १५-१६] इति।

तत्प्रीतये कर्म करोतु विप्रः क्षत्रस्तु [1]भूमिं महसा भुनक्तु।
वैश्यो ददात्वर्थमथास्य तुष्ट्यै शूद्रः करोत्वग्रजपूजनं हि ॥ इति।

तस्मात् द्विजातीनामेकमेव दैवतं सदादिशब्दवाच्यं[2]; तस्य गुणातीतवृत्तेर्लिङ्गाभावात् तत्सत्वे मानाभावात् निरुपाधिकं ब्रह्मैव मुमुक्षुभिरुपासनीयमिति ॥

एवं नारदवचनं निशम्य ब्रह्मा चिरं ध्यात्वा स्वलोकात् पुत्रमित्रकलत्रभक्तादियुक्तः शिवलोकं प्राविशत्। तत्र मध्याह्नकोटिसूर्यतेजसं कोटिहिमांशुशीतलं पञ्चवक्त्रं चन्द्रमौलिं विद्युत्पिङ्गजटाधरं पार्वतीवामार्धशरीरिणं महादेवं दृष्ट्वा दण्डवत् सगणः [3]प्रणम्य संपुटितहस्तयुगलः ब्रह्मा किलोवाच—भो! महादेव! सर्वज्ञ, सर्वलोकेश, सर्वसाक्षिन्, सर्वमय, सर्वकारण, सर्वात्मक, सर्वातीत, सर्वदेवबन्दितचरणारविन्द, प्रणवस्वरूप, प्रणवातीत, प्रणवगोचर, कालरूप, कालातीत, कमनीयविग्रह, कन्दर्पहर, कामितार्थप्रद, करुणाकर, श्रीपरमेश्वर, सावधानेन मनसा मदीयां विज्ञापनामवधारय— तुरीयप्रणवातीतब्रह्मणः सत्यज्ञानानन्तलक्षणात् भवतः किल अर्धबिन्दुरूपा प्रकृतिरुत्पन्ना। तवैतस्याश्च चन्द्रचन्द्रि-

1. रा., म2. भक्तिं सहसा व्यनक्तु। 2. प्रतिपाद्यमित्यर्थः —टि०
3. रा. प्रणनाम। उत्थाय संपूजितहस्तयुगः सगणो ब्रह्मा।

कान्यायेन शुद्धाद्वैतता, सैव त्वमेव इति सिद्धम्। तत्सकाशान्मकारः शुक्लः तामसगुणप्रधान उत्पन्नः। तस्मादुकारः कृष्णः सत्वसंपन्नः, तस्मादुकारः शोणितवर्णः रजस्संपन्नः। अहं भवदाज्ञया [1]जरायुजादि चतुर्विधजङ्गमान् पर्वतादीन् स्थावरांश्च सृष्ट्वा समुद्रद्वीपगिरिनदीवनगोतुरगमर्त्यकरिसिंहव्याघ्रमल्लूकादीन् ब्रह्मक्षत्रवैश्यशूद्रजातीन् प्राणिनः तत्तद्धर्मसंस्कारशीलान् कृत्वा भवच्छरणारविन्दध्यानासक्ते मयि सत्यलोकाश्रिते भूलोके कश्चिदुपद्रवः समुत्थितोऽभवत्—

श्रुत्याचारं परित्यज्य मिथ्याचारं समाश्रिताः।
विप्रादयो विचित्रैस्तु लिङ्गैस्सन्तप्तदेहिनः॥

हुतं नैव यथाकालं अग्नौ हव्यं स्वमन्त्रतः।
लिङ्गिनो वयमित्युच्चैः अभिमानाद्धरा [धर्मैः] (धर्माः)॥

न दत्तं पर्वणि प्राप्ते कव्यं पित्रादितृप्तये।
नाध्यापि [तो] (तं) ब्रह्मय[ज्ञः] (ज्ञे) सत्यलोकस्य सिद्धये॥

नाग्निष्टोमं नाग्रयणं न संन्यासं कदाचन।
करोति मनुजः कश्चित् सर्वे पाषण्डमाश्रिताः॥

विष्णुदासा वयं चेति वयमीशानलिङ्गिनः।
भैरवार्कगणेशानां देव्या भक्ताश्च केचन॥

केचित् कापालिकाचाराः मद्यमांसाशिनः सदा।
एकस्यैव मतस्यापि भेदषट्कं समाश्रिताः॥

बहवोऽवान्तरमताः सिद्धान्तं तं समाश्रिताः।

तत्स्वरूपमेव परं इति तदादृताचाराः। सत्यशौचादिधर्मकर्मज्ञानरहिताः पशव इव, द्वैतवादिनः श्रुतिस्मृतीतिहासपुराणोपपुराणादिभणितकर्मज्ञानरूपमार्ग-

1. रा. 'जरायुजादि' इत्यत आरभ्य 'सृष्ट्वा' इति पर्यन्तः भागः नास्ति।



द्वयं परित्यज्य तृतीयपथा मूढतात्पर्येण विहितमविज्ञाय शुद्धाद्वैतविद्याविरोधिनः दुर्नीत्या श्रुत्यर्थविरुद्धं तात्पर्यं स्वीकृत्य सर्वे कुमतशीला बभूवुः।

कर्ता त्वमीश जगतां मम केशवस्य
तेजो(युग)[युगा]न्तसमये लयकर्तृभावात्।
तस्माद् भुवि प्रबलकुत्सितदुर्मतानां
नाशाय चिन्तय, समुद्धर वेदमार्गम्॥

इति ब्रह्मणा प्रस्तुतः श्रीपरमेश्वरः सन्तुष्टान्तरङ्गः सन्निदमुवाच—

ब्रह्मन्! यथासुखं गच्छ सन्तुष्टोऽस्मि तवोक्तिभिः।
शङ्कराचार्यनाम्नाऽहं संभवामि महीतले॥

यद्धितं तव विष्णोश्च तदेव स्थापयाम्यहम्।
मम भक्तावुभौ यस्मात् सत्यं नान्यद्विचिन्तय॥

मद्विभूतिर्हरिस्त्वं च इन्द्राद्यष्टदिगीश्वराः।
वसवोऽष्टौ द्वादशार्का गन्धर्वाश्च मरुद्गणाः॥

यक्षाः सिद्धास्तथा साध्या गरुडाः पन्नगादयः।
किमत्र बहुनोक्तेन सर्वश्चेदं चराचरम्॥

मदंशभेदसञ्जातं लये मय्येव लीयते।
अहमेकोऽक्षरः कर्ता ध्रुवः शाश्वत एव च॥

आत्मा गुहाशयः सर्ववेदार्थः प्रणवात् परः।
तस्मात् सर्वेषु कालेषु मामद्वैतमुपाश्रय॥

इति संबोधितो ब्रह्मा प्रणिपत्य महेश्वरम्।
सगणः प्राप [1]लोकं स्वं तदाज्ञां हृदि संस्मरन्॥

1. म$_2$. सत्याख्यं निजलोकमनन्यधीः।

[1][ततः सदाशिवश्शम्भुर्लोकानुग्रहतत्परः]
कालट्याख्ये ग्रामवर्ये केरलानामलङ्कृते ।
विद्याधिराज[2]तनयः प्राज्ञः शिवगुरुर्बभौ ॥
(ततः सदाशिवश्शम्भुर्लोकानुग्रहतत्परः)
तपोमहिम्ना तत्पत्न्यां प्रविवेश स्वतेजसा ।
सा दधार सती गर्भमादित्यसमतेजसम् ॥
व्यजायत शुभे काले पञ्चोच्चग्रहसंयुते ।
अनन्दन् बान्धवास्सर्वे पुष्पवर्षैर्दिवच्युतैः ॥
शम्भोर्वरं [3]अनुप्राप्य पिता शिवगुरुः किल ।
आयुषो ह्रस्वतां जानन्नपि नोवाच किञ्चन ॥

---

1. रा., म$_1$, म$_4$, म$_5$, त, मातृकासु 'तत' इत्यत आरभ्य 'अतिमानुषकर्मकृत्' इति पर्यन्तो भाग: उपलभ्यते। अन्यासु मातृकासु अधोनिर्दिष्टपाठः वर्तते :—
ततः सर्वात्मको देवश्चिदम्बरपुराश्रितः । आकाशलिङ्गनाम्ना तु विख्यातोऽभून्महीतले ॥
तत्र विद्वन्महेन्द्रस्य कुले द्विजगणाश्रिते । जात; सर्वज्ञनाम्ना तु कश्चिद्द्विजकुलेश्वरः ॥
कामाक्षीति सती चाभूत्तस्य लक्षणलक्षिता । चिदम्बरेश्वरं ध्यात्वा तावुभौ प्रापतुः सुताम् ॥
सा कुमारी सदा ध्यानसक्ताऽभूत् ज्ञानतत्परा । विशिष्टेति च नाम्ना तु प्रसिद्धाऽभून्महीतले ॥
तामष्टमेऽब्दे विप्राय शान्तायाद्भुतकर्मणे । प्रददौ विश्वजिन्नाम्ने सर्वज्ञोऽस्याः पिता स्वयम् ॥
सा सदा पतिमद्वैतं ध्यात्वाकाशात्मकं शिवम् । तस्याराधनमत्युग्रमाचकार विवेकिनी ॥
तादृशीमपि सन्त्यज्य ययौ विश्वजिदद्भुतम् । अरण्यं तपसे कृत्वा मनोनिश्चयतां गतम् ॥
तदा प्रभृति सा नारी चिदम्बरमहेश्वरम् । तोषयामास पूजाभिर्ध्यानैरात्मगतैः सदा ॥
स देवः सर्वपूर्णोऽपि तस्या वदनपङ्कजम् । प्रविश्य विस्मितान् कुर्वन् जनानन्यान् समागतान् ॥
महोग्रतेजसा जुष्टा विशिष्टाऽभूत्तथाम्बिका । सर्वैः सम्पूजिता नित्यं पित्रादिभिरुपासिता ॥
अतीते मासि गर्भस्य वृद्धिरासीद्दिने दिने । चिदम्बरेश्वरं कृत्वा यजमानं द्विजोत्तमः ॥
तृतीयादिषु मासेषु चक्रुः कर्माणि वेदतः । प्राप्ते तु दशमे मासि विशिष्टागर्भगोलतः ॥
प्रादुरासीन्महादेवः शङ्कराचार्यनामतः । आसीत्तदा पुष्पवृष्टिर्देवसङ्घैः प्रचोदिता ॥
नेदुर्दुन्दुभयः दिव्याः स्वर्गलोके चिरं सुखम् ॥

2. रा मातृकास्थपाठोऽयम् । अन्यासु मातृकासु विद्याधिराजानामा यः इति वर्तते ।

3. म$_4$ मातृकायां 'अनुप्राप्य' इति अयं पाठः वर्तते । म$_1$; म$_5$; रा मातृकासु 'अनुस्मृत्य' इति वर्तते ।



सर्वज्ञत्वादिसुगुणान् शंभूक्तान् तस्य संस्मरन् ।
तेजसा तस्य च शिशोः सूतिगेहोदरस्थितैः ॥
नैशं तमो निववृते तदद्भुतमिवाभवत् ।

(स्त्रियो विप्राश्च शूद्राश्च बाला वृद्धास्तथाऽपरे ।
तं सुजातमभिप्रेक्ष्य शम्भुरित्येव मेनिरे ॥)

सद्यः पुष्पफलाकीर्णास्तरवः सर्वतोऽभवन् ।
[प्रसेदुश्च दिशस्सर्वाः सलिलं विमलं बभौ] ॥

नकुलाहिश्वहरिणसिंहदन्तावलादयः ।
अन्योन्यवैरमुत्सृज्य शेमुः शमधना इव ॥

जनाजनपदव्रातादुत्तमाधममध्यमाः ।
आयाताः प्रेक्षितुं सर्वे तं सुवर्णसमौजसम् ॥

[स्त्रियो विप्राश्च शूद्राश्च बाला वृद्धास्तथाऽपरे ।
तं सुजातमभिप्रेक्ष्य शम्भुरित्येव मेनिरे ॥]

सौगतस्य करात्तत्र कस्यचिज्जनसंसदि ।
प्रभ्रष्टमपतद्भूमौ पुस्तकं तन्मतार्चितम् ॥

वेदवेदान्तविषया वादाः सुबहवोऽभवन् ।
(प्रसेदुश्च दिशस्सर्वाः सलिलं विमलं बभौ)

वेदव्यासस्य हृदयमभीष्टार्थसमुद्भवात् ।
प्रहर्षमतुलं लेभे विनियोगविदो गिराम् ॥

तस्य शङ्कर इत्याख्यां चक्रे शिवगुरुस्ततः ।
तस्यान्व(र्थः समा) [र्थत्वमा] लोच्य जहृषुः परमर्षयः ॥

दिनैः पक्षैश्च मासैश्च वर्षैश्च ववृधे सुतः ।
पञ्चवर्षस्य वर्णादिग्रहणेनास्य धीमतः ॥

उपनीतिमकृत्वैव ममार महितः पिता ।
तस्यौर्ध्वदैहिकं साध्वी चकार ज्ञातिभिस्समम् ॥

अथोपनाययामास माता तनयमात्मनः ।
सदाचारवता गोत्रजन्मनैव विपश्चिता ॥

चतुरोऽधिजगौ वेदान् पञ्चमेऽब्दे स धीरधीः ।
शास्त्राण्यपि च सर्वाणि बाल एव व्यगाहत ।

चकार मातृशुश्रूषामतिमानुषकर्मकृत् ॥

इत्यानन्तानन्दगिरिकृतौ गुरोरवतारकथा नाम प्रकरणं द्वितीयम् ॥

॥ ३ ॥

## ॥ अद्वैतस्वरूपकथनम् ॥

इत्थं विचित्ररूपतेजोगुणगाम्भीर्यादियुक्तः शैशवेऽपि प्राकृतमागधीगीर्वाणादिसर्वभाषाकुशलः सरस्वतीविलास इव अपूर्वशङ्करः शङ्करस्समवर्तत । सर्वविद्याप्रपञ्च (त): [1]प्रपञ्चातीत इव सम्यग्ज्ञानवशाज्जीवन्मुक्त इव किल अनालस्याद्भवद्भगवानाचार्यः । षड्दर्शनमूलः इतिहासस्थाणुः निगमशाखः षडङ्गपल्लवः सूत्रपुष्पः मन्त्रशलाटुः ज्ञानफलः श्रीशङ्करः कल्पवृक्ष आसीत् ॥

म2. 'तृतीये वर्षे चौलकर्म, पञ्चमे मौञ्जीबन्धनं विध्युक्तितः कुर्वन्ति विप्रौघाः । तदनु विद्यागुरुसमीपे सकृच्छ्रवणादेव अवगतसर्वविद्याप्रपञ्चः प्रपञ्चातीत इव' इति पाठो वर्तते । अतीते प्रकरणे उक्तार्थकत्वात् पाठोऽयं अत्र नाद्रियते ।



स्वर्गे यथा कल्पतरुस्तथा भूमौ हि शङ्करः ।
सुराणां भूसुराणाञ्च वाञ्छितार्थप्रदोऽभवत् ॥

वेदे ब्रह्मसमः तदङ्गनिचये गर्गोपमः तत्कथा-
तात्पर्यार्थविवेचने गुरुसमस्तत्कर्मसंसर्गणे ।
आसीज्जैमिनिरेव तद्वचनदः प्रोद्बोधकन्दे समो
व्यासेनेव मदीयसद्गुरुरसौ श्रीशङ्कराख्यः क्षितौ ॥

अद्वैतार्णवपूर्णचन्द्रमभिदापद्माटवीभास्करं
विद्वत्कोटिसमर्चिताङ्घ्रियुगलं प्रद्वेषकक्षानलम् ।
हृद्यामेयसमस्तवेदजनितप्रोद्यद्विवेकाङ्कुरं
खिद्यद्वागमृतं परात्परगुरुं श्रीशङ्करं तं भजे ॥

अर्धेन्दुललाटः पूर्णेन्दुमुखः विशालवक्षा आजानुबाहुः गुरुनितम्बः पीनोरुः गूढगुल्फः स्वल्पपादः शोणनखः करपादमध्यस्थलेषु शङ्खचक्रादिचिन्हितः, शिरसि वामभागे त्रिशूलचिन्हः, दक्षिणभागे त्वर्धचन्द्रचिन्हः, एवमङ्कद्वयेन साक्षाच्चिदम्बरेश इव विराजमानः समप्रमाणशिराः, मौञ्जीदण्डाजिन[1]भूतिधारणादिभिः शास्त्रविधिरेवमनुष्ठेय इति सर्वमर्त्यान् बोधयन् शिष्यबोधनार्थमुपाध्यायानुज्ञावशाद्ब्रह्मासने चतुष्षष्टिकलापटात्मके चतुर्दशविद्यामणिविराजिते सहस्रवेदप्रभादीपिते सूत्रेतिहासतन्त्रविराजिते तापनीयागममन्त्रयन्त्रतन्त्रादिषट्त्रिंशदङ्गुलोच्छ्रिते, प्रागद्रौ बालभानुरिव, ब्रह्माण्डगोलके ध्रुव इव, जनककृतद्वादशवार्षिके सत्रे याज्ञवल्क्य इव, परीक्षिन्नरेन्द्रस्य ज्ञानबोधसमये शुक इव, मेरुमस्तके तपश्चर्याङ्गीकारोचिते व्यास इव, रामकथाप्रगातृत्वकाले वाल्मीकिरिव, भाष्योपदेशकाले पतञ्जलिरिव, देवानां शिक्षासमये सुराचार्य इव, नारदोपदेशकाले ब्रह्मेव, धर्मराजस्य तत्त्वोपदेशकाले श्रीकृष्ण

1 रा. ०न तिलकभिक्षाटनादिभिः शास्त्रविधिरयमिति सर्वमर्त्यान् विशिष्यबोधनार्थमुपा०

इव, [1]भोजसदसि कालिदास इव, समासीनः श्रीशङ्कराचार्यगुरुरनेकशिष्याणां निगमादिसर्वशास्त्रप्रपञ्चस्य सदुपदेशमाचकार ।

भो शिष्य ! त्वमेव ब्रह्म, कस्मात् ? चैतन्यस्यैकरूपत्वात् , तत्तदविद्याकल्पितेषु देहेन्द्रियादिषु अविद्यमानेष्वपि चैतन्यमेव त्वं भवसि ।

"कथं गुरो ! सुखदुःखभाजो मे चैतन्यता ? जन्मान्तरकर्मवशाज्जनिंप्राप्तस्य जलबुद्बुदवदशाश्वतदेहस्य इन्द्रियादिभिरुपेतस्य जन्मस्थितिमरणप्रवाहशीलस्य अरिषड्वर्गपीडितस्य दाराद्येषणात्रयग्रहग्रस्तस्य न हि नित्यचिदानन्दरूपत्वं कल्पयितुमुचितम् । मदन्तर्वर्तिनो जीवस्येति चेत्,—न, तस्यापि किञ्चिज्ज्ञत्वादिधर्माश्रयत्वात् , इच्छामोहादिपीडितत्वाच्च । किञ्च भेदवादिनस्तावदज्ञो जीवः शुभाशुभभोक्ता मायागोलगूढः परमेश्वराद्भिन्नरूपः, तस्य परिपक्वज्ञानेनापि [2]सायुज्याभाव एव, किन्तु सुकृतकर्मणा पुण्यलोकप्राप्तिः , कपूयादिकर्मणा नरकलोकप्राप्तिः । एवमाह शास्त्रम्—

'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् , ब्राह्मणयोनिं वा, क्षत्रिययोनिं वा, वैश्ययोनिं वा; अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' [छा. उ. ५-१०-७] इति । तस्मात् सृष्टौ प्रलयेऽपि भिन्न एव जीवः प्रतिशरीरं विचित्रकर्माणि करोति । मोक्षो नाम सुखरूपस्थानप्राप्तिमात्रमेव प्रोच्यते इति वदन्ति । तादृशे मयि सत्यज्ञानानन्दलक्षणलक्षितशुद्धचैतन्यत्वकल्पना कथमुचिता स्यात्" इत्यालापिनं शिष्यं प्रत्याह भगवान् आचार्यः—

'यस्सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः' [मु. उ. १-१-९] इत्यादि शास्त्रप्रसिद्धः परमात्मा जगदुपादानकारणम् । 'स ईक्षत, लोकान्नु सृजा इति' [ऐ.उ.१-१]

1. म2. मातृकायां अयं पाठः उपलभ्यते ।

2. सायुज्याभावः—ऐक्याभाव इत्यर्थः ।



'अम्भो मरीचीर्मरमापोऽदोऽम्भ' [ऐ. उ. १. २] इति लोकादिसृष्टिं विधाय अतलादिसत्यान्तचतुर्दशलोकरूपविराड्देहे अग्न्यादिदेवान् संपाद्य मुखादिच्छिद्रेषु 'यथायतनं प्रविशत' इत्युक्त्वा किञ्चिदालोचितवानभूत् । एवंभूतस्य साङ्गस्य सेन्द्रियस्य विराड्देहस्य न हि तृप्तिकरमन्नं संपादयितुं शक्यम् , तद्व्यतिरिक्तवस्त्वभावात् , तस्मादन्यदल्पतरं शरीरं स्रष्टव्यमिति विचार्य गोदेहं सेन्द्रियाधिदेवक्षुत्पिपासादिसंयुतं सृष्टवान् । ततस्त्वग्न्यादिदेवताः परमात्मानमब्रुवन्—अयं तावद् गोदेह एकतोदन्तः पशुभावापन्नः वाग्रहितश्च न वै नोऽयमलमिति[1] । ततस्त्वीश्वरः स्वतन्त्रः करुणया दूर्वाङ्कुरमूलोत्पाटनहेतुभूतमुभयतोदन्तमश्वदेहं सृष्ट्वा अग्न्यादिदेवान् यथायतनं प्रविशतेत्याह—ते तत्र गताऽपि सुखलेशमलब्ध्वा पुनः 'न वै नोऽयमलमित्यब्रुवन् ,' [ऐ. उ. २-२] । भगवान् पुनरपि विचार्य निर्निमिषकरुणया विवेकवाक्संपन्नं पुरुषदेहं सृष्ट्वा अग्न्यादिदेवान् यथायतनं प्रविशतेत्याह । ते तत्र [गताः] 'सुकृतं बतेति' [ऐ. उ. २·३] अब्रुवन् , 'पुरुषो वा व सुकृतं' [ऐ. उ. २. ३] इति सुखमापुः । पुनरेवं विचारं चकार । मनःप्रवृत्त्यनुकूला किलेन्द्रियप्रवृत्तिः, तस्य प्रेरकाभावे कार्यासामर्थ्यं स्यात् , समनस्कस्येन्द्रियगणस्य जडत्वात् , जडप्रेरकेणाजडेनैव भवितव्यम् , अजडस्य चैतन्यत्वात् , तदन्यस्य जडत्वात् , तस्मादाह परमेश्वरः—'कथं नु इदं मदृते स्यादिति' [ऐ. उ. ३-११] । यदिदं देहेन्द्रियतदभिमानिदेवतावच्छरीरजातमस्ति तदिदं सर्वं मदृते भोगस्वामिनं जीवरूपिणं विना कथं नु नाम स्यात् । तस्माद्भोगस्वामिना मया जीवरूपधारिणा देहे प्रवेष्टव्यमित्यर्थः ।

'ननु कथं नु' [ऐ. उ. ३-११] इति वाक्येन आत्मनः जीवरूपेण प्रवेशस्य देहेन्द्रियादिव्यापारपालनमेव प्रयोजनं नान्यदिति चेन्न - आत्म-

1. 'ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति' [ऐ. उ. २-२] इति वाक्यस्य अर्थतोनुवादः—टि.

बोधस्वरूपस्य प्रयोजनान्तरस्य विद्यमानत्वात्, प्रविष्टस्य देहेन्द्रियादिप्रेरकस्य देहेन्द्रियातीतस्य प्रवेशमात्रेणैव मायानुग्रहवशाज्जीवभावमापन्नस्य सत्यज्ञानानन्दलक्षणलक्षितस्य परमात्मनः सम्यग्ज्ञानादभेदाध्यवसायेन शुद्धवृत्तिसिद्ध्या परमात्मनि मनोलये जाते 'एकमेवाद्वितीयम्' [छा. उ. ६-२-९] 'नेह नानास्ति किञ्चन' [बृ. उ. ४-४-१९] इत्यभेदसिद्धिर्भवति, "सोऽहमिति सर्वात्मज्ञानवानिहामुत्रव्यापकः परिपूर्णो भवति" इति शास्त्रात्। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' [श्वे. उ. ६-१५], 'ब्रह्मविदाप्नोति परम्' [तै. उ. २-१] इत्यादि (च) [भूयश्च]।

ततः परमात्मा 'स ईक्षत कतरेण प्रपद्या इति' [ऐ. उ. ३-११] द्वारप्रवेशमार्गौ तावत् द्वौ—पादाग्रं, मूर्ध्नि ब्रह्मरन्ध्रं च, तयोर्मध्ये कतरेण केन मार्गेण प्रपद्यै प्रविशामि' इत्यर्थः।

तदनु स परमेश्वरः 'एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' [ऐ. उ. ३-१२];

एतमेव मूर्धमध्यभागमेव कपालसन्धिरूपं स्थानं विदार्य्य छिद्रं कृत्वा तन्मार्गेण (क्रिया) ज्ञानशक्तियुक्तस्सन् देहमध्यं प्राविशत्।

यस्मात् (भावनो) [ज्ञानो] पाधिकस्य मूर्धमध्ये प्रवेशः, तस्मात् मूर्ध्नि ज्ञानेन्द्रियबाहुल्यं संभाव्यते। क्रियाशक्त्युपाधिकस्य पादाग्रे प्रवेशात् कण्ठादधोभागे कर्मेन्द्रियबाहुल्यं संभाव्यते। एतद्विषयप्रपञ्चस्तु बहुधा मदीयेषु भाष्यादिग्रन्थेषु [1]दर्शनीय इत्युक्तः शिष्यः श्रीमद्गुरुपादान्नत्वा स्वस्वरूपं विदित्वा सुखमास। एवमनेकशिष्याः श्रीगुरूपदेशमहिम्ना सर्वविद्यासंपन्ना बभूवुः।

शतैस्सहस्रैस्सच्छिष्यैर्लक्षैः कोटिभिरेव च।
व्याप्तमासीज्जगदिदं शुद्धाद्वैतपरायणैः॥

1. म2 मातृकास्थपाठः अयम्। अन्यासु मातृकासु 'दर्शित' इति पाठो वर्तते दर्शनीय —मया कारिष्यमाणेषु भाष्यादिग्रन्थेषु प्रदर्शनीय इत्यर्थः।



श्रुतिस्मृतीतिहासादिचोदिताचारतत्परैः।
पञ्चयज्ञपरैर्नित्यं पञ्चपूजाविशारदैः॥

आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम्।
ब्राह्मणः पूजयेत् पञ्च पञ्चयज्ञपरायणः॥

कर्म ब्रह्मार्पणं कुर्यात् सर्वदेवमयः परः।
तन्निदिध्यासशक्तस्य सर्वभूतमयस्य च॥

सर्व [भूता] (स्वत्रा) त्मनश्चैव सर्वव्यापकचेतसः।
शुद्धाद्वैतात्मनस्तस्य न [1]बहिः पूजनं विदुः॥

न कर्म लिप्यते तस्मिञ्ज्ञानवन्यात्मकेऽद्वये।
देहाद्यैक्यविशेषेण देहिनो ग्रहणं निजम्॥

प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत्।
काम्यकर्माणि सन्त्यज्य नित्यकर्म समाचरेत्॥

नित्येन कर्मणा तृप्तः परमेशः प्रयच्छति।
अद्वैतज्ञान (मत्युग्रं) [ममलं] तेन मुक्तो भवेन्नरः॥

इहामुत्रैकरूपत्वाज्ज्ञानिनः कर्मसंक्षये।
देहत्यागे विमुक्तिः स्यादिति वेदविदो विदुः॥

"न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते"

[बृ. उ. ४-४-६] इति श्रुतेः।

अद्वैतनिरतो यत्र स देशः पुण्यवर्धनः।
तद्दर्शनपरा ये तु ते मुक्ताः स्युर्न संशयः॥

1. रा. व बहिर्यजनं विदुः।

अद्वैतनिन्दां कुर्वन्ति ये मूढाः दुःखभागिनः ।
ते सर्वे नरकं यान्ति मातृनिन्दापरा यथा ॥

एवमनेकप्रकारेण बहुशिष्यान् धन्यान् कृत्वा अष्टमे वर्षे प्राप्ते [1]निजग्रामसमीपवाहिन्यां नद्यां ग्राहग्रहवशात् संन्यस्य कालटयाख्यान्निजग्रामान्निर्गत्य श्रीमद्व्याघ्रपुरमागत्य तत्र गोविन्दयोगीन्द्रसदुपदेशात् परमहंसाश्रमस्वीकारं कृतवन्तः श्रीमच्छङ्करभगवत्पादाचार्यसर्वज्ञाः ॥

ननु ब्राह्मणानां ब्रह्मचर्याद्याश्रमचतुष्टयमस्ति, तथा च श्रुतिः—'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहीभूत्वा वनी भवेत् , वनीभूत्वा प्रव्रजेत्' [जा. उ. ४] इति। एतैराश्रमैरेव यथोक्तानुष्ठितैर्मुक्तिर्भवत्येव । एवं क्रममन्तरेण ब्रह्मचर्याश्रमात् परमहंसाश्रमस्वीकारः किमर्थमङ्गीकार्यो भवेदिति, तत्रापि कुटीचकाद्याश्रमानतिक्रम्य परमहंसाश्रमस्वीकारश्चेति च प्राप्ते, ब्रूमः—

ब्रह्मचर्याद्याश्रमेषु यत्र विरागः उत्पन्नः, तदा तदाश्रमादेव प्रव्रजनं युक्तम् , , यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा, अथ पुनरव्रती वा व्रती वा उत्सन्नाग्निको वा अनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्' [जा. उ. ४] इति श्रुतेः। कुटीचकाद्याश्रमाणां परमहंसाश्रमाधिकारिविषयत्वाभावात् भगवद्भिः पूर्णब्रह्मानुसन्धानविचक्षणैः भेदगन्धरहितान्तःकरणैः सर्वज्ञैः परमहंसाश्रम एवाङ्गीकृत इति निरवद्यम् ॥

॥ इत्यनन्तानन्दगिरिकृतौ शङ्करविजये अद्वैतस्वरूपकथनं नाम प्रकरणं तृतीयम् ॥

1 'निजग्राम'त्यत आरभ्य 'श्रीमद्व्याघ्रपुरमागत्य तत्र' इति पर्यन्तो भागः म1, म4, म5, त, रा. मातृकासु वर्तते। म2. मातृकायां परं नास्ति।

॥ ४ ॥

॥ शैवमतनिराकरणम् ॥

द्वे रूपे वासुदेवस्य चरञ्चाचरमेव च ।
चरं संन्यासिनां रूपमचरं प्रतिमादिकम् ॥

इति वचनबलाद्वासुदेवचररूपमास्थाय प्रपञ्चोपास्य इव (वर्तयन्) [सञ्चरन्] 'अथाऽतो ब्रह्मजिज्ञासा' [ब्र. सू. १-१-१] इत्यादिव्याससूत्राणां व्यासमनोवर्तितात्पर्यप्रकाशकमद्वैतभाष्यं कुर्वन्, विश्वजिदिव अष्टदिग्वर्तमाननानामतवादिविजयमारभमाणः, पद्मपाद-हस्तामलक-समित्पाणि-चिद्विलास-ज्ञानकन्द-विष्णुगुप्त-शुद्धकीर्ति-भानुमरीचि-कृष्णदर्शन-बुद्धिवृद्धि-विरञ्चिपाद-शुद्धानन्तानन्दगिरिप्रमुखैः शिष्यवरैस्सेव्यमानः श्रीशङ्कराचार्यः चिदम्बरस्थलात् प्रदक्षिणेन मार्गेण मध्यार्जुनं नाम शिवाविर्भावस्थलविशेषं प्राप।

मध्यार्जुनेशानमदृष्टपूर्वं विध्यादिभिः पूजितपादपद्मम् ।
बुद्ध्योपचारैरभजत् परेशं निध्यायतां मोक्षफलै[1]कमूलम् ॥

तत्र किल भगवान् शङ्कराचार्यः सदाशिवमेवमब्रवीत्—'स्वामिन्, मध्यार्जुनेश! सर्वोपनिषदर्थोऽसि, सर्वज्ञोऽसि, (यदि) निगमादीनां तात्पर्यगोचरो द्वैतनिर्णयः [2]अद्वैतनिर्णयो वा पारमार्थिकः; पश्यतां सर्वेषां जनानां संशयनिवृत्तिं कुरु' इति। एवं प्रार्थितो मध्यार्जुनेशः लिङ्गाग्रात् सावयवरूपेण निष्क्रम्य मेघगंभीरया गिरा दक्षिणहस्तमुद्यम्य 'सत्यमद्वैतम्', 'सत्यमद्वैतम्', 'सत्यमद्वैतम्' इति त्रिरुक्त्वा तस्मिन्नेव लिङ्गेऽन्तर्दधे। पश्यतां नराणां महदद्भुतमासीत्।

1. रा., म2. ०कपात्रम्। 2. म2. मातृकायां 'अद्वैतनिर्णयो वा' इति भागः नास्ति।

तद्भक्ताश्च तदाश्रमस्थमनुजाः तद्ग्रामदेशस्थिताः
शुद्धाद्वैतपरायणाः श्रुतिकथासञ्चोदिताचारगाः ।
कृत्वा सद्गुरुमेव शङ्करवरं तद्बोधितप्राभव-
श्रीमन्त्रोपजपा उमागणपतीशार्काच्युतार्चापराः ॥

प्रातःस्नानविशुद्धाश्च पञ्चयज्ञपरायणाः ।
नित्यकर्म [3]प्रकुर्वाणाः भगवत्प्रीतये[4]ऽनघाः ॥

एवं तद्देशस्थानद्वैतवादिनः कृत्वा प्रमथैः शङ्करः इव शिष्यैः समेतः समुद्र-बन्धनहेतुभूतसेतुसमीपे रामेश्वरं नाम प्रसिद्धस्थलं प्रति जगाम ॥

रामेश्वरं रामकृतप्रतिष्ठं कामेश्वरीभूषितवामभागम् ।
माहेन्द्रनीलो[5]ज्ज्वलदुत्किरीटं भीमेश्वरं [6]त्वामिह पूजयामि ॥

इति [7]गङ्गाजलैश्शुद्धैरर्चयामास शङ्करम् ।
शङ्करः पङ्कजैः पुष्पैरन्यैर्वन्यफलैस्तथा ॥
एवं महादेवमर्चयित्वा मासद्वयं तत्र सुखमास ।

तदानीं किल समागताः—

अद्वैतद्रोहिणः केचिल्लिङ्गाङ्कितभुजद्वयाः ।
केचित्फाले त्रिशूलं च, डमरुं च भुजद्वये ॥

3. म$_2$. ०प्रकुर्वन्निव म० । 4, म$_2$, ०ये नमः । 5. म$_2$ उज्वलकण्ठचिन्हं ।

6. म$_2$. देवमहं भजामि ।

7. पुण्यक्षेत्रेषु देवसन्निधौ परिसरेषु च स्नानतर्पणादिक्रियार्हत्वेन तत्तक्षेत्रमाहात्म्यग्रन्थेषु विहिताः तटाकविशेषाः, कूपविशेषाश्च, तेषु ग्रन्थेषु तद्देशेषु गङ्गा इति व्यवह्रियमाण दृष्टाः, यथा चिदम्बरक्षेत्रे शिवगङ्गा इति अनादिर्व्यवहारः । प्रकृते च रामेश्वरक्षेत्रे सेतुयात्रादिग्रन्थेषु यथोदितं विहिताः कूपविशेषाः, तटाकविशेषाः, समुद्रघट्टविशेषाश्च 'गङ्गा' इति व्यवह्रियन्ते इति श्लिष्टतरम् । तथा च 'गङ्गाजलैः'—तत्क्षेत्रस्थ-पुण्यतीर्थविशेषैः इत्यर्थः—टि.



केचित्फाले लिङ्गचिह्नं, हृदि शूलं तथाऽपरे ।
केचित्फाले भुजद्वन्द्वे हृदि नाभौ च लिङ्गिनः ॥

एवं महेशचिह्नानि धारयित्वा समागताः ।
तेषां भेदं क्रमाद्वक्ष्ये षड्विधानां परस्परम् ॥

भुजद्वये लिङ्गाङ्कधराश्शैवाः । फाले त्रिशूलधारिणो रौद्राः । भुजद्वये डमरुधारिण उग्राः । फाले लिङ्गचिह्नधारिणो भक्ताः । हृदि त्रिशूलं (शिरसिपाषाणलिङ्गञ्च) धारयन्तो जङ्गमाः । ललाटभुजद्वन्द्वहृन्नाभिषु लिङ्गधारिणः पाशुपता इत्युच्यन्ते । ते श्रीशङ्कराचार्यमिदमब्रुवन्— किं भोः संन्यासिन् । तव शिवतत्त्वमशेषदोष[8]निबर्हणहेतुभूतमरुच्यमासीत् । शिवस्य जगत्कारणमूर्तेः पञ्चभूतरूपाणि पञ्चलिङ्गानि सन्ति । त्रिशूलडमरुकौ तेज उत्पन्नौ । रविचन्द्रौ [लिङ्गद्वयम् ] चिद्रूपमेकं लिङ्गम् । एवं लिङ्गाष्टकं भगवतोऽष्टमूर्तयः । अन्तर्लिङ्गबहिर्लिङ्गसंयोजनं कृत्वा चिदचिदैक्यारूढबुद्धिवृत्तिः निन्द्यानिन्द्यादिद्वन्द्वरहितः सर्वं शिवमयमिति शिवाङ्कधारी सन् यः पश्यति, स एव शिवः । तद्धारणमात्रेण तन्मयः, स एव मुक्तः समस्तजनैरुपासनीयः, तस्य ज्ञानमयत्वात् ।

शिवस्यैव जगत्कारणता निर्वचनीया । एवं किल—

" ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः" ॥ [म.ना.उ.१०-१०]

इत्यादिना रुद्रस्य सर्वोत्तमत्वं घटते । ऋतं (अणु) [अवितथ] स्वरूपं, सत्यं [परं] महद्रूपं (परं) ब्रह्म ; एतद्विशेषणचतुष्टययुतं, पुरुषं—पुरीतति मध्ये हृदयकमलकर्णिकायां बहिःप्रदेशे च व्यापकरूपत्वेन शायिनं, कृष्णपिङ्गलं कण्ठे कृष्णवर्णं, जटासु पिङ्गलवर्णं, ऊर्ध्वरेतं ऊर्ध्वरेतसं उर्ध्वमुखरेतसं विरूपाक्षं विरूपाण्यर्केन्दुवन्हिरूपाणि त्रीणि अक्षीणि यस्य तं । विश्वरूपाय—अष्टमूर्ति-

8. म$_2$., त. निवारणहे० ।

त्वेन वा व्यापकत्वेन वा विश्वरूपः तस्मै नमो नम इति। द्वितीयार्धे चतुर्थ्यङ्गीकारः छान्दसः।

द्यौर्मूर्धानं यस्य वेदा वदन्ति खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे।
दिशश्श्रोत्रे वाग्विवृताश्च वेदा मुमुक्षुर्वै शरणमहं प्रपद्ये॥

अस्यायमर्थः—यस्य परमेश्वरस्य मूर्धानं शिरः, द्यौः द्युलोकः स तु मेघमण्डलोपरिप्रदेशात् ब्रह्माण्डकर्परपर्यन्तः, तं वेदाः वदन्ति। द्यौः परमेश्वरस्य मूर्धेत्यर्थः। तस्य नाभिः खं आकाशं, वदन्ति इत्यनुषङ्गः। [वचनव्यत्यासः छान्दसः] चन्द्रसूर्यौ च नेत्रे, चकारदग्निश्चेत्यर्थः। दिशः श्रोत्रे कर्णावित्यर्थः। (वचनव्यत्यासश्छान्दसः।) वाग्विवृताश्च वेदाः यस्य वाङ्मात्रेण विस्तृता वेदाः, चकारेण इतिहासपुराणादिकश्चेत्यर्थः। तं परमात्मानं मुमुक्षुर्वै शरणमहं प्रपद्ये शरणं यामीत्यर्थः। वै शब्देन शरणागतानां मोक्षसिद्धिर्भवति [इति द्योत्यते]। एतादृशं शरणागतमोक्षप्रदं जन्ममरणारण्यदावानलमाश्रित्य तदीयमुद्राधारणसंपादितदृढभक्तिनिरताः शाश्वते शिवलोके वसन्ति। किञ्च, अथर्वशिखायां जगत्कारणानुचिन्तनप्रकरणे—

'कारणन्तु ध्येयस्सर्वैश्वर्यसंपन्नस्सर्वेश्वरश्शम्भुराकाशमध्ये' [अ. शि. ३]
इति शिवस्य जगत्कारणता प्रतिपाद्यते। अथर्वशिरसि देवैः कस्त्वमिति प्रश्ने कृते तदा हृष्टः परमेश्वरः "सोऽब्रवीदहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः" [अ. शि. १ १] इत्यादि। मत्तः व्यतिरिक्तः मदन्यः कश्चिन्नेति भगवदुक्तेः तस्यैव सर्वात्मकत्वं घटते। सदात्मब्रह्मेत्यादयः सामान्यशब्दा अपि तत्परा एव। तेषां जगदुपादानकारणपरत्वात्।

"वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः" इति वचनस्यायमर्थः—इदं जगत् अधिकृत्य अग्रे सृष्टेः प्राक्तनकाले वसत्यस्मिन् प्रपञ्च इति वासुः, वासुश्चासौ देवश्च वासुदेवः। उकारश्छान्दसः। सः परमेश्वरः। तस्य सर्वप्रपञ्चलयकर्तृत्वात्—स एक एवासीत्, जगत् अग्रे स एक एवावर्तत



इत्यर्थः। न ब्रह्मा चतुर्मुखः, न च शङ्करः, शं सुखं जीवनं करोतीति व्युत्पत्तेः, तस्य स्थितिकर्तृत्वात् सर्वप्राणिरक्षणकर्तेत्यर्थः। परमेश्वरस्य कलारूपाणां एकादशरुद्राणां मध्ये शङ्करो विष्णुरिति प्रसिद्धः;। 'रुद्राणां शङ्करश्चास्मि [भ गी. १०-२३] इति श्रीकृष्णवचन (गीता) दर्शनाच्च। प्रलये जगदभावाज्जगद्रक्षकाभावत्वमर्थतः सिद्धमेव, तयोः परमेश्वरेच्छाजातत्वात्, मकारादकारस्य अकारादुकारस्य जनिदर्शनात्।

आनाभेर्ब्रह्मणो रूपमागलाद्वैष्णवं वपुः।
आशीर्षाद्रौद्रमैशानं तदग्रे सर्वतः शिवम्॥

इत्यादिना नृसिंहस्वरूपज्ञानेन शिवपरत्वस्य रूढत्वात्।

शिवरहस्ये रुद्रयामले च दुर्वाससो मुनेरुपदेशकाले वचनानि महादेवस्य—

"अहमेकाक्षरः कर्ता परात्परतरः शिवः।
सदात्मा ब्रह्मविष्णुश्च लोकानामादिकारणम्॥

पुराणः पूर्वगः पूर्वो ज्येष्ठः श्रेष्ठोऽहमद्वयः।
मदिच्छारूपिणी शक्तिर्जगत्संहारकारिणी॥

लुप्ता मय्येव सा सृष्टा पुनस्सृष्टौ मयाऽनघ।
सा महत्तत्वमुत्पाद्य त्रिगुणाङ्कुरकारणम्॥

अहङ्कारं समुत्पाद्य त्रैगुण्यं पूर्वतत्वतः।
गुणत्रयात्मकान् कृत्वा रुद्रानेकादशाव्ययान्॥

राजसान् सृष्टि [कार्यं] (कर्म)श्च कारयामास सादरम्।
सात्विकान् पालनपरान् तामसान् प्रलयेश्वरान्॥

क्रमादवर्णात्सञ्जातानुवर्णाच्च मवर्णतः।
तेषु मुख्यतया ब्रह्मविष्णुरुद्रा इति त्रिधा॥

अन्ये तदनुवृत्तिस्था एवमेकादशेश्वराः।
तेषां विभूतयस्सर्वे देवालोकाश्चराचराः ॥

पृथक् पृथङ्नामयुतास्तत्तत्कर्मानुसारतः ।
ते सर्वे प्रलये ब्रह्मतेजस्येव लयं गताः ॥

राजसे रक्तवर्णे च, स तु ब्रह्मा समस्तकृत् ।
कृष्णे नारायणस्यैव तेजस्यस्तोऽभवत् पुरा ॥

रुद्रस्य शुक्लवर्णे तु ह्यस्तो नारायणः स्वयम् ।
स तु रुद्रः प्रकृत्यन्तर्गतः शुक्लेन तेजसा ॥

मदिच्छा शुक्लवर्णा सा मय्येव विलयं गता ।
अतोऽस्म्यनन्तः सर्वार्थः वेदैरपि न गोचरः ॥

वेत्ति कश्चिन्न मन्मायां जन्मस्थितिलयावहाम् ।
अतो रुद्रार्चनपरा रुद्रसूक्तजपाश्रिताः ॥

पञ्चाक्षरी जपपरा रुद्राक्षाभरणैर्युताः ।
भूतिभूषितसर्वाङ्गास्सदा ध्यानपरायणाः ॥

ईश्वरं रुद्रमव्यक्तं व्यक्तरूपजगल्लये ।
योऽर्चयन्ति नरश्रेष्ठास्तेषां मुक्तिःकरे स्थिता ॥

अतस्त्वं भूतिरुद्राक्षधारणं कुरु सर्वदा ।
कुरु नित्यं महादेवपूजनं भक्तिसंयुतः ॥

दुर्वाससे मुनीन्द्राय ह्येवमुक्त्वा सदाशिवः ।
अन्तर्दधे तदाचारसक्तोऽभून्मुनिसत्तमः ॥

अतो दुर्वासआदिभिः तत्त्वस्वरूपविद्भिरुपासितं [शिवतत्वं] इति निरवद्यम् ॥



(अथर्वशिरसि) नारायणोपनिषदि—'अथ पुरुषो ह वै नारायणोऽकामयत, प्रजास्सृजेयेति, नारायणात् प्राणो जायते, मनस्सर्वेन्द्रियाणि च, खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी, नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रो जायते, नारायणादिन्द्रो जायते, नारायणात् प्रजापतिः प्रजायते, नारायणात् द्वादशादित्याः रुद्रावसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते नारायणात् प्रवर्तन्ते, नारायणे प्रलीयन्ते' [ना. १]।

'अथ नित्यो नारायणः, ब्रह्मा नारायणः, शिवश्च नारायणः, शक्रश्च नारायणः, ऊर्ध्वश्च नारायणः, अधश्च नारायणः, अन्तर्बहिश्च नारायणः, नारायण एवेदं सर्वम् , यद्भूतं यच्च भव्यम् , निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः न द्वितीयोऽस्ति कश्चित् । य एवं वेद' [त्रि. म. ना. २-८] इत्यादि ।

कृत्स्नोपनिषदश्चायमर्थः—नराः—ब्रह्मा प्रथमजीवः सृष्टेःपूर्वमेव जातत्वात्, तत्कृता सृष्टिरिति प्रसिद्धेः, राजसगुणप्रधानो रुद्रः, इन्द्रादयश्चतुर्दशलोकवासिनः प्राणिनः, तेषां समूहो नारं तदेवायनं स्थानं यस्य [सः नारायणः] आत्माकारेण सर्वव्यापकः परमेश्वरः। गिरिनद्यादेराकृतिगणत्वेन उभयत्र विभाषया नस्य णत्वेन नारायण इति रूपं निष्पन्नम् । तस्यैवांशाः सर्वे देवाः ।

'नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषां अन्नं वातो वर्षमिषवस्तेभ्यो दशप्राचीर्दशदक्षिणा दशप्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृढयन्तु तेऽयं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि' [कृ. य. सं. ४-५-११] इत्यादि प्रमाणात् । 'नमो ज्येष्ठाय च कनिष्ठाय च' [कृ. य. सं ४-५-६] इत्यादिना गुणातीतवृत्तौ परमेश्वरे ज्येष्ठत्वमर्थतः सिद्धम् , तस्य सर्वोत्पत्तिकारणत्वात् । कनिष्ठत्वं तु मकारलक्षणे प्रकृतिजाते रुद्रे वर्तते। उकाराकारयोस्तज्जन्यत्वात् तदात्मकत्वं सिद्धम् । 'अतो ब्रह्मविष्णुरुद्रेन्द्राः ते संप्रसूयन्ते' [अ. शि. ३] इति श्रुतेः। कारणकार्ययोः ज्येष्ठकनिष्ठभावो युक्त एव ।

स नारायणोऽकामयत, इच्छां कृतवान्; किमिति, प्रजास्सृजेयेति। तस्मात् खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी अजायन्त, इति। पृथिवी कीदृशीत्युक्ते विश्वस्य प्रपञ्चस्य धारिणीत्यर्थः। तदनु नारायणात् प्राणो जायते मनस्सर्वाणीन्द्रियाणि चेति पाठक्रममन्तरेण। कथमित्युक्ते—

तैत्तिरीये—'एतस्मादात्मन आकाशस्संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्, अन्नात् पुरुषः' [तै. उ. २-१.] इत्यादि श्रूयते। भूतसृष्टिं विना प्राणादिसृष्टेरभावात्, प्राणानां वायुरूपत्वाच्च, 'यः प्राणः स वायु'रिति [ऐ. आ.२-३-३] श्रुतेः।

प्राणादिसृष्टिः भूतसृष्ट्यनन्तरमाच्येव भवितुमर्हति। यद्वा—प्रकृतेर्महान्, महतोऽहंकारः, अहंकारात् पञ्चतन्मात्राणि इति सृष्टिक्रमदर्शनात् अहंकारादेव भूतोत्पत्तिः युक्तैव भाति। तस्य गुणत्रयात्मकत्वात् भूतानामपि तथात्वात्। अतः सगुणाद्रुद्रात् भूतप्रजाप्राणमनोमुख्यसृष्टिरुचिता, कार्यस्य कारणानुरूपत्वात्।

रुद्रविष्णुब्रह्मादिहृदयपुण्डरीकेषु व्यापकरूपेण स्थितस्य आत्मनः सकाशात् भूतादिसृष्टिं केचिदिच्छन्ति—

'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशस्संभूतः। आकाशाद्वायुः' [तै. उ. २-१.] इत्यादि।

एतच्छब्देन यो वा परमेश्वरः स्वयं निर्गुणोऽपि सर्वप्राणिबुद्धिगुहाविहरणशीलः, तस्मात् भूतोत्पत्तिरिति। ब्रह्म भूतोत्पत्त्यनन्तरं सृष्टिं करोमीति बहुकालं विचार्य स्वान्तर्गतमात्मतेजः सूर्याकारेण सृष्टवान्। मन एव चन्द्रं, सत्वमङ्गारकं-वाङ्मयं बुधं, ज्ञानसुखमयं गुरुं, शुक्लमयं शुक्रं, क्लेशमयं शनिं चकार। सूर्यादिगोलान्यपि परमेश्वरेणैव प्रतिभान्ति॥



न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
[1]तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥
[क. उ. ५ १५] इति श्रुतेः॥

तस्मान्नारायणाद्ब्रह्मा जायते। नारायणात् प्रजापतिः प्रजापालनशीलः स्थितिकर्ता विष्णुर्जायते। अन्ये नव रुद्रावसवः सर्वाणि छन्दांसि एतानि सर्वाणि नारायणादेव समुत्पद्यन्ते। तस्य जगत्कारणत्वात् तस्मादेव प्रवर्धन्ते। तस्मिन्, लये लीयन्त इत्यर्थः। 'अथ पुरुषो ह वै नारायणः [ना. १] इत्यादिना तस्य विश्वरूपत्वं प्रतिपादितम्। "निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः' [त्रि. म. ना. १-५] इति जगदतीतस्य परमात्मनो लक्षणमेतत्। कलङ्को नाम पुण्यपापबन्धः, तदभावान्निष्कलङ्कः, अञ्जनं अज्ञानं तदभावान्निरञ्जनः, [2]अयमात्मा अन्यो वा आत्मा इति संशयाभावान्निर्विकल्पः। आख्यातं नामरूपगुणकर्मादि, तदभावान्निराख्यातः। शुद्धः शुक्लः तेजोमयः। 'यच्छुक्लं तद्ब्रह्म, कं ब्रह्म खं ब्रह्मेति'। 'आकाशशरीरं ब्रह्म' [तै. उ. १-६-२].

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते॥
[क. उ. ३-१५]

इत्यादि श्रुतिभ्यः। दीव्यत इति देवः, तेजसः तदन्यत्राभावात्। एकः—'एकमेवाद्वितीयम्', [छा. उ. ६-२-१] 'नेह नानास्ति किञ्चन' [बृ. उ. ४-४-१९] इति श्रुतेः। 'आत्मा वा इदमेक एवाग्र आसीत्', 'एक एव रुद्रो न द्वितीयाय तस्थे' इति च; स नारायणः अद्वितीयः प्रलये द्वितीय (सत्ता) मात्राभावादेक एव भाति, 'एकमेव [तत्परं] ब्रह्म विभाति निर्वाणम्' [ब्र. उ. ३] इति श्रुतेः। महो-

---

1. 'तमेव' इत्यत आरभ्य 'अन्ये रुद्रावसवः' इति पर्यन्तो भागः नास्ति म$_2$ मातृकायाम्।
2. ख. अयमात्मा अस्य भातीति संशयाभावान्निर्विकल्पः।

पनिषदि—'एको ह वै नारायण आसीत्, न ब्रह्मा नेशानः नाग्नीषोमौ नेमे द्यावापृथिवी' [म. उ. १-१] इत्यादि। श्रुतेरयमर्थः—नारायण एक एव तदासीत्, यदा कार्याभावः, स तु प्रलयः। तत्र ब्रह्मविष्णवभावः। ईशानशब्दवाच्यो विष्णुः; एतयोरभावस्य सिद्धत्वात् न अग्नीषोमयोरभावः शङ्कनीयः; नेमे द्यावापृथिवीति सिद्धमेव। एवम्—

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमाऽपरो यत्।
किमावरीवः कुहकस्य शर्मन् अम्भः किमासीद्गहनं गभीरम्॥
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः
[ऋ. वे. ८-७-१७-१, २]

इत्यादि ऋङ्मन्त्राः ईश्वर एव जगल्लयादीन् प्रतिपादयन्ति। अस्यार्थः—असत् अदर्शनयोग्यभूताकाशवायू। तदानीं तादृक् वस्तु च नासीत्। सत्—तेजोऽप्पृथिव्यः तदानीं तादृक् वस्तु च नो आसीत्। रजः—कारणपृथिव्यपि नासीत्। व्योम, कारणमणुरूपं, न अपरः कारणाग्न्युदकवायवः यत् तदपि नासीत्, लिङ्गव्यत्ययः छान्दसः। कुहकस्य ब्रह्मणः आवरीवः आवरणानि महदहङ्कारादीनि सप्त शर्मन् ब्रह्माण्डं च किं आसीत्? किञ्चन नासीदित्यर्थः। तदण्डोपरि विलसितं गहनं दुष्प्रवेशं गभीरं नमितप्रदेशे सान्द्रतया व्याप्तं अंभः तोयं किमासीत्? तदपि नासीदित्यर्थः। मृत्युः सर्वलोकत्रासिप्राणिप्राणहर्ता नासीत्। तर्हि - मृत्युरहितसमये, अमृतं - मृत्युनिबर्हणहेतुभूतं न। अमृतमृत्य्वोः तेजस्तिमिरयोरिव परस्परवैषम्यदर्शनात् विपक्षाभावे सपक्षामात्रस्य श्रेयस्त्वादमृतस्याप्यभाव इत्याह - अमृतं नासीत् इति। कथमित्युक्ते ईश्वरव्यतिरिक्तसर्वाभावस्य प्रलयत्वात् तदभाव उचित एवेत्यर्थः। रात्र्यह्नोः कारणाभावात् कार्याभावः सिद्ध एव।

ननु सर्वाभावे ईश्वरस्याप्यभावः भवतु नाम। एकस्मिन् काले स्वत एव जगदस्तङ्गतं भवति; अन्यस्मिन् काले निजरूपे[1]णोत्थितं भवति।

1. ख. मातृकायां ०णोपस्थितं भ०।



'तद्धेदं तर्हि अव्याकृतमासीत्, तन्नामरूपाभ्यामेव व्याक्रियत' [बृ. उ. १-४-७] इति श्रुतेः अशोकपुष्पविहासादिवत् कालतः प्राप्यते। जगद्बीजं तु जगत्कर्मैव। 'कर्मणा जायते लोकः कर्मणैव विलीयते' इति जैमिनिराचार्यो मन्यते। पापकर्मशीलस्य नरस्य पुण्ययोनिसंभवत्वं ईश्वरेण कथं न कृतम्? कर्मानुकूलं जन्म इति चेत्—कर्मैव स्वमार्गेण जीवं बुद्ध्यादिलिङ्गशरीरसंबन्धं नयति, तस्य घटकत्वाघटकत्वयोः तुल्यसमर्थनत्वात्। अतः कर्मणा जगत्युत्पद्यमाने किमन्तर्घटकेन ईश्वरेण इति प्राप्ते, ब्रूमः—

तत्सूक्ते—

'एकं सन्तं बहुधा कल्पयन्ति', [इति]। बहुधा नानाप्रकारैः सर्वाभावे प्रलये सन्तं वसन्तं परमात्मानं एकमद्वितीयं कल्पयन्ति वेदाः, स्वयमेव जगज्जन्मादिकारणं ब्रह्म निरुपाधिकं वर्तत एवेत्यर्थः।

शाखान्तरे तैत्तिरीये—

'असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुरिति' [तै. उ. २-६] [इति]। ब्रह्म असत् असत्यं अप्रमाणं चेद्वेद सः असन्नेव भवति असन् नास्तिको भवति। ब्रह्म बृहत्वात् व्यापकत्वाच्च, तथाप्रसिद्धं शुद्धबुद्धमुक्तस्वरूपं ब्रह्म अस्तीति वेद चेत् - वेदितुः फलमाह - 'सन्तमेनं ततो विदु'रिति।

एवं ईश्वरसद्भावे प्रमाणसहस्रस्थित्या तस्य मनोवागतीतत्वेन दुःसाध्यत्वात् तदिच्छासंभूतमकारप्रधानसगुणरुद्रस्योपासनं तच्चिह्नाङ्कनं च युक्तमेव॥

एवं प्राप्ते प्राहुराचार्याः—भो! तप्तलिङ्गाङ्कितभुजद्वय, विद्वेषवीरनामक। सत्यमुक्तं भवता - 'ऋतं सत्यं परं ब्रह्म' इत्यादयः भवदुक्ताः सर्वाः श्रुतयः परमेश्वरं ब्रह्मांशेन सृष्टिं कुर्वाणं, विष्ण्वंशेन पालनं कुर्वाणं, रुद्रांशेन लयं कुर्वाणं, शुद्धमद्वैतरूपमव्ययमनादिमद्वयं ब्रह्म प्रशंसन्ति। ताः भवता व्याख्याताः, मयापि

च व्याख्याताः। तात्पर्यस्यैकरूपत्वात्। किञ्च, एतावन्मात्रं विरुद्धमप्रमाणमस्ति तप्तलिङ्गाद्यङ्कनं धारयितव्यमिति, तद्धारणबीजश्रुत्यादिप्रमाणाभावात्। निष्प्रमाणत्वेनैव ब्राह्मणोचितवेदोक्तगर्भाधानादिसद्धर्मसंस्कृतस्य शरीरस्य निर्मूलतप्तता कथं श्रेयःपरंपराजनिका भविष्यति। परन्तु प्रत्यवायदात्र्येव। कथम्? उक्तं च ब्रह्मयामले—

नाभेरूर्ध्वं सोमपास्तु नाभ्यधश्चाप्यसोमपाः।
देवास्तिष्ठन्ति विप्रेन्द्रे वेदवेदान्तपारगे॥
शिखां शिरो ललाटं च कर्णौ घ्राणं कपोलकम्।
वक्त्रं जिह्वां तथा चोष्ठौ चिबुकं कण्ठमेव च॥
अंसद्वयं भुजद्वन्द्वं बाहू हस्तयुगं तथा।
वक्षो नाभिः कटिर्लिङ्गं वृषणं चोरुजानुकम्॥
गुल्फौ पादौ समाश्रित्य मदाद्यास्सर्वदेवताः।
पितरो ऋषयश्चैव, स्नानाद्यान्हिकमिश्रितैः॥
नित्यकर्मादिभिस्तृप्ताः भवामो नात्र संशयः।

इति ब्रह्मारुणकेतुसंवादः।

श्रुतिश्च—

“यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति” [तै. आ. २-१५] इति।

तस्मात् तथाविधतनोर्जीवनदशायां कृते तापे देवाः पलायन्ते, तप्तायस्सान्निध्यात् मनुष्या इव—

एनं शप्त्वा पलायन्ते देवाः शीर्षादिवासिनः।
पतितोऽयं भवत्येव शूद्रवच्चितिकाष्ठवत्॥



व्याधिं विना कर्मयोग्ये विप्राङ्गे चिह्नमीक्ष्य च।
लोकेश्वरं भानुमीक्षेदथवा ह्रदमाविशेत्॥

इत्यादि बहुवचनानि प्रमाणानि सन्ति।

श्रुतावपि—‘अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न वेद यथा पशुः’ [बृ. उ. १-४-१०] इति। असावेव देवता अन्या सर्वज्ञा सच्चिदानन्दादिलक्षणसंपन्ना (देवतोपासनद्वारा) किञ्चिज्ज्ञत्वादिगुणविशिष्टोऽहमन्योस्मीति स पुमान्न वेद ज्ञानसंपन्नो न स्यादित्यर्थः। उक्तार्थं दृष्टान्तेन दृढयति—यथा पशुरिति, पशुः यथा विवेकज्ञानशून्यः तथैवेत्यर्थः।

‘परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन’ [मु. उ. १-२-१२]

इत्यादि मुण्डकोपनिषदुपदेशवशात् ब्राह्मणः कर्मचितान् कर्मणा संपादितान् अनित्यान् लोकान् दृष्ट्वा निर्वेदमायात्—अकृतो मोक्षः कर्मणा नास्ति इति। तस्मात् मोक्षप्राप्तये—

‘तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्’ [मु. उ. १-२-१२],

इत्यादिना गुरुमभिव्रजेत्। सद्गुरूपदेशेनैव ब्रह्मलक्षणाभिज्ञः सर्वाशुभ—कर्मनिर्मूलनपरः संसारार्णवमतिक्रम्य सर्वास्ववस्थासु आत्मानं ध्यात्वा मुक्तो भवति [इति निश्चीयते]। न बहिश्चिन्हिततप्ताङ्गादिना प्रयोजनं चर्महानिव्यतिरिक्तमस्ति। ज्ञानतेजोनिरस्ताऽऽन्तराज्ञानान्धकारस्यैव मुक्तिदर्शनात्। केवलरुद्रोपासनायाः पुण्यलोकप्राप्तिरेव फलम्, न मुक्तिः; तस्यास्तु जीवेशैक्यानुसन्धानभावनालभ्यत्वम्॥

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥
[क. उ. २-१२] इति।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम् ॥

[क. उ. २-२३] इति ।

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥

[क. उ. २-२२] इति च ।

तस्माद्गुरुकटाक्षागतशुद्धाद्वैतविद्यामाश्रित्य अभेदकल्पत[1]रुरसपानेन तृप्तो भव इति श्रीमच्छ्रिराचार्यैः उक्तः विद्वेषवीरनामको लिङ्गभृदग्रणीः इदमाह—

स्वामिन् त्वमेव शरणं मम सर्वदाऽसि
संसारसर्पविष[2]दग्धतनुं नयाशु ।
मामद्य युष्मदतिनिर्मलवेदवाक्यै-
र्नष्टा भिदाऽस्मि शिव एव, जगत्पिताऽसि ॥
महादेवार्चनफलं गुरो ! त्वमसि सत्तम ।
अद्वैतामृतदानात्त्वं रुद्रादप्युत्तमोत्तमः ॥

इति यतिशिरोमणिं स्तुतिपात्रं मुहुर्मुहुर्नत्वा तदीयचरणोदकं (पानं) तद्भक्ताचार-लक्षणं शिरसा परिगृह्य स्वकुलग्रामदेशस्थान् सर्वानप्यद्वैतवर्तिनः कृत्वा श्रीमत्पर-महंसाचार्यगुरुमभिवाद्य सुखमास ॥

॥ इत्यनन्तानन्दगिरिकृतौ शैवमतनिबर्हणं नाम प्रकरणं चतुर्थम् ॥

1. म$_2$. ०रुफलरसाच्छापनेन तृ० ।
2. म$_2$. ०दष्टत०, रा. ०दुष्टविषतनुं च पापम् ।

॥ ५ ॥

## शैवैकदेशमतनिराकरणम्

एवं लिङ्गादिधारणकारणे शिवमते निरस्तेऽप्याराध्याः केचन पीठार्चन निरताः प्राणलिङ्गधारिणो निरवशेषभक्षकाः फाले तप्तलिङ्गधारिणः शुभ्रविभूति भूषितसर्वाङ्गाः शिरःकण्ठबाहुषु सहस्रपरिमितरुद्राक्षमालिकाभूषिताः प्रतिपक्ष चण्डभैरव-विपक्षशूल-भक्ताग्रगण्य-परमतकालानलादयः श्रीशङ्कराचार्यं दृष्ट्वा इदमूचुः—

कस्त्वं संन्यासिन् । मायावेषधारीव समागत्य [1]षड्विधशैवाचारं सकल वेदप्रमाणं परित्यज्य विद्वेषवीरादीन् मतभ्रष्टान् कृत्वा गन्तुमायत्तो भवसि [2]प्रतिपक्षचण्डभैरवं आराध्यमतपद्मभास्करं मां विद्धि । किं शैवे न्यूनताऽस्ति "ब्राह्मण्यादुत्तमं प्रोक्तं वैष्णवं मुनिसत्तम। वैष्णवादधिकं शैवम्" इत्यादिन नारदं प्रति ब्रह्मोक्तेः शैवमतस्य श्रेष्ठत्वं दर्शितम् । तादृशमुत्तमोत्तममतं परिहर [3]ब्राह्मणस्य निपतनं वृक्षाग्रमारूढस्य पुरुषस्याधःपतनमिव प्रतिभाति । ब्राह्मण्य मूलाद्वैष्ण[4]वमतशाखामालम्ब्य शैवाग्रं गतस्य आरूढपतनं किमर्थं भवद्भि कृतम् । मताधिदेवस्य रुद्रस्य परमत्वं नास्तीति यदि, उच्यते तत्परमत्वं 'नमस्त रुद्र मन्यव उतोऽत इषवे नमः । नमस्तेऽस्तु धन्वने बाहुभ्यामुत ते नमः [कृ.य. सं. ४-५-१] इत्यादि शतरुद्रमन्त्रेषु । वेदपुरुषोऽपि रुद्रस्तुत्यर्थमु पक्रम्य तत्स्वरूपस्यातिरौद्रत्वात् सर्वोत्तमत्वाच्च वेपमानशरीरः चिरं तूष्णी स्थित्वा स्वापराधनिवृत्तये प्रतिपदं नमस्कारपुरःसरमेव स्तुतिमकरोत् हे रुद्र ! ते तव मन्यवे कोपाय चतुर्दशभुवनलयहेतुभूताय नमः । उत

1. म$_2$. षड्विधमाचारं ।
2 रा. विपक्षचण्डभैरवं 3. म$_2$., रा ब्रह्मण्येव नि. 4. म$_2$, रा. वशाखामा० ।

तदनन्तरं ते तव लयहेतवे इषवे बाणाय नमः । हे रुद्र ! ते तव धन्वने चापाय नमोऽस्तु । ते बाहुभ्यां पाशुपतपिनाकधारिभ्यां नमः, इत्यादिमन्त्रेषु प्रतिपदं बहुधा देवं नत्वा निवृत्तापराधोऽभूत् । 'उतामृतत्वस्येशानः' [तै. आ. ३-१२] इति पुरुषसूक्तमध्यवर्तिना मन्त्रवरेण धर्मार्थकाममोक्षचतुर्विधपुरुषार्थमध्ये मोक्षरूपपुरुषार्थस्य श्रेष्ठत्वात् , तस्य ईशानः रुद्रः कर्ता इत्यनेन शिवस्य सर्वोत्तमत्वम् [प्रतिपाद्यते] । किञ्च, [1]पुरुषसूक्तस्य ऋषिर्नारायणः, पुरुषो देवता; पुरुषः रुद्र एव । तस्य सहस्रशीर्षत्वं, सहस्राक्षत्वं, सहस्रपात्त्वं, सिद्धमेव ; 'नमः सहस्राक्षाय च शतधन्वने च' [कृ. य. सं. ४-५-५] इत्यादि बहुश्रुतिभ्यः ।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुतविश्वतस्पात् ।
संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः ॥

[श्वे. उ. ३-३]

इत्यादिश्रुतेश्च । इदमिदानीं चोद्यम् ।

' सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥' [म. ना. ९-१]

इत्यादिना [2]सहस्रशीर्षादिसाम्यात् सूक्तं नारायणपरमिति चेन्न - उपसंहारविरोधात् । उपक्रमस्य दौर्बल्ये उपसंहारवशादुपक्रमनयनस्य मीमांसासिद्धत्वात् । (प्रथमशाखाब्राह्मणे शतपथे) श्वेताश्वतरोपनिषदि पुरुष(सूक्त)मुक्त्वा उपसंहार एवं क्रियते—

ततो यदुत्तरतरं तदरूपमनामयम् ।
य एवं विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति ॥

[श्वे. उ. ३-१०]

1. रा. सूक्तस्य अधिदेवता रुद्रः, ऋषि० । म2. सूक्तस्य अधिदैवं रुद्रः, ऋषि० ।
2. रा. सहस्रशीर्षमित्यादिना सहस्र० ।



सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः

[श्वे. उ. ३-११] इति ।

एवं उपक्रमोपसंहारयोरेकत्वात् एकवाक्यता स्यात् । 'सहस्रशीर्षा पुरुषः' [तै. आ. ३-१२] इत्यनेनार्थेन 'सर्वाननशीरोग्रीवः' [श्वे. उ. ३-११] इति प्रतिपादितस्यार्थस्यानु[गत](कूल)त्वात् । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, अहोरात्रे पार्श्वे' [तै. आ. ३-१३-१,२] इति वाक्यद्वयेन प्रतिपादितः शिव एव । ह्रीः गङ्गा, लक्ष्मीः पार्वतीत्यर्थः, तत्पतित्वं रुद्रस्य घटते ।

उक्तं च स्कान्दे—

हिमाद्रेरपतन्मौलौ गङ्गा रुद्रस्य वेगतः ।
तदीयभारसंभ्रान्तो ह्यवादीत्तां सदाशिवः ॥

ह्रीमती भव नात्युच्चैर्वर्तस्व प्राप्य मामिह ।
पुरुषं पुरुषश्रेष्ठं ब्रह्मविष्ण्वादिकारणम् ॥

सा तं नत्वा महादेवं तदाप्रभृति भक्तितः ।
ह्रिया जटासु मिलिता ह्रीरिति प्रोच्यते बुधैः ॥

रुद्रयामले—

तस्याङ्क[1]मश्चमारूढा शक्तिर्माहेश्वरी परा ।
महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा[2] ॥

तस्यास्तेजःकणाज्जाता लक्ष्मीवाक्कोटयः पुरा ।
शिवतेजस्समुद्भूता हरिब्रह्मादिकोटयः ॥

क्षीयन्ते पुनरेवैते तत्र तत्र लयानुगाः ॥

1. रा. मण्डलारूढा
2. 'इत्यविरुद्धम्' इति अधिकः पाठः रा. मातृकायाम् ।

इति गङ्गालक्ष्मीपतित्वं शिवस्यासाधारणमिति (प्रसिद्धम्) [अविरुद्धम्]। 'अहोरात्रे पार्श्वे' [तै· आ· ३-१३-२] इति उत्तरवाक्ये—अहश्च रात्रिश्च अहोरात्रम्, क्लीबत्वं छान्दसम्। [1]अहोरात्रपार्श्वत्वञ्च रुद्रस्यैव। दक्षिणपार्श्वस्य शुद्धस्फटिकसङ्काशत्वात् अहोरूपपार्श्वत्वम्। वामपार्श्वस्य देवीभागत्वेन श्यामवर्णत्वात्, रात्रिरूपपार्श्वत्वं च रुद्रस्यासाधारणमेव। अतः सूक्तस्य शिवपरत्वेन शिवस्यैव जगत्कारणत्वात् सर्वापेक्षया तन्मतस्य प्राबल्यं प्राप्तम्।

अथर्वशिरसि भगवता परमेश्वरेण देवान् प्रति स्वस्य सर्वात्मकत्वं प्रतिपादितम्—"सोऽहं विद्याऽविद्योऽहं, प्राश्वः प्रत्यश्चोऽहं, दक्षिणाश्चोदश्चोऽहं, अधश्चोर्ध्वश्च दिशश्च विदिशश्चाहम्, पुमानपुमान् स्त्रियश्चाहं, सावित्र्यहं, गायत्र्यहं, त्रिष्टुप्जगत्यनुष्टुप् चाहं, छन्दोऽहं, गार्हपत्योऽहं, दक्षिणाग्निराहवनीयोऽहं, सत्योऽहं, गौरहं, गौर्यहं, ज्येष्ठोऽहं, श्रेष्ठोऽहं, वरिष्ठोऽहं, आपोऽहं, ऋग्यजुस्सामाथर्वाङ्गिरसोऽहं, अक्षरमहं, गुह्योऽहं, गोप्योऽहं, अरण्योऽहं, पुष्करमहं, पवित्रमहं, अग्रश्च मध्यश्च बहिश्च पुरस्तात् दशसु दिक्ष्ववस्थितमनवस्थितञ्च ज्योतिरित्यहमेव सर्वे मां यो वेद" इत्यादिना भगवतो विश्वरूपत्वं प्रदर्शितं व्यापकचैतन्यस्य रुद्रस्यैव। रुत्या स्वशक्त्या लोकान् द्रावयतीति रुद्रः। ब्रह्मादि प्रलयकर्ता इत्यर्थः।

अत एवोक्तं शिवरहस्ये—

ध्येयत्वे तव साक्षिणो मुनिगणा ज्ञानप्रदत्वे शुको
वन्द्यत्वे निगमाः स्वभक्तविमताक्रान्तौ कृतान्तादयः।
नित्यत्वे भगवत्पितामहशिरस्स्रग्वृन्दं आद्यन्तयोः।
शून्यत्वे च वराहहंसवपुषौ पद्माक्षपद्मासनौ॥

1. रा. पार्श्वे अहश्च रात्रिश्च अहोरात्रे यस्य, अहो०



इत्यादिप्रमाणैः शिवस्य सर्वात्मकत्वम्, हरिब्रह्मादिकर्तृत्वञ्च घटते। तस्माल्लिङ्ग-रुद्राक्षविभूत्यादिधारणात् पीठार्चनया रुद्राध्यायजपेन च सर्वपापविनिर्मुक्तः शिवसायुज्यं प्राप्नोतीति निरवद्यम्।

उक्तं च—

स्तेयं कृत्वा गुरुदारांश्च गत्वा
सुरां पीत्वा ब्रह्महत्यां च कृत्वा।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते सर्वपापैः॥

कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते।
बहुनात्र किमुक्तेन यस्य भक्तिः शिवे दृढा॥

महापापोपपापादिकोटिग्रस्तोऽपि मुच्यते॥

इति शिवगीता[1]दृढोक्तेः। पुनरपि शिवगीतासु मुनीन् प्रति सूत इदमाह—

धर्मार्थकाममोक्षाणां पारं यास्यथ येन वै।
मुनयस्तत् प्रवक्ष्यामि व्रतं पाशुपताभिधम्॥

कृत्वा तु विरजां दीक्षां भूतिरुद्राक्षधारणम्।
जपंस्तु वेदसाराख्यं शिवनामसहस्रकम्॥

सन्त्यज्य तेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ।
ततः प्रसन्नो भगवान् शङ्करो लोकशङ्करः॥

भवतां दृश्यतामेत्य कैवल्यं वः प्रदास्यति॥ इति।

तत्र विपक्षशूल इदमुवाच—तैत्तिरीये नारायणोपनिषदि—

'कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे वोचेम शन्तमँहृदे'।

[म. ना. उ. १०-११]

1. रा. दृढोक्तेः

सर्वोह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु ॥

पुरुषो वै रुद्रस्सन्महो नमो नमः । [म. ना. उ. १०-११]

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानश्च यत् ।

सर्वोह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु ।' [म. ना. उ. १०-११]

इत्यादिना उक्तं रुद्रस्य सर्वात्मकत्वं सर्वान्तर्यामित्वं सर्वोत्कृष्टत्वं च घटते । यत्र यत्र सदात्मब्रह्मपुरुषसाधारणवचनात्मकसूक्तानि वर्तन्ते, तानि सर्वाणि [1]शिवपराण्येव । "ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तुसदाशिवोम्" [तै. आ. १०-२१] इत्यादिना तस्य सर्वाधिपतित्वनियमात् । रुद्राङ्कनार्चनादिना धर्मार्थकामादिपुरुषार्थस्य वेद्यमानत्वात् न च [2]रुद्राङ्कधारणादिकं अयुक्तमि[3]ति [भ्रमितव्यम्]

किञ्च, कैवल्योपनिषदि दहरोपासनामुपदिशति—

हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ।

अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥

तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ।

[कै. उ. ६]

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥

ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ।

[कै. उ ७]

स ब्रह्म सशिवस्सहरिस्सेन्द्रस्सोऽक्षरः परमःस्वराट् ।

स एव विष्णुस्स प्राणः स कालोऽग्निस्सचन्द्रमाः ॥ [कै. उ. ८]

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।

ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ [कै. उ. ९]

---

1. रा शिवोत्कृष्टपराण्येव ।
2. रा. रुद्राक्षधा०
3. रा., म2. ०ति भवद्भिः केन निवारितः ।



इत्यादि कृत्स्नोपनिषदा हृदयपुण्डरीकान्तर्वर्तिनः उमासहायस्य त्रिलोचनस्य नीलकण्ठस्य ब्रह्मादि सर्वदेवमयस्य ध्यानात् न पुनर्योनिं गच्छन्ति । मुक्त्यनन्तरं पुनर्योनिप्राप्तेरभावात् । एवञ्च महादेवस्योत्कृष्टत्वात् उमासहायादिलक्षणाश्रितस्य लयस्वामिनो रुद्रस्यैव उपासनया मोक्षसिद्धिरिति फलितार्थः । श्रुतेः अतथाकर्तुमशक्यत्वात् । उपासकस्य विभूत्यादिचिन्हं युक्तमेव । ब्राह्मणेनावश्यं विभूतिधारणं कर्तव्यमिति कालाग्निरुद्रोपनिषदि समाम्नातम् ।

"अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ । अधीहि भगवन् त्रिपुण्ड्रविधिं सतत्त्वम्, किं द्रव्यं, कियत्स्थानं, कतिप्रमाणं, का रेखा, के मन्त्राः, का शक्तिः, किं दैवतं, कः कर्ता, किं फलमिति च । तं होवाच भगवान् कालाग्निरुद्रः यद्द्रव्यं तदाग्नेयं भस्म सद्योजातादि पञ्चब्रह्ममन्त्रैः परिगृह्य अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्मेत्यनेनाभिमन्त्र्य 'मानस्तोक' [कृ. य. सं. ४-५-१०] इति समुद्धृत्य 'मानो महान्त' [कृ. य. सं. ४-५-१०] मिति जलेन संसृज्य त्रियायुषमिति शिरोललाटवक्षःस्कन्धेषु त्रियायुषैस्त्रयम्बकैस्त्रिशक्तिभिः तिर्यक्तिस्रो रेखाः प्रकुर्वीत व्रतमेतच्छाम्भवं सर्वेषु वेदेषु वेदवादिभिरुक्तं भवति, तस्मात् तत्समाचरेन्मुमुक्षुः न पुनर्भवाय ॥

अथ सनत्कुमारः पप्रच्छ प्रमाणमस्य त्रिपुण्ड्रधारणस्य—त्रिधा रेखा भवत्याललाटादाचक्षुषोरामूर्ध्नोराभ्रुवोर्मध्यतश्च याऽस्य प्रथमा रेखा सा गार्हपत्यश्चाकारः रजः भूर्लोकः स्वात्मा क्रियाशक्तिः ऋग्वेदः प्रातस्सवनं महेश्वरो देवतेति, याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा च इच्छाशक्तिः यजुर्वेदो माध्यंदिनं सवनं सदाशिवो देवतेति, याऽस्य तृतीया रेखा साहवनीयो मकारः तमो द्यौर्लोकः परमात्मा ज्ञानशक्तिः सामवेदः तृतीयं सवनं महादेवो देवतेति; एवं त्रिपुण्ड्रविधिं भस्मना करोति यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स महापातकोपपातकेभ्यः पूतो भवति, स सर्वेषु तीर्थेषु स्नातो भवति स सर्वान् वेदानधीतो भवति स सर्वान् देवाञ्ज्ञातो भवति, स सततं सकलरुद्र-

मन्त्रजापी भवति स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा शिवसायुज्यमेति न स पुनरावर्तते न स पुनरावर्तते इत्याह भगवान् कालाग्निरुद्रः; यस्त्वेतद्वाऽधीते सोऽप्येवमेव भवतीत्यों सत्यमित्युपनिषत्" [का. रु. उ.]

इति कृत्स्नोपनिषदि त्रिपुण्ड्रस्य सर्वदेववेदकालात्मकत्वं मोक्षप्रदत्वञ्च प्रतिपादितम्। अतो विभूतिधारणमहिमा वक्तुं न शक्यते केनापि। तस्मात् ब्रह्मचार्यादिभिराश्रमिभिः सर्वैरपि त्रिपुण्ड्रधारणमेवावश्यं कर्तव्यम्। एवं रुद्राक्ष-लिङ्गधारणस्यापि प्रमाणसद्भावः अस्त्येव—

शीर्षे कण्ठे कर्णयोश्च बाह्वो रुद्राक्षधारणात्।
नीलकण्ठो भवेन्मर्त्यो ब्राह्मणश्चेत् परात्परः॥

इति अगस्त्यसंहितायामुक्तम्।

"अतप्ततनूर्न तदामो अश्नुते" [ऋ. सं. ७-३-८] इत्यादि प्रमाणेन तप्त-तनोरेव फलश्रवणात् लिङ्गाङ्कनमवश्यं कर्तव्यमिति—

एवं प्राप्ते श्रीशङ्कराचार्यैः इदमुच्यते—तप्तलिङ्गादिधारणं द्विजातिभिर्न-कर्तव्यम्, प्रमाणाभावात्। "अतप्ततनूः" [ऋ. स. ७-३-८] इत्यादि श्रुतेरर्थ-स्तावदेवं वक्तव्यम्—नाग्निना तापो विवक्षितः, किन्तु तपसैव, ब्राह्मणस्य तपः कृच्छ्रचान्द्रायणादिकम्, तादृशेन तपसा तापो निर्दिष्टः; 'कृच्छ्रचान्द्रायणैः कृश' इत्युक्तत्वात्, आर्षविरोधाच्च।

तदुक्तं बृहन्नारदीये—

लिङ्गाङ्किततनुं दृष्ट्वा राजन्! चक्राङ्कितं तथा।
स्नानमेव सदा कार्यमथवा सूर्यमीक्षयेत्॥

पतितं तप्तलिङ्गाढ्यं चक्राङ्कितमथापि वा।
वाङ्मात्रेणापि नार्चेत पाषण्डाचारतत्परम्॥



शूद्रवत् स परित्याज्यो जीवच्छवसमाकृतिः।
तस्मै दत्तं च हव्यं च कव्यं चापि वृथा भवेत्॥

तद्दर्शनात् परित्याज्यमन्नं मन्त्राभिमन्त्रितम्।
अपि, शूद्रेक्षणाद्भुञ्जेत् लिङ्गचक्राङ्किनं विना॥

अपि चेन्निगमाचाररतो वेदान्ततत्परः।
लिङ्गचक्राङ्कमात्रेण स सद्यः पतितो भवेत्।

मार्कण्डेयपुराणे—

"ब्राह्मणानाञ्च गायत्र्याः संवादोऽभून्महान् पुरा।
अतस्तया हि संशप्ताः पाषण्डाश्च ईशदेवताः॥

वेदोक्तकर्महीनाश्च तान्त्रिकाचारतत्पराः।
यूयं कलौ भवन्त्वेवमिति तानाह सा रुषा॥

अतः कलियुगे प्राप्ते भविष्यन्ति द्विजाधमाः।
वेदार्थहीनाः पाषण्डाः लिङ्गचक्रादिचिन्हिताः॥

ज्ञानकर्मपथाद्भ्रष्टाः कामक्रोधादिपीडिताः।
दुरात्मानः सत्यधर्मवर्जिताः शापभागिनः॥

कलौ त्रिंशत्सहस्राब्दे पूर्णे नष्टा भवन्ति ते।
निःशेषतां गताः पश्चादद्वैतार्थानुचिन्तकाः॥

सत्यधर्मपरा भूयो भविष्यन्ति न संशयः॥"

तस्मादङ्कनमयुक्तम्।

भवदुक्तोपनिषत्तात्पर्यन्तु—'सत्यं ज्ञानमनन्तं ब्रह्म' [तै. उ. २-१-१]; 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' [तै. उ. २-४-५]; इत्यादिना [उक्तस्य] (तस्य) दुराराध्यत्वात्, उमासहायादिधर्मयुक्तस्य रुद्रस्यैव उपासन-

यापि मोक्षोऽस्त्येव । तस्य परब्रह्मावतारत्वात् तत्प्रीतये विभूतिरुद्राक्षधारणमवश्यं कर्तव्यमेव । किन्तु, लिङ्गत्रिशूलडमरुगधारणं निर्मूलत्वान्नाङ्गीकर्तव्यमिति सिद्धान्तः ।

एवं परिहृतयोः शैवमतैकदेशिनोः पुनरन्यः शाखान्तरमन्त्रेण प्रत्यवतिष्ठते भक्ताग्रगण्य इति—"तेषामसुराणां तिस्रः पुरः आसन्नयस्मय्यवमाऽथ रजताऽथ हरिणी ता देवा जेतु नाशक्नुवन् ता उपसदैवाजिगीषन् तस्मादाहुः यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुं समस्कुर्वताग्निमनीकं सोमं शल्यं विष्णुं तेजनं तेऽब्रुवन् क इमामसिष्यतीति । रुद्र इत्यब्रुवन् रुद्रो वै क्रूरः सोऽस्यत्विति, सोऽब्रवीत् वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्मात् रुद्रः पशूनामधिपतिः तां रुद्रोऽवासृजत, स तिस्रः पुरो भित्वैभ्यो लोकेभ्योऽसुरान् प्राणुदत यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्यै नान्यामाहुतीं पुरस्ताज्जुहुत्याग्न्यामाहुतिं पुरस्ताज्जुहुयात्" [तै. सं. ६-२-३ (१५-१६)]

पुरा राक्षसानां मध्ये तिस्रः पुर आसन् । अयोमयं रजतमयं [1]हिरण्यं च । पुरनामकान् ‑नमय-सोमय-पूर्ण-नामकान् त्रीन् राक्षसान जेतुं देवा अप्यसमर्था बभूवुः । ततः ते देवा इषुं समस्कुर्वत । त्रिदेवात्मिकां इषुं संस्कुर्वन्तः इषुमूलेऽग्निदेवात्मिकां मध्ये चन्द्रदेवात्मिकां अग्रे विष्णुदेवात्मिकां कल्पयामासुरित्यर्थः । ततः ते देवा अब्रुवन् । क इमामसिष्यतीति, क एनां धारयति, अग्निसोमविष्णुतेजः कूटात्मकत्वेन अत्यन्तभारत्वात् जगल्लय-तेजोरूपत्वाच्च । [2]एतादृक् स्वहस्तेन धृत्वा को वा पुरुषः प्रयुनक्ति, इति विचार्य रुद्र इत्यब्रुवन् । यतो रुद्रः क्रूरः किल वै । अतः एनां धर्तुं स एव समर्थः । यतो रुद्रस्य अग्न्यादितेजस्सर्वं स्वकीयम् । एतत् कथमित्युक्ते तावदग्नि-चन्द्रौ भगवतो नेत्रे । विष्णुः तदीयदेहात् सात्त्विकांशात् संभूतः । अतः स्वतेजः

1. रा. हेममयं च
2. रा. एतादृशी पुरेषु स्व०



तस्य भारो न भवति इति रुद्रं प्रार्थयामासुः । 'सोऽब्रवीद्वरं वृणै'—भवद्भ्यो ब्रह्मादिभ्यो वरमिच्छामि इत्यर्थः । किमिति । 'अहमेव पशूनामधिपतिरसानी'ति । एवं रुद्रेणोक्ता अब्रुवन्—'रुद्रः पशूनामधिपति'रिति । तस्माद्रुद्रः पशूनामधिपतिः, वयं ब्रह्मादयः सर्वे देवाः पशवः ; अस्माकं त्वमेक एव पतिरित्युक्त्वा तदीय-लिङ्गत्रिशूलादिचिन्हानि सर्वे धारयामासुः । [1]पशूनां ब्रह्मादीनां स्वामी पशुपतिः तस्मै नमः इति नमकेऽपि प्रतिपादितत्वात् । तस्मात् ब्रह्मनारायणादिभिः सर्वैरुपास्यः स्वामीत्यर्थः । अतः सर्वे देवाः लिङ्गत्रिशूलधारिणः विभूतिरुद्राक्षा-लङ्कृतदेहिनः शुद्धस्फटिकाक्षमालिकाबद्धकराः पञ्चाक्षरीमन्त्रराजोच्चारण-चलदधरोष्ठाः ईषन्नम्रशिरस्काः परमेश्वरपादारविन्दयुगलं निजकिरीटैरर्चयन्तः भक्ताग्रगण्या बभूवुः । अतो निजलिङ्गत्रिशूलविभूतिरुद्राक्षादिधारणपरान् ब्रह्मादीन् [2]प्रमथोत्कृष्टभक्तान् दृष्ट्वा तद्रक्षणाय पुरशिक्षणाय च मेरुगिरिं धनुः, ज्यां अहिराजं, भूमिं रथं, चन्द्रसूर्यात्मकं चक्रद्वयं, वेदानश्वान्, ब्रह्माणं सारथिं च कृत्वा वन्द्यादिभिरिव देवैः संस्तूयमानः परमेश्वरः तामिषुमवासृजत—पुरोपरि मुमोच । स इषुः पुरं भित्वा मृत्युञ्जयस्य निषङ्गान्तरं प्राप । तस्मात् पुरहरस्य लिङ्गादिचिन्हानि देवैरपि धृतानि । तेषां मुख्यतया शिवभक्तत्वात् पशुत्वाच्च पशुपतिचिन्हधारणं युक्तमेव, लोके सेव्यसेवकयोः तथा दर्शनाच्च । तस्मात् शिवभक्तैः अस्माभिश्च तदङ्कधारणमवश्यमङ्गीकर्तव्यमिति प्राप्ते, आहुराचार्याः—

त्रिपुरसंहार[3]कारिरुद्रभक्तानां देवानां लिङ्गाद्यङ्कनमनुपपन्नम्, कुतः? तथाविधप्रमाणाभावात् । नारदादिमुनिषु च विभूतिरुद्राक्षस्फटिकधारणे विद्यमानेऽपि लिङ्गाङ्कनाभाव एव (प्रतिफलति) । तस्मादेवमुन्यादिषु कदापि तप्तत्रिशूललिङ्गादिचिन्हं न विद्यते ।

1. 'पशूनां पतये नमः' [कृ. य. सं. ४-५-२] इति शतरुद्रमन्त्रस्य अर्थतोऽनुवादः अयम्—टि.
2. रा. प्रथमोत्कृ.
3. ०रा .काले रु. ।

'श्रद्धाभक्तिध्यानयोगादवैहि' [कै. उ. १-२] इति कैवल्योपनिषद्वचनात् लिङ्गाद्यङ्कनस्य ज्ञानाङ्गत्वाभावात्। 'नान्यःपन्था विद्यतेऽयनाय' [श्वे. उ. ३-८] इति मोक्षस्य ज्ञानसाध्यत्वमेवोपपन्नम्। "मनसैवेदमाप्तव्यम्" [क. उ. ४-११] इत्यादिश्रुतेश्च।

तस्मात् निर्मलान्तःकरणप्राप्तव्यमोक्षस्य बहिस्तापेन प्रयोजनाभावात् तप्तलिङ्गादेर्निन्दादर्शनाच्च लिङ्गाङ्कनमयुक्तमेवेति सिद्धम्।

[1]भवन्मतेऽपि भक्ताग्रगण्यस्य शिवस्य चांशांशिभावेन तत्रापि तदङ्कनं व्यर्थमेव, तयोर्भेदाभावात्। यदपि राजाङ्कनं भृत्यस्येत्युक्तम्, तदप्यसत्यम्। राज्ञ एकछत्रादिचिन्हं वर्तते। तद्भृत्यस्य नास्त्येव। त्रिशूलाद्यायुधविशेषं [2]देवो बिभर्ति, भक्तेनापि तदायुधधारणं कर्तव्यमिति किल भवद्भिरुक्तम्। तथा चेत् अयोमयं त्रिशूलादिकं धारयतां भारमात्रमेव। प्रयोजनं नास्त्येव, तथाविधकार्यकरणाशक्तेः। किञ्च नीलकण्ठभुजङ्गभूषणादिचिन्हं देवस्यास्ति, तदपि [3]धारय। वृश्चिकादिविषमात्रेण म्रियमाणस्य मर्त्यस्य न कालकूटभक्षणे शक्तिः। रज्जुदर्शनेन सर्पभ्रान्त्या पलायमानस्य भुजङ्गभूषणता कथं विद्यते। तस्मात् पामरबुद्धिं विहाय लिङ्गाद्यङ्कनं परित्यज्य वेदोक्तकर्मसमर्पणं भगवति कृत्वा जीवेश्वरयोः ऐक्यानुसन्धानं कुर्वन्[4] दृढे तज्ज्ञाने जन्ममरणप्रवाहकारणमूलाज्ञाननिवृत्तौ जातायां लिङ्गशरीरभङ्गद्वारा मुक्तो भवसीति समाज्ञापितः भक्ताग्रगण्यः तदनुसारिणश्च परमतकालानलादयः यतिं परमगुरुं श्रीशङ्कराचार्यं नत्वा स्वबन्धुपुत्रमित्रादिभिस्सह त्यक्तलिङ्गाङ्काः सम्यगुपदिष्टाः शुद्धाद्वैतिनो बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ शिवमतैकदेशनिबर्हणं नाम प्रकरणं पञ्चमम् ॥

1. रा. देवाग्र· 2 रा. देहे बि.
3. रा. धारयितव्यः। 4. रा. न् वर्तेय, दृष्टे तत्त्व.

॥ ६ ॥

## भक्तभागवतमतनिराकरणम्

तस्मात् अनन्तश[1]यनं नाम भगवदर्चामूर्तिसन्निहितप्रदेशं संप्राप्य तद्देवदर्शनं कृत्वा निजशिष्यैर्मासमास। तत्र—

भक्ता भागवताश्चैव वैष्णवाः पाञ्चरात्रिणः।
वैखानसाः कर्महीनाः षड्विधा वैष्णवा मताः॥

क्रियाज्ञानविभेदेन त एव द्वादशाऽभवन्।
अङ्केन सहितानेतान् स्मार्तवंशसमुद्भवान्॥

ऊर्ध्वपुण्ड्रधरान् भक्ताननन्ताङ्घ्रिद्वये रतान्।
तानाह शङ्कराचार्यः किं वो लक्षणमुच्यताम्।
स्नानमूलमिदं ब्राह्मयं इत्याद्यान्हिकचोदितम्॥

नित्यकर्मप्रमाणमिव प्रतिफलति, वः किं प्रमाणम्।

आदौ भक्ता इदमूचुः—स्वामिन्! वासुदेवः परमपुरुषः सर्वदा जगदव[2]नपरः सर्वज्ञः सर्वदे[3]वकारणः। स एव रामकृष्णाद्यवतारभेदेन भूभारं [4]निवर्तयितुं शिष्टावनमशिष्टसंहारं च कुर्वन् पुण्यस्थलेषु निजावि (र्भूत) [र्भाव] मूर्तिप्रतिष्ठामाचकार। मूढा वयं किल तदीयपादपङ्कजसेवया विगतपापाः [5]तल्लोकवासं प्राप्स्याम इति निश्चयबुद्ध्या, कौण्डिन्यमुनेः प्रसन्नो विष्णुः अनन्तनाम्ना किल अत्रैव वर्तते, तदीयचरणसेवनमनुदिनं कृत्वा तीर्थप्रसादादिभिः तृप्तिमेत्य गोपुरप्राकारादिषु संमार्जनप्रोक्षणादिकं कुर्वन्तः सन्तो वसामः।

1. रा. यन ग्रामं भग. 2. रा. ०नतत्परः 3. रा. म2 ०त्कारणम्
4. रा. क2 निवृत्तिं शि. 5. रा. तल्लोकं प्राप्नुम इति नि.

यतिवर्य! मदीयाचारो द्विविधः—ज्ञानक्रियाभेदात्। ज्ञानिनो वयं विष्णुशर्मादयः, परे कर्मठाः ब्रह्मगुप्तादयः श्रीमदनन्तभक्ताः अत्रैव वर्तन्त इति विष्णुशर्मवचनं निशम्य श्रीशङ्कराचार्यः तमपृच्छत् —

भवत्प्रमुखाः ज्ञानिनः किल। ज्ञानस्य किं वा लक्षणम्, तेन फलमपि किं इत्युक्ते विष्णुशर्मा आह—'अनन्तभगवत्पादपङ्कजमेव शरणमिति तूष्णीमवस्थितिरेव ज्ञानम्। तदनुज्ञां विना तृणचलनमपि न भवति' इति। तं आचार्यः अब्रवीत्—मूढ! विष्णुशर्मन् —

'जन्मना जायते शूद्रः कर्मणा जायते द्विजः' इति आश्रमधर्मानुकूलं कर्म सर्वेषां अलङ्घ्यम्; तस्यैव तपश्शब्दवाच्यत्वात्; संन्यासिनाऽपि विहितं कर्म कर्तव्यमेव। कर्महीने तु पातित्यमिति दर्शनात्—

'अहरहः सन्ध्यामुपासीत' 'उदिते सूर्ये प्रातर्जुहोति' 'उद्यन्तमस्तंयन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति, ब्रह्मैव सन् ब्रह्माप्येति, य एवं वेद' [तै. आ. १-२] इति च।

सर्वे वेदाः ब्राह्मणोचितं नित्यकर्म प्रशंसन्ति श्रौतस्मार्तादिकम्; यतः कर्मार्थमेव श्रुतिप्रवृत्तिः अतः सर्वैः आश्रमिभिः वेदोक्तं कर्म अवश्यं कर्तव्यमेव।

जीवन् कर्मपरित्यागं यः करोति नराधमः।
स मूढो नरकं याति यावदाभूतसंप्लवम्॥

इति (मनु) वचनदर्शनात्। देवार्चनस्नानशौचभिक्षाचर्यादिकं कर्म यतीनां च विधत एव। शौचाचमनस्नानसन्ध्यावन्दनजपाग्निहोत्रस्वाध्यायमाध्यान्हिकदेवातिथिपूजनादिकं कर्म वानप्रस्थगृहस्थयोः तुल्यमेव। वनस्थे खलु इयान् विशेषः—'तपो नानशनात् परम्'। ब्रह्मचारिणस्तु स्नानसन्ध्यास्वाध्यायगुरुकुलवासादिकं कर्मोचितम्। अतः स्वकर्मभ्रष्टानां भवतां ब्राह्मण्यहानिप्रसक्तिः स्यात्। किञ्च 'ज्ञानमार्गवर्तिनो वयं' इति भवद्भिरुक्तम्,



तत्राप्यधिकारो नास्त्येव। यद्यस्ति तर्हि सदसल्लक्षणं ब्रह्मनाडीभेदनं चिदचित्परामर्शं [1]षट्चक्रमार्गं दर्शयध्वम्। एवमाचार्यैरुक्ते विष्णुशर्मादयः इदमूचुः—

यतिनाथ! कर्म ज्ञानमुभयं नास्माभिर्विदितम्, त्रिकालमनन्तदेवपाददर्शनं विना।

तद्वचोगुंफसंभूताश्चर्यः श्रीशङ्कराचार्यः इदमाह—विष्णुशर्मन्! [2]कतिभिः अब्दैः एवं स्थितिः? स त्वाह—मत्सदृशः सप्तमपुरुषः तत्पिता किञ्चित्कर्मशील इति बाल्ये मया श्रुतम्।

तन्निशम्य कोपाश्चर्यभयात्मक[3]मानसः सकलगु[4]रुः दूरं गच्छेति विष्णुशर्माणमवादीत्। स तु क्लेशपूरितमानसः सगणः समस्तापराधं क्षमस्वेति दण्डवत् प्रणम्य संपुटितकरद्वयः स्थाणुवत् समतिष्ठत। विष्णुशर्माभिधमेनं शरणागतं दुर्मार्गरतमपि रक्ष्यामीति दयया सगणस्य तस्य प्रायश्चित्तकरणे हस्तामलकादीन् निजशिष्यानाज्ञापयामास। ते विष्णुशर्मप्रमुखानां स्नानब्रह्मदण्डसमर्पणमुण्डन-सहस्रघटस्नान-शतप्राजापत्यकृच्छ्र-प्राच्योदीच्याङ्गगोदान-भूशयन-गोगर्भजनन-जातकर्मनामकरण-चौलोपनयनविवाहप्रमुखकर्माणि यथाविधि समाचरन्। विष्णुशर्मादयोऽपि विहितब्राह्मणानुष्ठानपराः परमगुरुं इदमूचुः—स्वामिन्। भवत्कृपया ब्राह्मण्यसिद्धिरासीत्। मोक्षसिद्धिः केन भविष्यतीति प्रार्थयन्तं विष्णुशर्माणमिदमब्रवीत्—

---

1. रा. षट्चक्रज्ञानमार्गं
2. रा. म2, कतिपयैः अब्दैः एवं स्थितिः। 3. रा. काकुलमानसः
4. ०रुः आह—हे व्रात्य। सकलधर्मबहिष्कृत, दूराद्गच्छ (इति) स्वरसंसर्गेण अस्माकं दोषो भवेदिति विष्णुशर्माणमवादीत्—इति क. मुद्रितपुस्तके।

[1]ब्राह्मणाचारदेवाः स्युः ईशो विष्णुर्दिनेश्वरः
उमागणपतिश्चैव तेषां पूजापरा नराः ।
ब्रह्मार्पणधिया [2]कामान् परित्यज्याचरन्ति ते ॥

एवं कृते नित्यकर्मण्यमले मनसि प्रभोः ।
जीवस्य च भिदाभावो भवत्येव न संशयः ॥

मूलाज्ञानस्य [3]तस्य स्यान्निवृत्तिर्ज्ञानकारणात् ।
तेन भग्ने लिङ्गदेहे मुक्तिर्भवति नान्यथा ॥

इत्यादिष्टो विष्णुशर्मा दण्डवत् प्रणिपत्य तम् ।
[4][स्वगणं] कारयामास नित्यकर्म गुरुं स्मरन् ॥

स्मार्तकर्मपरिश्रान्तः पञ्चपूजाविशारदः ।
त्रिपुण्ड्रं भस्मना कुर्वन् चन्दनेन सुसंवृतः ॥

स्नात्वा मृत्तिकया चोर्ध्वपुण्ड्रं कुर्वन् प्रयत्नतः ।

एवं निराकृतेषु विष्णुशर्मादिभक्तेषु तदन्ये कर्माश्रितभक्ताः ब्रह्मगुप्तादयः समागत्य मुनीन्द्रमिदमूचुः—

'स्वामिन्! स्मार्तमार्गेण स्नानादिकर्म कुर्वन्तो वयमपि कर्मफलं भगवत्पादार्पणं कृत्वा निवसामः' इति ब्रह्मगुप्त-कृष्णदास-कमलाभक्तादिभिः विज्ञापितः श्रीशङ्कराचार्यः तान् प्रहसन्निदमब्रवीत्—इतः परं पञ्चपूजापरिलब्धचित्तशुद्धयः शुद्धाद्वैतविद्यावैशद्यनिराकृतमायारचितभेदवासनाः स्वात्मानन्दानुभवत्यक्तलिङ्गशरीरा भवन्तः सच्चिदानन्दैक्यफलमनुभविष्यन्तीति उक्ताः ते परमगुरुं नत्वा स्वस्था बभूवुः ॥

एवं भक्तमते निराकृते भागवतमतावलम्बी कश्चित् विप्रदेवः प्रत्यवतिष्ठते मन्त्रवर्णात् ।

1. क. मुद्रितपुस्तकस्थपाठः अयम् । 2 रा. कर्म परि । 3. रा. तत्र स्या ।
4. सगणः कारयामास इति सर्वासु मातृकासु ।



सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥

अनेन मन्त्रेण जगत्पतिस्तोत्रमात्रेणैव वेदपारायण-तीर्थयात्रादि परिलब्धफलस्य सत्त्वात्, श्रियःपतिकीर्तनं अनुदिनमाचरन् वसामि । 'कलौ सङ्कीर्त्य केशव' मिति वचनात् मुक्तिः करस्थैव । तस्मात् मदीयमतस्य निगमोक्तत्वात् प्रामाण्यम् । स्मृत्याचारानुकूलत्वात् स्मार्तं स्नानादि सत्कर्म । तद्युक्तोऽपि भगवत्संबन्धिभागवतः श्रियःपतिक[1]टाक्षानुभववशात् अहमभवम् ; नास्मिन् विचारः कर्तव्यः । सुवर्णस्य परिमलप्राप्तिरिव सद्ब्राह्मणस्य विष्णुस्तुतिः किल । तस्मात् श्रीमन्नारायणभक्त्योर्ध्वपुण्ड्रशङ्खचक्रगदापद्मादिचिन्हितः तुलसीमालिकाबद्धगलः सार्वकालिकमुच्चैः निरन्तरं स्तौमि नारायणमेव शरणम्—इति वदन्तं आचार्यः अब्रवीत्—

भागवत! भवन्मतमसमञ्जसम्, विरोधसद्भावात् । कथं? चक्राद्यङ्कनस्य निन्दादर्शनात् । किञ्च, भगवतो मूर्तिः चतुर्धा भवति—परव्यूहविभवार्चाभेदात् । परमूर्तेः स्वरूपाभावात् लिङ्गाभावः । 'आकाशशरीरं ब्रह्म' [तै. ३-१-६] इति । 'यच्छुक्लं तद्ब्रह्मेति, कं ब्रह्म खं ब्रह्म' इत्यादि श्रुतिभ्यः । अतः मनोवाग्वृत्त्यगोचरं ब्रह्म, तदेव परमूर्तिः । व्यूहमूर्तिर्विराट् चतुर्दशलोकात्मकः तस्य ब्रह्माण्डकर्परपर्यन्तं आकाशः शिरः, चन्द्रसूर्यौ नेत्रे, प्रागादिदिशः श्रोत्रे, अन्तरिक्षलोकः घ्राणम्, मेरुः पृष्ठवंशः, शिखरत्रयं भुजकण्ठाः, प्रत्यन्तपर्वताः पृष्ठपार्श्ववक्षांसि, उपपर्वताः शल्यानि, समुद्राः रक्तम्, लताः स्नायूनि, तृणवृक्षाः रोमाणि, भूमिः कुक्षिः, द्वीपाः वलयः, भूरेखा रोमराजिः, भूमध्यप्रदेशाः बस्तिः शेषः शिश्नम्, दिग्दन्तिपङ्क्तिः नितम्बोरुभागः, अतलादिलोकसप्तकं कटिपादान्तरालः, कूर्मः पादौ । एवं वर्तमानस्य विराड्देहस्याङ्केन तप्तमुद्राधारणं समर्थश्चेत् कुरु । शीर्षादिपादपर्यन्तं चिह्नेन

1. रा. टाक्षरेणुवशात्

केनचिदयोमयेन दृढतप्तेन शरीरमङ्क्य, देहनाशात् परं वैष्णवसिद्धिर्भविष्यति। विभवमूर्तयः मत्स्याद्याः। चेतने मत्स्याद्यवतारात्मके नारायणे विद्यमाने अचेतनयोः शङ्खचक्रयोः चिह्नं किमर्थं कर्तव्यम्। चेतनपरित्यागे अचेतनपरिग्रहे मानाभावात्। दोषबाहुल्यस्य बृहन्नारदीये उक्तत्वाच्च। अरे! लोहमये आयुधरूपे शङ्खचक्रे गदापद्मसहिते विहाय लोहमयान्येव मत्स्याद्याकाराणि कृत्वा तैरेव चिह्नधारणं कुरु, तेन चर्मक्लेशमात्रं फलमस्ति। तथा कृतं चेत्, तदा प्राणाः न स्थीयन्त इति चेत्, चक्रादिलोहमयं कृत्वा विष्णुवत् हस्ताभ्यां धारय, बाहुभारमात्रं फलमस्ति। अर्चामूर्तीनां शिलमयत्वात् तद्रूपेण तप्तेन वाऽङ्क्य। तस्मात् मूढ! भगवच्चिह्नधारणं कर्तव्यमिति पाषण्डबुद्धिं त्यक्त्वा स्वकर्म नित्यादि यथाशक्ति कृत्वा तत्फलसर्पणं भगवत्येव विधाय शुद्धाद्वैतवादिनं गुरुमाश्रित्य तदुपशेवशात् विनष्टकर्मबन्धः मुक्तो भविष्यसि। किञ्च, 'स्तुतिमात्रेण मुक्तिः करस्था' इति भवद्भिरुक्तम्। तदत्यन्तासंबद्धम्। ब्रह्मणः वागतीतत्वेन स्तुतेः वाग्रूपत्वेन [ब्रह्मणः] स्तुतिः सुतरामयुक्तैव। ज्ञानं विना मुक्तिर्नास्त्येव— 'नान्यः पन्था विद्यतेऽयनाय' [श्वे. उ. ३-८] इति निषेधदर्शनात्।

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते।<br>
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ [के. उ. -१५]

यन्मनसा न मनुते येनाहुर्मनो मतम्।<br>
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ [के. उ. १-६]

इत्यादि श्रुतिभ्यः ब्रह्मणो वाङ्मनोवृत्त्यतीतत्वात्; ईदृक्स्वरूपं ब्रह्मेति वक्तुमशक्यत्वात् तदीयध्यानादिकं सर्वदाऽनुपपन्नम्। जन्मान्तरसहस्राभ्यासपरिपक्वबुद्धेः कस्यचित् गुरूपदेशवशादवगतब्रह्मतत्त्वस्य मुक्तिर्भवति-

आश्चार्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः।<br>
[क. उ. २-७]



'न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः' [क. उ. २-८] इत्यादि श्रुतिभ्यः॥

ब्रह्मबोधस्यासाध्यत्वात् ब्राह्मणेन कर्मनिष्ठावता भवितव्यं। तदनुष्ठानेन चित्तशुद्धौ जातायां बहुजन्मतपः (फला) [प्रसादा]दाविर्भूतब्रह्मस्वरूपः मुक्तो भवति॥

उक्तं श्रीमद्भगवद्गीतासु—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।<br>
वासुदेवस्सर्वमिति, स महात्मा सुदुर्लभः॥ [भ. गी. ७-१९]

यत्र ब्रह्मणि प्रपञ्चदृष्टिः लीयते तदनन्तरं ज्ञानं 'नेदं जगत् किन्तु आत्मैवे'ति जायते, तदा स एवाहमिति भिदाऽभावो भवत्येव, सैव मुक्तिरिति। एवं उपदेशं कुर्वन्तं परमगुरुं श्रीशङ्कराचार्यं विप्रदेवः सम्यगभिवाद्य, 'स्वामिन्! मदीयमतेनालम्; तस्य मुक्तिजनकत्वाभावात्। भवत्पाददर्शनं मम सुकृतशतेनैवाभूत्। अतः सदुपदेशेन मां कृतार्थं कुरु' इति नमस्कारपुरःसरं विज्ञापितः परमगुरुः इदमवादीत्—

'भो! विप्रदेव, चिन्हाङ्कनादिकं परित्यज्य यथाकालोचितं नित्यकर्म कुर्वन् सदा अहंब्रह्मास्मीति भावय। सिद्धायां भावनायां मुक्तो भवसि'—इति.

॥ इत्यनन्तानन्दगिरिकृतौ भक्तभागवतमतनिराकरणं नाम प्रकरणं षष्ठम्॥

## ॥ ७ ॥

## ॥ वैष्णवमतनिराकरणम् ॥

एवं भक्तभागवतमतयोः निराकृतयोः पुनरन्यो वैष्णवः [1]ओं नमो नारयणायेति मन्त्रोपासकः शार्ङ्गपाणिरिति प्रत्यवतिष्ठते मन्त्रवर्णात्—'यन्मुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्' इति।

1. 'ओ'मित्यत आरभ्य 'मन्त्रोपासकः' इति पर्यन्तो भागः नास्ति, म2 मातृकायाम्।

स आह—[1]भगवद्भक्तेन वैकुण्ठलोकवासार्थमवश्यं शङ्खचक्राद्यङ्कनं कर्तव्यम्। नारायणमुद्रादिधरः नारायणाष्टाक्षर्युच्चारणमात्रेणैव जन्मसंसारबन्धनाद्विमुक्तः वैकुण्ठभवनं गमिष्यति। अतः शङ्खचक्राद्यङ्कितगात्रः वैष्णवोत्तमः (इति)। तादृग्विधाः तल्लोकवासिनो मुक्ता इति प्रसिद्धेः। तदुक्तं पुराणे—

ये बाहुमूलपरिचिन्हितशङ्खचक्रा ये कण्ठलग्नतुलसीनलिनाक्षमालाः।
ये वा ललाटफलकेलसदूर्ध्वपुण्ड्राः ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ [इति]

अतः शङ्खचक्राद्यङ्कनस्य पुराणपठितत्वात् तत् अवश्यं कर्तव्यमेव भगवच्चिन्हत्वात्।

एवं प्राप्ते आहुराचार्याः। तप्तशङ्खचक्रादिधारणं परिहर्तव्यम्। कस्मात्? [2](तदवकाशाभावात्) [तद्बोधकश्रुत्यभावात्] 'अतप्ततनूर्न तदामो अश्नुते' [ऋ. सं. ७-३-८] इति श्रुतिस्तत्र प्रमाणमिति चेन्न—तपस्तप्ततनोरेव ब्रह्मबोधस्यान्यत्र दर्शनात्। भृगुणा ब्रह्मबोधार्थं पितरं वरुणमासाद्य यथोचितं नत्वा ब्रह्मोपदेशं कुर्वित्युक्ते 'तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मेति' [तै. उ. ३-२] किल वरुणेनोक्तम्। तपश्शब्दार्थस्तु महापातकध्वंसहेतुभूतकृच्छ्रचान्द्रायणादिः, आश्रमविहितकर्मानुष्ठानं वा, सकलवेदविदितस्य साक्षिचैतन्यस्य सर्वदेवमयस्य ध्यानं वा भविष्यति।

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षस्सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ [श्वे. उ. ६-११]

इति परमात्मनो रूपगुणकर्माभावाच्च तत्स्वरूपज्ञानेनैव मुक्तिदर्शनात् तपोमूलमेव ब्रह्मज्ञानमिति प्राप्तम्। तस्माच्चक्रादिचिन्हस्यानवकाशः।

---

1. 'ओं नमो नारायणायेति मन्त्रोपासनतः वैकुण्ठगमनं भविष्यति' इति म2 मातृकायां वर्तते। अस्मिन् वाक्ये प्रतिपादितः अर्थः 'नारायणाष्टाक्षर्युच्चारणमात्रेणैव......... गमिष्यति' इति समनन्तरवाक्ये प्रपञ्चितत्वात् म2 मातृकास्थपाठः नाद्रियते।
2. म2 प्रमाणाभावात्।



कार्यमूर्तेर्विष्णोश्चक्राद्यायुधस्य विद्यमानत्वात् तच्चिन्हधारणेन तन्मन्त्रजपेन च वैकुण्ठप्राप्तिरिति किलोक्तम्, न हि तदतिरमणीयम्। मेर्वग्रे शृङ्गेषु त्रिषु वर्तमानेषु पश्चिमशृङ्गे रुद्रलोकः मध्यमशृङ्गे ब्रह्मलोकः प्राक्शृङ्गे विष्णुलोकः तेषां [ब्रह्मावसाने लयात्] (ब्रह्मावसानलयात्मकत्वात्) तत्प्राप्तिरनर्थ एव। तद् द्वारा चक्रादिधारणस्य निरर्थकत्वं प्राप्तम्। 'ब्रह्मविदाप्नोति परम्' [तै. उ. २-१-१], इति ब्रह्मविद एव निश्रेयसप्राप्तेः, तदन्यत् 'क्षीणे पुण्ये मर्त्यलोकं विशान्ती' [भ. गी. ९-२१] ति संसारप्राप्तिकरमेवेति सिद्धम्। पुराणेषु बृहन्नारदीयादिषु तप्तचक्रलिङ्गनिषेधदर्शनात् कर्मबाह्यस्य ब्राह्मणव्यतिरिक्तस्य तच्चिन्हमस्तु। तस्याप्यग्रजशुश्रूषयैव मुक्तिदर्शनात् अप्रयोजकत्वं चक्राद्यङ्कनस्य प्राप्तम्। विष्णुचिन्हधारणेन विष्णुसमोऽहं भविष्यामीति फलधिया चेत्, अङ्कधारणमात्रेणैव न च विष्णुत्वप्राप्तिः। ब्रह्मभावनयैव ब्रह्मत्वप्राप्तेः। 'ब्रह्म वेद ब्रह्मैव भवति' [मु. उ. ३-२-९] इति श्रुतेः। किञ्च 'अत्ता चराचरग्रहणात्' [ब्र. सू. १-२-९] इत्यस्याधिकरणसूत्रस्य विषयवाक्यमेतत्—

'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' ॥ इति ॥

[क. उ. २-२५]

अस्मिन्नधिकर[1]णे (आचार्यकृतभाष्य)[2] सिद्धान्तः एवं कृतः—

अत्ता परमात्मा, कस्मात्? चराचरग्रहणात्। यस्य ब्रह्मक्षत्राद्युपलक्षितं जगत् चराचरं ओदनं अन्नम्, मृत्युः सर्वप्राणिप्राणहर्ता उपसेचनं उपदंशः इत्थं को वा वेद यत्र यस्मिन् (जन्मनि) [ब्रह्मणि] इत्यर्थः। स (एव) परमात्मैव भवतीति। तस्मात् ब्रह्मप्राप्तिः निरुपाधिकब्रह्मवेदनेनैव भवति। 'सर्वेषां देवानामात्मैकायनम्' इति (बृहदारण्यक)श्रुतेः सर्वदेवस्वरूपोपासनमात्मन

---

1. ०णे अया भाष्ये सिद्धा० —क.
2. म2 मातृकास्थपाठोऽयम्। अनन्तानन्दगिरिवाक्यमिदमिति बोध्यम्—टि.

एवेति चेन्न—कथं कर्मातीतवृत्तेरीश्वरस्य कर्मगोचरत्वम्। ब्रह्मलये देवानां पृथक्स्वरूपाभावात् कारणैकता सिद्धैव। अतः एकायनं मुख्यस्थानम्। स्रष्टुः मायान्तर्गतस्य वचनं 'बहु स्यां प्रजायेय' [छा. उ. ६-२-३] इति। अनेन सर्वदेवमयत्वं प्राप्तम्, देवानां तदंशसंभूतत्वात्। अतः यस्य देवस्योपासनं अविच्छिन्नां करोति तल्लोकप्राप्तिमात्रमेव फलं समधिगच्छति। पुण्यलये पुनर्मर्त्यलोकप्राप्तेः। 'तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्' [ब्रं. सू. ३-१-१] इत्यस्मिन्नधिकरणे जीवस्य तृणजलूकान्यायेन परलोकगमनमुक्त्वा तत्र स्वकर्मसंपादितदेहादिफलमनुभूय किञ्चिदवशिष्टे निजकर्मणि पुनर्मर्त्यलोकप्राप्तये जीवः (स तु) द्युपर्जन्यपृथिवीपुरुषयोषित्सु श्रद्धासोमवृष्टयन्नरेतोरूपाः पञ्चाहुतीरवलम्ब्य पुरुषाकारो भवतीति पञ्चाग्निविद्यामाश्रित्य उक्तम्। अतः संसारमार्गः दृढतरज्ञानेन विना तप्तचक्रादिधारणेन नष्टो भवतीति अनृतवाद एव। सर्वस्य मायारूपत्वात् अमायिकसदनुसन्धानेनैव तन्निवृत्तिः। अतः सर्वज्ञनित्यशुद्धबुद्धमुक्तस्वरूपं (अणुमहत्वादि लक्षणलक्षितम्) सत्यं ज्ञानमनन्तं ब्रह्मास्मीति अनुसन्धानं सदा कुरु। तदनुसन्धानेन निरस्ते भिदागन्धे जीवस्य परत्वमेव।

उक्तश्च शिवगीतासु—

शिवः शिवोऽहमस्मीति वादिनं यश्च कश्चन।
आत्मना सह तादात्म्यभागिनं कुरुते भृशम्॥ इति।

एवमुपदिष्टः शार्ङ्गपाणिरिति वैष्णवः श्रीशङ्कराचार्यपरमगुरुं नत्वा स्वामिन्! भवदुपदेशेन कृतार्थोऽस्मि। इतः परं शुद्धाद्वैतवृत्तौ सोऽहंभावनापरिलब्धफलनिरस्तभिदाशङ्कायां निश्चयेन वर्तेऽहमिति दण्डवन्ननाम। आचार्यः तं 'मुक्तो भव' इत्यवादीत्। तदनन्तरं निरस्तचिन्हः स्मार्ताचारपरिश्रान्तगात्रः पञ्चपूजानैपुण्यतृप्तसकलदेवदत्तवरः स्वकुलग्रामदेशस्थानशेषानेवमाचकार।

॥ इत्यनन्तानन्दगिरिकृतौ वैष्णवमतनिबर्हणं नाम प्रकरणं सप्तमम्॥

## ॥ ८ ॥

## ॥ पाञ्चरात्रमतनिबर्हणम् ॥

एवं परिहृते वैष्णवमते पुनरन्यः पाञ्चरात्रागमदीक्षितः प्रत्यवतिष्ठते।

स तु श्रीशङ्कराचार्यमिदमाह—स्वामिन्। भवानत्र आगत्य भक्तभागवतवैष्णवमतनिरसनं कृत्वा वर्तते। ते वैष्णवाः किमु। जातिमात्रोपजीविनः पुण्ड्रादिधारणमात्रेण तद्दीक्षाः। तन्मतं भवता मयाऽपि च निरस्तमेव। इदानीं अशेषवैष्णवदीक्षाकारणं पाञ्चरात्रं परमवैष्णवमतं अहमवलंब्य चिरादनन्तदेवपादकमलाराधनं कुर्वन् भगवत्प्रियोऽभवम्। पाञ्चरात्रागमस्य निन्दां कर्तुमसमर्थ एव ईश्वरोऽपि। अतः भगवदर्चामूर्तिप्रतिष्ठादिकमपि (तदनुष्ठानमूलकत्वात्) [तन्मूलकत्वात्] कर्तव्यम्। तस्मात् ब्राह्मणैस्सर्वैरपि पाञ्चरात्रागमाचार एव कार्यः इति प्राप्ते—

आचार्यैरिदमुच्यते— भो वैष्णव! समीचीनमुक्तं भवता। विचार्यमाणे वेदाविरुद्धत्वमागमेऽस्ति चेत् तदुक्ताचारोऽपि ग्राह्य एव भवति। यदि विरुद्धता तदा स एवाचारः परित्याज्यो भवति। प्रथमं विष्णुसम्बद्धो वैष्णवः, विष्ण्वेकदेवतानिरत इत्यर्थः। तादृग्विधस्य वैष्णवस्य विष्णुमन्त्रशतोपदेशेनापि न ब्राह्मण्यभावः स्यात्। किन्तु गायत्र्युपदेशेनैव ब्राह्मण्यसिद्धिर्भवति। अतः ब्राह्मण्यानुग्रहाय मन्त्रान्तरपरिग्रहस्य दुर्निवार्यत्वात् गायत्र्यङ्गीकारः कर्तव्यः किलासीत्। गायत्र्यङ्गीकारोऽपि मा भूदिति यद्युच्येत तर्हि गायत्र्यभावे पतित एव स्यात्। [1]तस्मात् मन्त्रान्तरसद्भावात् वैष्णवत्वहानिः स्यात्। किञ्चैवमेव रविरग्निश्च [2]सेवनीयौ, तयोरपि ब्राह्मणकर्माधारत्वात्। तस्मादपरिहार्यदेवतान्तरसद्भावात् तत्परित्यागे ब्राह्मण्यविच्छित्तिदर्शनात् वैष्णवमतमनृततरमित्युक्ते,

1. गायत्र्यङ्गीकारस्य आवश्यकत्वात्—टि. 2. म2. वाञ्छनीयः।

स तु अब्रवीत्—भवदुक्तमसमञ्जसम्। कथम्? गायत्र्या अपि विष्णुशक्तित्वात्। तदपि कथम्?। शङ्खचक्रधारणस्य विद्यमानत्वात्। यत्र यत्र विष्णुचिन्हधारणं (युज्यते) तत्र तद्रूपत्वम् (प्राप्यते)।

तर्हि रुद्रशक्तिरेवेति वक्तव्या। कथम्? पञ्चवदनेन्दुशेखरत्वाद्युपमानात्[1]। रुद्रस्य प्रागादिमुखसद्भावो यथा, तथैव गायत्र्या अपि। चन्द्रमुकुटत्वं रुद्रस्यासाधारणो धर्मः तद्वदस्याश्च इत्यतः गायत्री रुद्रशक्तिरेवेत्यविरुद्धम्। किञ्च शरीराद्यपेक्षया आयुधानां भिन्नत्वात् पञ्चवक्त्रसद्भावात् रुद्रशक्तिर्वा न वेति सन्देहलेशाभावात् पारमेश्वर्येव गायत्रीति निरवद्यम्।

स्वामिन्! गायत्रीशब्द[ार्थ]स्तु पारमेश्वरीं रुद्रशक्तिं न वक्ति। किन्तु सवितुर्देवस्य वरेण्यं - श्रेष्ठं भर्गः—तेजः धीमहि इत्यादिना सूर्यतेजःप्राधान्यात् तन्मण्डलालयस्य नारायणस्य इयं शक्तिरिति रोचते। तस्याः बहुरूपसद्भावात् पञ्चमुखादिकमविरुद्धम्।

ननु अष्टमूर्तेः परमेश्वरस्यैव शक्तिरीदृशी। कथं?। सूर्यस्य तन्मूर्तित्वात्। अतो रुद्रमूर्तिप्रतिपादिका गायत्री विष्णुशक्तिरिति वक्तुं नार्हसि। गायत्रीहृदये गायत्र्युत्पत्तिप्रकारोऽपि नितरां प्रतिपादितः। (तद्वारा) प्रणवात् व्याहृत्युत्पत्तिः; व्याहृतिभ्यो गायत्र्युत्पत्तिः; गायत्र्याः सावित्र्युत्पत्तिः; सावित्र्याः सरस्वत्युत्पत्तिः; सरस्वत्याः वेदोत्पत्तिः। एवं स्थिते प्रकृते कार्ये किं चिन्त्यम्? एतत् सर्वस्यापि प्रणवजन्यत्वं सिद्धं भवति। प्रणवस्य तु 'ओमित्येतदग्र अजायत' इति जन्यत्वं दर्शयति श्रुतिः। (प्रणवः प्रथमं परमेश्वरादजायत इति भाष्येऽप्युक्तम्)[2]। परस्मादात्मन एव प्रणवोत्पत्तिः सिद्धैव।

1. उपमानात्—साम्यादित्यर्थः।
2. अनन्तानन्दगिरिवाक्यमिदं इति बोध्यम्।



यो वेदादौ स्वरः प्रोक्तः वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥ [म. ना. ८-१७]

इति नारायणोपनिषद्वचनात्, महेश्वरस्य जगत्कारणत्वाच्च। (तस्मादेव) [तद्वारा] गायत्री जाता जगदुत्पत्तिहेतवे। स्वमायाप्रविष्टस्य तस्य पञ्चवक्त्रचन्द्रमुकुटविशेषणस्य शक्तिरेव गायत्रीति (समाधानं)।

बृहदारण्यके अन्तर्यामिब्राह्मणे—

'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः' [बृ. उ. ३-७-९] इति। (यस्य) परमात्मनः आदित्यः शरीरं भवति। अष्टमूर्त्यन्तःपातित्वेन आदित्यः शिवस्य शरीरमेव। एवञ्च आदित्यशरीरस्य ईशानस्य तेजोरूपा गायत्रीति तस्याः पञ्चवक्त्रचन्द्रचूडत्वाद्युपपन्नम्। अतः चक्रस्यायुधविशेषत्वात् रुद्रस्याप्युपपन्नमेव।

तस्मात् देवतान्तरत्वात् नैव गायत्र्युपासनीया वैष्णवेन।

तथाऽग्निरपि परित्याज्यः तस्य रुद्रत्वात्। कथम्?। अष्टमूर्त्यन्तःपातित्वात्—

'यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु' [कृ. य. सं. ५-५-९] इति श्रुतेः॥ रविस्त्वीशानमूर्तिरिति प्रतिपादित एव।

तस्मात् गायत्र्यग्न्युपासनं वैष्णवः कर्तुं नार्हसि त्वम्। एवं ब्राह्मण्यनिवृत्तावपि जातायां वैष्णवोऽस्मीति यद्युच्येत तर्हि प्रारब्धस्यातिविचित्रत्वात् को वा भवान्?। नास्माकं तदुपयोगः जातिभ्रंशस्यामर्यादकत्वात्; ज्ञानमतवत् भक्तादिनानामतावलंबिनां नियमातिक्रमवृत्तिमतां यथा जातिभ्रंशः तथैव। [1]नित्यनैमित्तिककर्मपरित्यागे ज्ञानमतावलंबः त(दन)त्रानियमात् नितम्बिनीपरि-

1. ज्ञाने जाते संसारनिवृत्तिरेव फलं लभ्यते। नित्यसंसारिणामस्माकं ज्ञानमतमिति वदतां जात्याश्रमविहितकर्मभ्रष्टानां किमु वक्तव्यं [तद्वत् भवतां, इति भावः] इति पाठः उपलभ्यते सर्वासु मातृकासु। अनुपदोक्तार्थस्यैव प्रपञ्चोऽयं इति बोध्यम्।

सेवने कस्यावलम्बो वा अस्माभिर्वेदितव्यः श्रुतिस्मृत्युक्तनियमच्छेदिनां ज्ञानकर्ममार्गद्वयभ्रष्टानां मतं किमस्तीति ।

उक्तञ्च—

जीवन् कर्मपरित्यागं यः करोति नराधमः ।
स मूढो नरके शेते यावदाभूतसंप्लवम् ॥ इत्यादिना ।

एवं वैष्णवमतस्य दौर्बल्ये प्राप्ते माधवाख्यो वैष्णव इदमाह—स्वामिन्! पाञ्चरात्रागमे 'तप्तशङ्खचक्रे द्विभुजे धार्ये, तेन परमं लोकं याती'ति सम्यगागमदीक्षितस्य फलं प्रतिपादितम् । वैष्णवस्याप्रामाण्ये प्राप्ते आगमस्य सुतरामप्रामाण्यप्राप्तिः स्यात् । तस्मात् वैष्णवमतमवश्यमङ्गीकर्तव्यमिति ।

अत्रोच्यते—आगमोक्ततप्तशङ्खचक्रधारणमयुक्तम् । कुतः? वेदविरोधात् । ब्रह्माद्युत्पत्तेः पूर्वभाविनो वेदस्य विरोधे प्रोच्यमाने महानेव दोषः प्रसज्यते । तद्विरुद्धाचारे तथैव । सूर्यप्रणीतागमविरुद्धताऽपि तथैवेति चेन्न-आगमेतिहासपुराणोक्ताचारस्तु वेदानुकूलः ग्राह्यः । अग्राह्य एव तत्प्रतिकूलः ।

उक्तञ्च—

अतीन्द्रियार्थविज्ञाने प्रमाणं श्रुतिरेव हि ।
श्रुत्युक्ताचारतो ग्राह्या ह्यागमानां प्रमाणता ॥ इति ।

अतः सर्वस्यापि वाङ्मयस्य निगममूलत्वेन तद्विरुद्धत्वाद्वैष्णवस्य अग्राह्यत्वं (प्रसक्तं) भवति । अतः परित्यक्तचक्रादिचिह्नः त्वं अप्रतिहतब्राह्मणाचारं निर्वर्तय । यथाशक्तिकर्माचरणेनापि प्रत्यवायाभावात् ।

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्' [भ. गी. ३-३५.] इत्युक्तेः । तस्मात् ब्राह्मणस्य यथोक्तकर्माचरणमेव तपः । तेन तपसा यः तप्ततनुर्भवति स एव तप्ततनुः स्यात् । तस्य अतप्ततनोः पुरुषस्य तदाम—तद्धाम—तस्य भगवतो धाम—तेजः नाश्नुते न विद्यत इत्यर्थः[1] ॥

---

1. 'अतप्ततनो नं तदामो अश्नुते' इति शाखान्तरपाठमाश्रित्येदं व्याख्यानम् ॥



ज्ञानादृते मोक्षो न भवति । तस्य मनोनैर्मल्यं मूलम् । (निर्मलेन मनसा संसारकारणस्य भेदस्य निवृत्तेः । ततः परं 'अहमस्मि ब्रह्म' इति महावाक्यस्य निष्पन्नत्वात् परं मोक्षमाप्नोतीति सिद्धान्तः) ।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥ [कै. उ. १०]

इति श्रुतेः । एवं (भावनया) [भावय]—तत् सत्यज्ञानानन्दलक्षणलक्षितं ब्रह्म त्वमसि, न तु पाञ्चरात्रागमदीक्षितो माधवः ।

[1]यत् परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥
[कै. उ. १६] इति श्रुतेः ।

[2]जाग्रत्स्वप्नसुषुप्त्यादि प्रपञ्चं यत् प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥
[कै. उ. १७] इति श्रुतेः

तस्मात् मायाकल्पितचक्राद्यङ्कनादिकं परित्यज्य शुद्धाद्वैतवृत्त्या [3]जीवेशैक्यं कुरु, मुक्तो भवसि, इति बोधितस्त्यक्तचिन्हः परिवर्जितागमाचारः सन्मार्गगामी माधवः स्वकुलग्रामदेशवासिभिः सह शुद्धाद्वैतवृत्तिं प्राप्य स्नानसन्ध्याऽग्निहोत्रस्वाध्यायवैश्वदेवातिथिपूजापरायणः सर्वजगद्रूपेणावगतं ब्रह्म [तदेवाहमस्मि] इति ध्यात्वा (तदेवाहमस्मीति) मुक्तोऽभवत् ।

॥ इत्यनन्तानन्दगिरिकृतौ पाञ्चरा[त्रमत](त्रागम)निबर्हणं नाम अष्टमं प्रकरणम् ॥

---

1. क, म2. यः परं; रा, त. यः परं ब्रह्म स सर्वस्यास्यायतनं.
2. क. मुद्रितपुस्तके श्रुतिरियं नोद्धृता ।
3. म2. जीवैक्यं

॥ ९ ॥

## ॥ वैखानसमतनिबर्हणम् ॥

एवं परिहृतेषु भक्तभागवतवैष्णवपाञ्चरात्रेषु पुनरन्यो वैखानसमताचारः व्यासदास इति प्रत्यवतिष्ठते मन्त्रवर्णात्। स्वामिन्! भवता निरस्ताः भक्ताद-यश्चत्वारः [1]ज्ञानमार्गवर्तिनश्च। इदानीमहमागतोऽस्मि व्यासदासः वैखानसम-ताचाराग्रणीः। न च ब्रह्मापि मत्पक्षं [2]निवारयितुं कुशलः, मदीयमतेशस्य नारायणस्य सर्वोत्कृष्टत्वात्। शङ्खचक्राङ्कितागु(रोः)[रुणा]उपदिष्टोऽहं विष्णुः सर्वोत्तम इति। अस्मन्मतस्य श्रुतिरूढत्वञ्च[3]। मन्त्रश्च—

"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते विष्णोर्यत् परमं पदम्" [ऋ. य. स. १-३-६] —इति च। सूरयः विद्वांसः विष्णोः नारायणस्य यत् प्रसिद्धं परं उत्कृष्टं पदं स्थानं वैकुण्ठाख्यं सदा सार्वकालिकं पश्यन्ति - तथाविधं स्थानं कदा वयं प्राप्स्याम इति पश्यन्तीत्यर्थः। तत्पदं दिवि - द्युलोके आततं - विस्तृतं चक्षुरिव[4] प्रकाशमानमित्यर्थः। विप्रासः - विप्राः ब्राह्मणाः विगतं पन्यं पापं येषां ते विपन्यवः। जागृवांसः - विगतनिद्राः निद्रालस्यादि निन्द्यगुणरहिता इत्यर्थः। विष्णोः नारायणस्य परमं सर्वापेक्षया पूज्यं पदं स्थानं यत्वर्तते तत् समिन्धते ध्यायन्तीत्यर्थः। तस्मात् सर्वदेवस्थानापेक्षया विष्णुपदस्य श्रेष्ठत्वात् नारायणस्य सर्वोत्तमत्वं सिद्धम्। 'नारायणात् ब्रह्मा जायते………………रुद्रावसवः' [ना. उ. १] इत्यादिनारायणोपनिषदुक्तप्रकारेण सर्वदेवकारणत्वं नारायणे घटते।

---

1. क, रा. तज्ज्ञानमार्गवर्तिनश्च।
2. म2. निवारितुं शक्यः कुशलः।
3. क. मुद्रितपुस्तकस्थपाठोऽयम्।
4. म2. ०व वर्तमानं प्रका० क. ०व वर्तमानं चक्षुषोऽधिदैवतं सूर्य इव प्रका०



'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' [म. ना. उ. ९-५] इत्यादिना नारायण एवं परं ब्रह्म। नराणां समूहः नारं त(त्र)[द] यनं स्थानं यस्य सः नारायणः, रेफात् परस्य नकारस्य णत्वविधानात्। (सर्वप्राणिबुद्धिगुहानिवा-साच्छुद्धचैतन्यमित्यर्थः)। तद्भक्तानां तदङ्कधारणमुचितमेव। [1]वैखानसे— 'विष्णुभक्तः विरचितोर्ध्वपुण्ड्रः शङ्खचक्राभ्यां पवित्रगात्रः' इति। अतः शङ्खचक्रोर्ध्वपुण्ड्राद्यङ्कितः विष्णुभक्तः इति प्राप्ते—

अत्रोच्यते - भो, व्यासदास! भवदुक्तमन्त्रद्वये विष्णुलोकस्य तेजोरूपत्वं विद्वत्[2]प्राप्यत्वं प्रदर्शितम्। मायातीतपरमात्मनः सकाशात् अजा गुणत्रयमयी किल अजायत। ततः महत्तत्त्वम्, तस्मादहङ्कारः त्रिगुण उत्पन्नः।

(विष्णुपुराणे) -

"वैकारिकस्तैजसश्च भूतादिश्चैव तामसः।
त्रिविधोऽयमहङ्कारो महत्तत्वादजायत॥"

इति वचनबलात् तस्य ब्रह्मविष्णुशिवात्मकत्वं प्राप्तम्। ते च सृष्टिस्थि-तिलयकर्तारः। तस्मात् पालनकर्ता विष्णुरित्युच्यते। [3]व्यापकस्यैव पालकत्व-सिद्धेः। सर्वभूतबहिरन्तःस्थितत्वेन नारायण इति तस्य नाम प्राप्तम्। अतः पालनकर्तुर्विष्णोः पदं स्थानं सदा पश्यन्ति सूरयः इत्युक्ते का वा अस्माकं हानिः। पालनकर्ता वा परब्रह्म वा विष्णुर्भवतु; न चास्माकं तत् क्लेशः; 'सर्वेषां देवानामात्मैकायन'मिति बृहदारण्यकश्रुतेः परब्रह्मणः सर्वदेव-मयत्वात्।

तस्मादोङ्कार उत्पन्नो गुणत्रयसमाकृतिरि[4]ति मायात एवोत्पन्नस्य प्रणवस्य वर्णाः अकारउकारमकाराः, परो बिन्दुः, तस्मात् मकारः, तस्मादुकारः,

---

1. क, ख, रा. वैखानसः विष्णुभक्तः………'
2. क, म2, ०त्प्रार्थ्यत्वं
3. क. व्यापकस्य पालकत्वेनैव सिद्धे सर्व०
4. क. ०ति। स मायायतन एव। उत्पन्नस्य.

तस्मादकारः, इति प्रवृत्तिक्रमः। [1]निवृत्तिक्रमस्तु-अकार उकारे विलीयते, उकारस्तु मकारे, मकारो बिन्दौ, बिन्दुरजायां, [2]सा तु ब्रह्मणि, इति व्यवस्थितिः। एवंभूतप्रण[3]वोत्था रुद्रविष्णुब्रह्माणः लयस्थितिसृष्टिकर्तारः। तेषां मेरुशिखरेषु लोका वर्तन्ते। ते तु तत्तदुपासकानां प्राप्याः सगुणत्वाद[4]नित्याश्च। यः सोऽहं ब्रह्मास्मीत्यात्मानमद्वितीयं वेद तस्य पुनः संसारप्राप्तिर्नेति किल सिद्धान्तः। भवान् विष्णुभक्तः तत्प्रीत्यै नित्यकर्म कुरु। ब्राह्मणानां कर्मप्राधान्यात्, (न हि) [मा] तप्तचक्रादिधारणं कुरु, तत्र प्रमाणाभावात्। आगम एव मानमिति यद्युच्येत, तथा न वक्तव्यम्। आगमस्य खण्डद्वयात्मकत्वात्-ग्राह्यखण्डोऽग्राह्यखण्डश्चेति। को वा ग्राह्यखण्डः निगमानुकूलस्तावत् ग्राह्यखण्डः। अग्राह्यस्तद्विरुद्धः। विरुद्धोऽपि [5]आगमस्य प्रामाण्यात् ग्राह्य इति यद्युच्येत, तर्हि ब्राह्मण्यहानिः स्यात्। 'न सुरां पिबेत्', 'न कलञ्जं भक्षयेत्', 'न परदारान् गच्छेत्', 'नाग्नीनुद्वासयेत्' इत्यादि निगमनिषेधेषु आगमग्राह्य[6]त्वं वामाचारोपदेशे वर्तते, [तथा] निगमविरोधोऽप्यस्तु [इति] आगमबलात् तदाचारनिष्ठां करोति यदि, यदि च तत्प्रतिग्राही भवति तदा स पतितो भवति। तस्मान्निगमसूत्रच्छेदिनो गतिरिहामुत्रापि न विद्यते। अतस्तप्तचक्रादिधारणं न युक्तमिति। एवमाचार्यैः प्रतिपादिते, व्यासदास उवाच—

स्वामिन्! यद्यागमाचारः न प्रमाणम् पूर्वस्मिन् युगे दत्तात्रेयः परमयोगविदपि पञ्चमुद्रामुद्रितः कथमासीत्? तस्मात् महद्भिः परिगृहीतो मार्गः शङ्खचक्रादिधारणपरः स्वीकर्तव्य एव। (किञ्च) पुराणेषु च दर्शनात्। यत्र यत्र वैष्णवधर्मा उक्ताः तत्र (तत्र) चक्राद्यङ्कनपुरस्सरमेव वर्तन्ते। तद्द्वाराऽपि

1. म2. लयक्रमस्तु अ०
2. क, म2, सा परब्रह्मणि
3. क. ०वोऽथ रु०
4. क. नित्यत्वाच्च.
5. 'आगमस्य' इत्यत आरभ्य 'नाग्नीनुद्वासयेत्' इति पर्यन्तः भागः नास्ति म2 मातृकायाम्।
6. क. ०त्वं च आचारोपदेशे



तदङ्गीकारः सिद्ध इति। [तस्मात्] भगवच्चिन्हाभावे वैष्णवत्वहानेः (तस्मात्) भगवच्चिन्हधारणमवश्यं कर्तव्यमिति पूर्वपक्षे प्राप्ते (तत्र) आचार्यैरिदमुच्यते—

'व्यासदास! भवदविवेकः किमु वक्तव्यः। मुद्राङ्किततनुर्दत्तात्रेय इति केन श्रुतम्? तस्य मुद्राद्यङ्कनेन किं प्रयोजनम्। परमयोगविदस्तस्य भूतजयवृत्तिनिष्ठस्य नियमाभावात्। स्वगात्रनिष्ठपञ्चीकृतपञ्चमहाभूतानि अपञ्चीकृतभूतेषु संयोज्य तस्मिन्नाक्षिप्तेऽहमत्रस्थ इत्युत्तरं (जल्पन् नास्ति) [जल्पतः] तस्य महायोगिनः बहिरङ्केन प्रयोजनमस्ति वा न वेति बाला अपि जानन्ति। किञ्च सर्वभूतानि स्वान्तः सर्वभूतान्तः स्वं च ध्यायतः जीवन्मुक्तस्य दत्तात्रेयस्य किं अङ्कनेन प्रयोजनम्। किञ्च स्वाविर्भूतकालादेकादशाब्दमितं ब्रह्मादीनां संपाद्य द्वादशदलपद्मदललिखितबीजमन्त्रार्चादिविदितमृत्युनिबर्हणहेतुभूतकालसङ्कर्षणीविद्या-कोविदस्य परमयोगिनः किं बहिरङ्कनेन। किञ्च कक्षपुटिमन्त्रराजविदितसकलजगन्नाथस्य बहिःप्रपञ्चेन मायाकृतचिन्हेन न हि किञ्चित्। [1]अष्टविभूतिसंपन्नस्य सर्वदेवपूज्यस्य किं बहिरङ्केन। तस्मात् चक्राङ्कनमवश्यं कार्यमिति मन्दबुद्धिं दुराचाररूढां परित्यज्य विगतचिन्हः सुखेन वर्तय। पुराणेषु भगवद्भक्तानां भगवच्चिन्हधारणं श्रुतमिति भवता उक्तम्, न हि तदप्यर्हम्। कथम्? को वा प्रह्लादस्य चक्राङ्कनं कारयामास। तस्य नृसिंहाविर्भावमूलत्वात् विष्णुभक्तिरस्तीति किं वक्तव्यम्। गजेन्द्रः केन चक्राङ्कितः तस्यार्तिपरिहाराय चक्रहस्तो विष्णुः कथमागतः। विभीषणस्य को वा बहिश्चिन्हमाचकार, रामः शाश्वतलङ्काधिपत्यं कथमदात्? ध्रुवः केन लिङ्ग्यभूत्, तस्य ब्रह्मलयपर्यन्तं स्थितिः कथमासीत्। [केन] द्रौपदी (केन) चिन्हेनाङ्किता; तस्याः स्मरणमात्रेण वस्त्रचयदाताऽभूत्। अतो व्यासदास। मूढबुद्धिं परित्यज्य बहिर्लिङ्गं, त्यक्त्वा चर्मविकारसाधनं, सोऽहम्भावेन त्यक्तभेदादिकल्मषः परं मोक्षमवाप्स्यसी'ति। भगवच्चिन्हं धारणीयमित्युक्तम्; सत्यम्। भगवद्देहनिष्ठं चिन्हं वा उत भगवद्धृतचिन्हं वा? नाद्यः; भगवद्देहे वक्षःस्थले

1. क, म1. अष्टभूतसं०

लक्ष्मीकौस्तुभचिन्हम् ; उदरे चतुर्दशभुवनचिन्हम् ; पादादिनाभिपर्यन्तमधोलोकचिन्हम्; अत ऊर्ध्वं ऊर्ध्वलोकचिन्हम् अक्ष्णोः सूर्यचन्द्रचिन्हम् ; जिह्वायामनन्तवेदचिन्हम्, एवमनेकानि चिन्हानि वर्तन्ते। समर्थश्चेत्तच्चिन्हावलम्बनं कुरु (यस्य) कस्यापि मनुष्यस्य भगवद्देहचिन्हासंभवात् प्रथमपक्षो दूषितः। न द्वितीयः, भगवत्करनिष्ठायुधचिन्हस्य अत्यन्तालभ्यत्वता तदाकाराकारिततप्तलोहचिन्हमिति चेन्न - कस्यापि विष्णुचक्रदर्शनाभावात्, शङ्खस्य च तथात्वात्। यथेच्छालोहतापोऽत्र विवक्षितो भवति। न हि तेन किञ्चित् प्रयोजनं चर्महानिमृते। चक्रस्य वर्तुलत्वं, शङ्खस्य च पृथुबुध्नाकारत्वं लोहेन परिकल्प्य कणाङ्गारेषु तप्तं कृत्वा ताभ्यां भुजयोरङ्कनं कारयामीति चेत्, मूर्खजनप्रतीतिः स्यात्। तथा च विष्णुतल्पं शेष इति विष्णुवाहं गरूड इति च लोहेन तद्रूपं च कृत्वा ताभ्यां चाङ्कनीयम्। भुजद्वयं शङ्खचक्राभ्यामङ्कितम्। एतत् द्वन्द्वं कुत्रेत्युक्ते कपोलयुगले अङ्क्यम्, भुजापेक्षया ऊर्ध्वकायस्य श्रेष्ठत्वात्, तत्र ज्ञानेन्द्रियबाहुल्याच्च। कर्मेन्द्रियप्रचुरे बाहुद्वन्द्वे चिन्हिते ज्ञानेन्द्रिय[1]सान्निध्ये कपोलयुगले च तप्ते ज्ञानकर्मभ्यां विना पशुवद्रन्तुमुचितो भवति। विधिनिषेधात्मकरज्जुद्वये भग्ने बन्धनिवृत्तिः स्यात्। ज्ञानकर्मरूपबन्धनिवृत्तौ जातायां यथेच्छाविहरणशीलत्वं युक्तमेव। (परत्र यमादिभ्यः) जितोभयलोकस्य तव [परत्र यमादिभ्यः] किं भयं वर्तते। वैष्णवोपाधिना स्मार्तकर्मपरित्यागं कुर्वतस्तव शुभ्रवस्त्रधारणमात्रमेवावशिष्यते, न त्वग्निहोत्रादिकं कर्म। अतः शुद्धवैष्णववृत्तिमाश्रित्य त्वं स्वस्थो भव इत्युक्तः व्यासदासः शङ्कराचार्यमिदमब्रवीत्—

स्वामिन्! यतिवर्य! भवत्कृपया जातविवेकोऽस्मि, नाहं चक्राद्यङ्कितः, किन्तु मद्गुरुः तदङ्कित इति श्रुतम्। वैखानसमतमवलम्ब्य किञ्चित्तत्रवर्त्तिनं मां शुद्धाद्वैतवर्त्तिनं कुरु इति विज्ञाप्य दण्डवदभिवाद्य संपुटितकरद्वयं ईषन्नम्रशि-

1. सान्निध्ये—सान्निध्यवति इत्यर्थः —टि.



रस्कं व्यासदासं दृष्ट्वा करुणासमुद्रः श्रीशङ्कराचार्यः प्रहसन्निदमाह - शृणु, व्यासदास। [अस्ति] भवतस्त्वनायासेन मुक्तिकारणम्।

ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावय।
तस्मिन् विधावशक्तस्त्वं वाक्यमेतदुदीरय॥

इत्यभ्यासपरित्यक्तद्वन्द्वैषणषड्र्मिकः।
विदित्वा परमात्मानं मुक्तो भवसि नान्यथा॥

इति सम्बोधितः शिष्यः कृतार्थोऽहमितीरयत्।
ब्रह्माहमिति सञ्जल्पन् ययौ स्वकुल[1]संवृतः॥

॥ इत्यनन्तानन्दगिरिकृतौ वैखानसमतनिबर्हणं नाम प्रकरणं नवमम्॥

॥ १० ॥

॥ कर्महीनवैष्णवमतनिबर्हणम्॥

एवं परिहृतेषु भक्तभागवतवैष्णवपाञ्चरात्रवैखानसेषु पुनरन्यः कर्महीनः प्रतिपक्षः समागतोऽभवत् नामतीर्थ इति। स तु श्रीशङ्कराचार्यं दृष्ट्वा इदमुवाच—

भो स्वामिन्! चिरकालाभ्यासपटिष्ठा भक्तादयः श्रीमद्भिः (निवृत्ताः) [निवर्तिताः] खलु। इतः परमागतं तृणीकृतकर्माणं विष्णुदासाग्रगण्यं नामतीर्थं मां विद्धि। विष्णुरेव गतिरिति निश्चितवता मया साधनान्तरं मन्त्रान्तरं गुर्वन्तरं देवतान्तरमपि न दृष्टं, सर्वं विष्णुमयं जगदिति गुरूपदेशात्। गुरुरेव मोक्षदः तदानीं भगवन्तमेवं[2] प्रार्थयते—'इमं मच्छिष्यं निजपदारविन्दं प्रापये'ति। एवं मद्गुरुभिरुक्तः भगवानपि तथा करोति। तस्मान्मम पुनर्जननहेत्वभावात्

1. क, म2, संयुतः 2. क. प्रार्थयेत्

जीवन्मुक्त एवाहम् । मन्मतमन्यथाकर्तुमसमर्थः शेषोऽपि । अतः सर्वे ब्राह्मणाः कर्महीनाः (इति) सुलभमनन्यदैवं विष्णुमवलम्ब्य भवन्तोऽपि मुक्ता भविष्यन्तीति नामतीर्थेन एवमुक्तः परमयतिः श्रीशङ्कराचार्य इदमाह—

भो नामतीर्थ ! मूढतरोऽसि ; किञ्चिदपि बाल्ये गुरुकुलवासं कृत्वा भवता नाधीतम् ! कर्मभ्रष्टस्य भवतः जीवन्मुक्तिरेवेति सत्यमुक्तं तावत् । ज्ञानिनः प्रवृत्तिः बालोन्मत्तपिशाचवत् किल लोके भवितव्या । अतो भवद्वृत्तिरपि निन्द्यानिन्द्यं विना वर्तमाना पिशाचवदभवत् । लोके मार्गद्वयं वर्तते—कर्ममार्गः; ज्ञानमार्गश्चेति । तत्राद्यः स्वर्गादिकामनया श्रुतिस्मृत्युक्तकर्मकरणम् । ज्ञानमार्गो नाम वेदोक्तसर्वकर्माणि कृत्वा तत्फलसमर्पणं भगवति परमेश्वरे कर्तव्यमिति पूर्वमुक्तम् । कर्मफलपरित्याग एव ज्ञानमार्गः आरुरुक्षुमार्गश्च । तस्मान्मार्गद्वयभ्रष्टं [1]त्वां प्रतिवक्तुमनुचितं 'कर्म कर्तव्य'मिति । 'ब्राह्मणः कर्म कुर्वीत' इत्यादि वचनानां सद्भावात् । एकदिनसन्ध्याकाललोपदोषपरिहारः प्राजापत्यकृच्छ्रत्रयेण भवति । बहुवर्षेषु गतेषु भवद्ब्राह्मण्यं किमु वक्तव्यम् । कर्मबहिष्कृतस्य विष्णुभक्तावपि अधिकारो नास्त्येव । उक्तश्च (भागवते) [विष्णुपुराणे][2] भगवद्भक्तस्य लक्षणम्—

न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ।
न जहाति न च हन्ति किञ्चिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तम् ॥
[विष्णुपुराणम् ३-७-२०]

तस्मान्निजवर्णधर्माच्चलितस्य तव ब्राह्मण्याभावात् सुतरां विष्णुभक्तिः नास्त्येव । कर्मप्रतिपादकानां भगवद्वाग्रूपाणां वेदानामुल्लङ्घनात् ।

[3]'श्रुतिस्मृतिसदाचारा आज्ञारूपा हि मे मताः
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः'

1. क. म2. त्वां दण्डिनं कर्तव्यम् । ब्राह्मणः कु० 2. म2. मातृकास्थपाठः
3. क. मुद्रितपुस्तकस्थपाठोऽयम् ।



इति भगवद्वचनात्, श्रुतिस्मृती भगवदाज्ञे । अतो भगवदाज्ञाच्छेदिनस्तव तद्भक्त्यधिकारमात्रमपि न ; गायत्रीमन्त्रमृते ब्राह्मण्याभावात् मन्त्रान्तरमवश्यमङ्गीकर्तव्यं साधनान्तरम्, जातकर्मादिकर्म गुर्वन्तरं देवतान्तरञ्च । 'अग्निर्देवो द्विजातीना'मिति वचनात् अग्निपरित्यागे कृते [ब्राह्मणः] पतितो भवति । एवं चतुर्णां विद्यमानत्वात् तदनुष्ठानाभावे महापातकदर्शनाच्च । ब्रह्मचारिगृहिवानप्रस्थैः केन धैर्येण कर्मत्यागः कर्तुं शक्यते परमहंससन्यासं विना, तेषां विधिदर्शनात्—

'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' [म. ना. ८-१४]

इति ।

तस्मात् भवान् सभां गत्वा द्वादशप्रदक्षिणनमस्कारान् कृत्वा समस्तापराधं क्षमध्वमिति विश्वासपूर्वकं संप्रार्थ्य ब्रह्मदण्डं समर्प्य ब्राह्मण्यं संपाद्य कृतार्थो भव इति श्रीशङ्कराचार्यैरुक्तः नामतीर्थः प्रणामशतेन गुरुप्रीतिं कृत्वा ब्राह्मणकर्मशीलः सगणोऽभवत् । तत्तन्मतज्ञानवादिनश्च स्वस्वसिद्धान्तनिरसनमाचार्यकृतं दृष्ट्वा सर्वे कृतप्रायश्चित्ताः त्रिपुण्ड्रधारिणः पञ्चयज्ञपूजापरायणाः शुद्धाद्वैतमतावलंबिनो निगमाचारपरतन्त्रा बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ कर्महीनवैष्णवमतनिबर्हणं नाम प्रकरणं दशमम् ॥

॥ ११ ॥

## ॥ हैरण्यगर्भमतनिबर्हणम् ॥

तदनन्तरं अनन्तशयनात् पश्चिममार्गेण पञ्चदशदिनैः सुब्रह्मण्यं नाम कुमारा-[1]विर्भावस्थलं सकलदेशिकः शिष्यैस्सेवितः श्रीशङ्कराचार्यः प्राप ।

स्नात्वा कुमारधारायां नद्यां शिष्यसमन्वितः ।
भक्त्या संपूजयामास षण्मुखं शेषरूपिणम् ॥

1. म2. ०विर्भूतस्थ०

काषायवस्त्रदण्डाढ्यः कमण्डलुलसत्करः ।
भूतिभूषितसर्वाङ्गो बभौ रुद्र इव स्वयम् ॥

नानादेशस्थविप्रौघाः सुब्रह्मण्यं समागताः ।
दृष्ट्वा तं शङ्कराचार्यमिदमूचुः सुविस्मिताः ॥

ब्राह्मणा वयं ब्रह्मकुलजाः किल मन्वादिस्मृत्युक्ताचारशीलाः हिरण्यगर्भोपासनापरिलब्धमनःस्थैर्याः सर्वं ब्रह्मनिर्मितं जगदिति ब्रह्मण एव सृष्टिस्थितिलयकर्तृत्वं [1]निश्चित्य वसामः । तादृङ्मन्त्रवर्णदर्शनाच्च—

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
[कृ. य. सं. ४-२-८]

एतदृचा हिरण्यगर्भश्चतुर्मुखो ब्रह्मा अग्रे जगदादौ समवर्तत । भूतस्य आकाशादिप्रपञ्चस्य पतिः स्वामी । तस्मादेव आकाशाद्युत्पत्तिरित्यर्थः । अयं हिरण्यगर्भः एक एव जातः—परब्रह्मणः निर्गुणात् सत्यज्ञानानन्तलक्षणात् आविर्भूतः एक एव हिरण्यगर्भ इत्यर्थः । स चादावेक एवासीदिति । एवकारः इतरसत्तामात्रनिवृत्तिकरः । स पृथिवीं उत द्यां दिवं इमां दाधार धृतवानित्यर्थः । तादृशं ब्रह्माणमृते कस्मै देवाय हविषा विधेम । अतः सर्वक्रतुषु हविर्भोक्तृत्वं ब्रह्मण एव घटते । किञ्च सर्वदेवापेक्षया ब्रह्मण एव परमत्वं श्रूयते । 'ब्रह्मा हि परः परो हि ब्रह्म' [म. ना. १६-१२] इति द्विरुक्तया एतदपेक्षया परं नास्तीत्यर्थः । किञ्च, वारुणोपनिषदि - 'सैषानन्दस्य मीमांसा भवति' [तै. उ. २-८] इत्युपक्रम्य 'स एको ब्रह्मण आनन्दः' [तै. उ. २-८] इत्यन्तेन ग्रन्थेन सर्वापेक्षया ब्रह्मानन्दस्य श्रेष्ठत्वं दर्शितम् । ततः परानन्दस्याभावात् । स चतुर्मुखः 'तत्सृष्ट्वा, तदेवानुप्राविशत् , तदनुप्रविश्य , सच्चत्यच्चाभवत्' [तै. उ. २-६] इति । श्रुतेः

1. म2. निश्चयं कृत्वा व०



अयमर्थः — तत् कार्यरूपं जगत् सृष्ट्वा उत्पाद्य [स चतुर्मुखः] तदेव — स्वसृष्टमेव अयं एवकारो देहलीदीपन्यायेन अनुप्राविशदित्यनेनापि संबध्यते अनु — कार्यसृष्टिमनु प्रविष्टोऽपि ब्रह्मा तत्प्रपञ्चं अनुप्रविश्य सच्च तेजोबन्नरूपम् , त्यच्च वाय्वाकाशरूपम् , चकारात् एतत्पञ्चभूतरूपशरीरान्तर्गतबुद्ध्यादिप्रेरकजीवरूपं च अभवत् । 'बहुस्यां प्रजायेय' [ तै. उ. २-६ ] इत्यादिवचनेभ्यः सर्वप्रपञ्चस्य ब्रह्मरूपत्वं ब्रह्माधारकत्वं च निवृत्तिदशायां ब्रह्मण्येव लीनत्वं च सिद्धं भवति । अतः सर्ववेदप्रतिपाद्यमानस्य हिरण्यगर्भस्य श्रेष्ठत्वम् । तस्य दक्षिणवामबाहुभ्यां विष्णुरुद्रोत्पत्तिदर्शनाच्च । तद्भक्ताश्च तत्संबन्धिकमण्डलुकूर्चादिचिन्हिताः क्रमात् कर्मज्ञानमार्गद्वयावलंबिनः जगद्विधि, होमविधि, कर्मविधि, विप्रविधि, शुद्धब्रह्म, कमण्डलुकीर्ति, यागकूर्च, ब्रह्मवेदी, बृहत्कुक्षि, विमतविधि, वेदपाणि, निगमसूत्रश्रुतिपारीण, निगमसुनि, स्वाध्यायधर्म, ब्रह्मकर्म, वेदकर्म, मुनिकर्म, युगपितामह, गुरुपरमेष्ठि, द्विजपितामहादयः वयं भवन्तं यतिमीक्ष्य कृतार्थाः स्मः ॥ किञ्चिदस्माभिः विज्ञापितमवधारय । किं अद्वैतेन प्रयोजनम् । प्रथमजीवात् हिरण्यगर्भात् सर्वे जीवा जाताः । प्रभुर्ब्रह्मा लये एतान् सर्वान् संभूतान् ब्रह्माण्डादितरे स्वोदरे निवेश्य स्वयमेक एव वर्तते । सृष्टौ पुनस्तान् स्वस्वकर्मगोलान्तस्थान् निजप्रकृत्या संयोज्य जन्ममरणप्रवाहसक्तानकरोदिति मद्गुरुभिरुपदिष्टः परमार्थः । ब्रह्मकुक्षिप्राप्तिकाले मोक्ष एव । 'ब्रह्मविदाप्नोति पर' [ तै. उ. २-१-१ ] मिति श्रुत्या चतुर्मुखस्वरूपज्ञानेन तन्मन्त्रोपासनेन च ब्रह्मवित् ब्रह्मस्वरूपज्ञः परं मोक्षं अवाप्नोति । ब्रह्मलोके विष्णुरुद्रादिदेवगोचरे चतुर्मुखकमण्डलुकूर्चादिचिन्हधरो मुक्तः क्रीडति । तस्मात् भवान् कमण्डलुदण्डपाणिः ब्रह्मलोकयोग्य एव मदीयस्नेहाद्विशेषतो भवतीति हिरण्यगर्भैरुक्तः परमगुरुः श्रीशङ्कराचार्यः पठति—

'यतो वा इमानि भूतानि जायन्ते , येन जातानि जीवन्ति , यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति' [तै. उ. ३-१] [इति] ज्ञानार्थिनं भृगुमुद्दिश्य पित्रा वरुणेन एवमुक्तम् । इमान्याकाशादीनि पञ्चभूतानि भौतिकदेहोपेतहिरण्यगर्भादिस्तम्बपर्यन्ताः सर्वे प्राणिनः यतो वस्तुनो जायन्ते — वैशब्दः 'स इमान्

लोकानसृजत' [ऐ. उ.१-२] इत्यादिश्रुत्यन्तरप्रसिद्धिद्योतनार्थः। उत्पन्नानि चभूतानि येन वस्तुना जीवन्ति स्थितिं – लभन्ते। प्रयन्ति—विनाशं प्रतिपद्यमानानि इमानि भूतानि यद्वस्त्वभिसंविशन्ति—साकल्येन प्रविशन्ति यथा फेनतरङ्गबुद्बुदानामुत्पत्तिस्थितिलयाः समुद्रे भवन्ति तद्वत् जगदुत्पत्तिस्थितिलयकारणं वस्तु विचारय। तदेव वस्तु त्वया पृष्टं ब्रह्म।

तस्य लक्षणन्तु 'सत्यं ज्ञानमनन्तं ब्रह्म' [तै. उ. २-१] इति। सत्यं सर्वविकारविलक्षणम्। तर्हि अभावरूपं जडमिति, अत आह—ज्ञानं अभावजडविलक्षणम्। यद्यभावविलक्षणो भावविशेषः, तर्हि घटादिकमपि तथेत्यत आह —अनन्तं देशकालवस्तुपरिच्छेदशून्यम्। एतावत्युच्यमानेऽभावः स्यात्, ततः अस्य व्यवच्छेदार्थमाह—सत्यमिति। सत्यमनन्तमित्युच्यमाने जडमपि स्यात्, तद्व्यावृत्यर्थं ज्ञानमित्याह। यद्यपि ज्ञानमनन्तमित्युच्यमाने सत्यपदस्य न कृत्यं ज्ञानस्यासद्विलक्षणत्वात्, तथापि ज्ञानमसदिति सर्वासद्वादिनः सङ्गिरन्ते तत्पक्षाधिक्षेपार्थं सत्यमित्याह॥

अयं भावः—येनापि सर्वासत्त्वमङ्गीक्रियते तेनापि अङ्गीक्रियत एव सत्त्वम्। अन्यथा असत्त्वस्याप्यनुपपत्तेः। ततो निरपेक्षत्वादिहेतुभ्यः सत्त्वस्याङ्गीकारे करणीये तादृशसत्यत्वं जडवैलक्षण्यं च स्वयंप्रकाशानन्दात्मन एव, विद्यया सकलदुःखनाशदर्शनात्। एवञ्चेत्, [सत्यं] ज्ञानमित्येवास्तु, कृतमनन्तपदेनेति न मन्तव्यम्। अन्तःकरण (विद्या) वृत्तेरपि ज्ञानशब्दाभिधेयत्वात् तदेव ज्ञानं इदमपि इति बुद्धिनिवारणार्थं अनन्तपदस्योपयोगात् पदत्रयम्। इदं स्वरूपलक्षणम्। अखण्डैकरसं ब्रह्म बृहतेर्धातोरर्थभूतं सर्वैर्मुमुक्षुभिरुपासनीयम्। तदिच्छा प्रकृतिः, तत्सृष्टं महदादिसर्वं जगत्; तस्मात् मायागर्भान्तर्गतस्य हिरण्यगर्भस्योपासनया मोक्षो नास्त्येव। तस्य किञ्चित्फलदत्वात्।

तर्हि ब्रह्मणोऽपि उपासनया मोक्षो नास्त्येव, तद्विचारस्याशक्यत्वात्। अतः प्राप्तमविचार्यमेव ब्रह्मेति।



उच्यते—एतद्विचारकर्तव्यता च प्रथमाध्यायस्य प्रथमपा[1]दे बहुधा चिन्तिता।

[2]अविचार्यं विचार्यं वा ब्रह्माध्यासानिरूपणात्।
असन्देहाफलत्वाभ्यां न विचारं तदर्हति॥

अध्यासोऽहंबुद्धिसिद्धः असङ्गं ब्रह्म श्रुतीरितम्।
सन्देहान्मुक्तिभावाच्च विचार्यं ब्रह्म वै ततः॥ इति॥

'आत्मा वा अरे द्रष्टव्यः' [बृ. उ. २-४-५] इत्यत्र आत्मदर्शनफलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि तात्पर्यं निर्णेतुमनुकूलो न्यायविचारः; तदेतद्विचारविधायकं वाक्यं विषयः श्लोकद्वयेन संगृहीतः। सन्देहसङ्ग्रहेणैव अर्थात्सङ्ग्रहप्रतीतेः। ब्रह्मविचारात्मकं शास्त्रमारभ्यमनारभ्यं वेति सन्देहः। पूर्वोत्तरपक्षयुक्तिद्वयं सर्वत्र सन्देहबीजमुन्नेयम्। तत्र अनारभ्यमिति तावत् प्राप्तम्। विषयप्रयोजनयोरभावात्। सन्दिग्धं हि विचारस्य विषयः। ब्रह्म तु असन्दिग्धम्। तथाहि—तत्किं ब्रह्माकारेण सन्दिह्यते, उत आत्माकारेण। नाद्यः — 'सत्यं ज्ञानमनन्तं ब्रह्म' [तै. उ. २ १-१] इति वाक्येन ब्रह्माकारस्य निश्चयात्। न द्वितीयः — अहंप्रत्ययेन आत्माकारस्यापि निश्चयात्। अध्यस्तात्मविषयत्वेन भ्रान्तोऽहंप्रत्यय इति चेन्न—अध्यासानिरूपणात्। तमःप्रकाशवद्विरुद्धस्वभावयोः देहात्मनोः शुक्तिरजतवत् अन्योन्यतादात्म्याध्यासः न निरूपयितुं शक्यते। तस्मादभ्रान्ताभ्यां श्रुत्यहंप्रत्ययाभ्यां निश्चितस्यात्मनः असन्दिग्धत्वात् न विचारस्य विषयोऽस्ति। नापि प्रयोजनम्, उक्तप्रकारेण ब्रह्मात्मनि निश्चितेऽपि मुक्त्यदर्शनात्। तस्मात् ब्रह्म न विचारमर्हतीति शास्त्रमनारम्भणीयमिति पूर्वपक्षिभिः आक्षिप्ते उच्यते—

---

1. रा. ०दे विचारितम्।
2. शिष्यबुद्धिव्युत्पादनार्थं 'अविचार्यं' इत्यत आरभ्य 'फलमप्युक्तमेव भाष्ये' इति पर्यन्तो भागः निवेशितः। वैयासिकन्यायमालायां इयं आनुपूर्वी दृश्यते।

शास्त्रमारम्भणीयम् । विषयप्रयोजनसद्भावात् । श्रुत्यहंप्रत्यययोः विप्रतिपत्त्या[1] सन्दिग्धं वस्तु ब्रह्मात्मकमस्ति। 'अयमात्मा ब्रह्म' [बृ. उ. २-५-१९] इति श्रुतिः असङ्गं ब्रह्म आत्मत्वेनोपदिशति । 'अहं मनुष्य' इत्याद्यहंबुद्धिः देहादितादात्म्याध्यासेनात्मानं गृह्णाति । अध्यासस्य दुर्निरूपणत्वमलङ्काराय । तस्मात् सन्दिग्धं ब्रह्मवस्तु विषयः । तन्निश्चयेन मुक्तिलक्षणप्रयोजनमस्त्येव । श्रुत्या विद्वदनुभवेन प्रसिद्धं च । तस्माद्वेदान्तवाक्यविचारमुखेन ब्रह्मणो विचारार्हत्वात् शास्त्रमारम्भणीयमिति सिद्धान्तः । विचारस्तु लक्षणप्रमाणाभ्यां वस्तुतत्त्वनिर्णयावधिकः, निर्णयानन्तरं अखण्डं ब्रह्म स्वयमेव भातीति निश्चयः । परब्रह्मांशजातब्रह्मविष्णुरुद्राणां परंपराकर्तृत्वात् तदुपासनया फलमप्युक्तमेव (भाष्ये) ।

[2]अतो भो ब्राह्मणाः ! कमण्डल्वादिचिन्हधारणं परिहर्तव्यम् । बृहन्नारदीयादिवचनविरोधात् । कूर्चादिवत् चतुर्मुखत्वादेः चिन्हस्य कर्तव्यत्वापत्तेश्च । हिरण्यगर्भ एव परममूलकारणमित्यप्यसङ्गतम् ।

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवं आत्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये [श्वे. उ. ६-१८]

इत्यादिश्रुत्या ब्रह्मणः उत्पत्त्यादिश्रवणात् । जगतः परममूलं 'सत्यं ज्ञानमनन्तं ब्रह्म' [तै. उ. २-१-१] इत्यादिश्रुतिप्रतिपाद्यं निर्गुणं ब्रह्मैव। 'यतो

---

1. म2. ०त्या ब्रह्मात्मवस्तु । अयं ०

2. 'अतो' इत्यत आरभ्य 'आचार्यं नत्वा तथा चक्रुः' इति पर्यन्तो भागः नास्ति म2 मातृकायां । 'अतो ब्रह्मकमण्डलुकूर्चादिधारणं पाषण्डमूलकं परित्यज्य शुद्धाद्वैतवृत्तिमाश्रित्य यूयं स्वस्था भवथ जगद्विधिहोमविधिप्रमुखाः । एवं सम्यक् आचार्योपदिष्टाः ते हिरण्यगर्भवादिनः जगद्विधिप्रमुखाः शङ्कराचार्यपादकमलद्वयमभिवाद्य शुद्धाद्वैतवृत्तिपरायणाः शिष्या बभुवुः ' इति पाठः उपलभ्यते ।



वा' [तै. उ. ३-१] इत्यादिश्रुतयश्च तत्परा एव। अत एव 'हिरण्यगर्भ' [कृ. य. सं. ४-२-८] इति श्रुतौ 'जात' इति पदं सङ्गच्छते । सत्यादिस्वरूपब्रह्मणः सकाशादुत्पन्न इति तदर्थः । किञ्च चतुर्मुखत्वादिसाकारोपासनायाः भेदघटितत्वेन मुक्त्यभावप्रसङ्गः । तथा हि श्रूयते—'उदरमन्तरं कुरुतेऽथ तस्य भयं भवति' [तै. उ. १-७] इति। जीवब्रह्मणोः यः अरं ईषत् अन्तरं भेदं कुरुते, अथ तस्य भयं संसारो भवतीत्यर्थः। तस्मात् 'तत्त्वमसि' [छा. उ. ६-८-७], 'अहं ब्रह्मास्मि' [बृ. उ. १-४-१०] इति देशिकोक्तमार्गेण जीवब्रह्मणोर्भेदं परित्यज्य अभेदभावनया मुक्ता भवथेति आचार्येण बोधिताः ते हिरण्यगर्भवादिनः जगद्विधिप्रमुखाः ब्राह्मणाः 'ओं तथा' इत्युक्त्वा आचार्यं नत्वा तथा चक्रुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ हैरण्यगर्भमतनिबर्हणं नाम एकादशं प्रकरणम् ॥

॥ १२ ॥

## ॥ अग्निवादिमतनिबर्हणम् ॥

एवं परिहृतेषु हैरण्यगर्भेषु पुनरन्ये सुहोत्रवीतिहोत्रकव्यवाहनादयः अग्निमतानुवर्तिनः प्रत्यवतिष्ठन्ते । ते च श्रीशङ्कराचार्यमिदमूचुः—स्वामिन् ! अग्निरेवास्माकं देवता ; कथम् ? मन्त्रवर्णात्—

अग्निरग्रे प्रथमो देवतानां सञ्जातानामुत्तमो विष्णुरासीत् ।
यजमानाय परिगृह्य देवान् दीक्षया एतं हविरागच्छतं नः ॥
[तै. ब्रा. २-४-३]

अग्रे सृष्टेः पूर्वकाले सर्वेषां देवतानां प्रथमः ज्येष्ठः अग्निरेवासीत् । तस्मात् सञ्जातानां सम्यगग्निमनुसृत्य जातानां मध्ये विष्णुरुत्तम आसीत् । यतो दीक्षया यजमानाय देवान् परिगृह्य नः अस्माकं एतं हविः आगच्छतम् ; यस्य हविः भवति तस्य तत् प्रापय इत्यर्थः । 'अग्निमुखा वै देवा' इति मन्त्रान्तरात्, तस्य सर्वोत्कृष्टत्वं प्राप्तम् । ब्राह्मणैः तदुपासनायां क्रियमाणायां

तच्चिन्हानां विस्फुलिङ्गरूपमणिशलाकानां धारणं कर्तव्यमेव। ब्राह्मणोचितस्य कर्मणः श्रौतस्मार्तरूपस्य तत्कारणत्वात्, 'अग्निर्देवो द्विजातीना'मिति वचनाच्च, ब्राह्मणानामस्माकं अग्निरेव देव इति सिद्धम्। तस्यैव सर्वपापहरत्वं नारायणोपनिषदि श्रूयते—

उद्दीप्यस्य जातवेदोऽपघ्नन् निर्ऋतिं मम।
पशूँश्च मह्यमावह जीवनं च दिशो दिश॥ [ना. उ. ५]

इति॥

अयमर्थः—हे जातवेदः! उद्दीप्यस्व, [1]उत् - अधिकं, दीप्यस्व मम निर्ऋतिं अपघ्नन् संहरन् (इत्यर्थः), मह्यं मे पशूनावह पशूनां चतुष्पदां धेनुप्रमुखानां दानं कुर्वित्यर्थः। जीवनं च द्रव्यं धान्यं च, 'श्रियमिच्छेत् हुताशनात्' इति वचनात्, दिशः प्रागादिदिक्षु मम यत्र सुखवसतिः भवति तान् दिशो [2]दिश दर्शयेत्यर्थः। अतः सर्वैः विप्रैः अग्निरेक एव उपासनीयः। तस्माद्भवन्तोऽपि अग्न्युपासनया कृतार्था भवथ इति प्राप्ते—

आचार्यैरिदमुच्यते — नायमग्निः परो देवः; कस्मात्? मन्त्रवर्णात्। ऋग्ब्राह्मणे अग्नेरवमत्वदर्शनात्—

'अग्निर्वै देवानामवमः विष्णुः परमः तदन्तरेण सर्वा अन्या देवताः' [ऐ. ब्रा. १-१-१] इति। एवं देवानां मध्ये अग्नेरवमत्वम्। विष्णोः व्यापकचैतन्यस्य ब्रह्मणः परमत्वम्। तदन्तरेण तद्द्वयमध्ये अन्या सर्वा देवता इति। एवं वेदार्थे स्थिते कथमग्नेः परत्वं वक्तुं शक्यते। किन्तु, देवानामवम इति देवानां पुरोहितः हविर्भागद इत्यर्थः। कर्मण एव अग्निर्देवता, न तु ज्ञानस्य। तथाऽपि कर्मद्वारा ज्ञानकारणमपीति चेत् [न] तस्य भूतेन जन्यत्वश्रवणात्, गृहस्थानां श्रौतादि कर्मणि प्राप्ते सत्युपास्यदेवतामात्रं कल्पनीयम्, 'अग्निमीडे पुरोहितम्' [ऋ.स.१-१-१]

---

1. म$_{2}$, मातृकास्थपाठोऽयम्। 2. म$_{2}$. ०श देशीयर्थः।



मित्यादि श्रुतेः। यत्र यत्र अग्निदेवताकारणवाक्यानि वर्तन्ते तानि (तानि) सर्वाण्यपि भूताग्निपराण्येवेति योजनीयम्। [1]तस्मात् भवन्तः कर्माधीनमात्रमेवाग्नौ कृत्वा सर्वव्यापकचैतन्योपासनया शुद्धाद्वैतवृत्तिमाश्रित्य मुक्ता भविष्यथ इत्येवमाचार्यैः उक्ताः सुहोत्रादयः श्रीशङ्कराचार्यगुरुं प्रणम्य तत्कटाक्षात् स्वीकृताद्वैतवृत्तिनः स्वस्था बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ अग्निवादिमतनिबर्हणं नाम द्वादशं प्रकरणम्॥

## ॥ १३ ॥

## ॥ सौरमतनिबर्हणम् ॥

ततः पूर्णमण्डलतिलकाः रक्तकुसुमधारिणः सूर्यभक्ता दिवाकरादयः श्रीशङ्कराचार्यमिदमूचुः — स्वामिन्! [2]अस्मन्मतमनन्यभेद्यम्, यतः सूर्यः

---

1. 'तस्मात् कर्मण एवाग्निर्देवता ब्रह्मणोंऽशभूता। तदुपासनया क्षयिष्णुतल्लोकवासादिफललाभेऽपि मुक्त्यसंभवात्। तस्मात् कर्माङ्गतयैव अग्न्युपासनं कृत्वा, जीवनञ्च द्रव्यं धान्यं च 'श्रियमिच्छेत् हुताशनात्' इति वचनबोधितं फलं प्राप्य सर्वव्यापकचैतन्योपासनां शुद्धाद्वैतवृत्तिमाश्रित्य मुक्ता भविष्यथ, तच्चिन्हधारणं च परिहर्तव्यं प्रमाणाभावात् इत्याचार्यैः उक्ताः सुहोत्रादयः श्रीशङ्कराचार्यं गुरुं प्रणम्य तत्कटाक्षस्वीकृताद्वैतवृत्तिनः तथोक्तं चक्रुः' इति क० मुद्रितपुस्तके।

2. क. 'अस्मन्मतम्' इत्यत आरभ्य 'मतानुवर्तिनः' इति पर्यन्तो भागः नास्ति। किन्तु अधोनिर्दिष्टपाठः उपलभ्यते—

सूर्य एव परमात्मा जगत्कारणं वर्तते। स एव अस्माकं कुलदैवतमुपास्योऽस्ति। तस्य जगत्कारणत्वं श्रुतय एवाहुः। तथा हि—'सूर्य आत्मा जगतः तस्थुषश्च' 'असावादित्यो ब्रह्मेति'। आभ्यां हि सूर्यस्य सर्वात्मत्वं अस्यैव च परब्रह्मत्वं च प्रतिपादितं भवति। ब्रह्मैव स सर्वजगत्कारणं 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतेः स्मृतिश्च—

नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने॥ इति॥

तस्मादेतस्य 'घृणिस्सूर्य आदित्यो' इति अष्टाक्षरमन्त्रोपासकाः रक्तचन्दन०

सर्वलोकचक्षुः किल। स एव ब्रह्मादिस्वरूपः। तस्मात् सृष्टिस्थितिलयहेतुभूतः स एव परमात्मा भवितुमर्हति। 'सूर्य आत्मा जगतस्तस्थुषश्च' [कृ. य. सं. १-४-३४] इति श्रुतेः। किञ्च परब्रह्मत्वं तस्यैव घटते। 'असावादित्यो ब्रह्म' [तै. आ. २-२] इति श्रुतेः। तस्यैव भगवतः परमो मन्त्रः अष्टाक्षरः—'घृणिस्सूर्य आदित्यो न प्रभावात्यक्षरम्, मधुक्षरन्ति तद्रसम्, सत्यं वै तद्रसमापोज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्' [तै. आ. १०-३७] इति ऋगन्तर्वर्ती भगवदष्टाक्षरो मन्त्रः। तमेव व्याकरोति श्रुतिः — 'घृणिरिति द्वे अक्षरे। सूर्य इति त्रीणि। आदित्य इति त्रीणि। एतद्वै सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तम्। य एवं वेद। श्रियाहैवाभिषिच्यते' [काठक. १-९] इति एतन्मन्त्रोपासकाः सूर्यमतानुवर्तिनः रक्तचन्दनपूर्णपुण्डमाल्यधारिणः षड्विधा भक्ता वर्तन्ते। केचिदुदयसूर्यमण्डलं ब्रह्मात्मकत्वेन सृष्टिकारणमिति भजन्ति। केचित्तु [अस्तमयकालबिम्बं] (खमध्यवर्तिनं) सूर्यं ईश्वररूपेण सर्वजगल्लय-कारणमिति भजन्ति। उपसंहारबलात उपक्रमोपि तेनैव भवतीति च निश्चयज्ञानेन भजन्ति। केचित्तु [खमध्यवर्तिनं] (अस्तमयकालबिम्बं) सूर्यं विष्णवात्मकत्वेन सर्वजगत्परिपालनकारणं, तदेव सृष्टिलयहेतुभूतं परतत्त्वमिति भजन्ति। केचित् त्रिमूर्त्यात्मकत्वेन त्रिकालमण्डलसेविनः, केचिन्मण्डले क्षणव्रतानुष्ठायिनः तन्मध्यवर्तिनं परमात्मानं 'हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णः', [छा. उ. १-६-६] 'तस्य यथा कप्यासं पुण्डरीकम्' [छा. उ. १-६-७] इत्यादिस्वरूपं भजन्ति। तत्र एकदेशिनस्तु भगवदीक्षणमात्रव्रतपराः सम्यङ्-मण्डलं दृष्ट्वा षोडशोपचारपूजां समर्प्य कर्मफलं भगवदर्पणं कृत्वा वसन्ति, न दर्शनं विनाऽश्नन्ति। पुनः केचित्तप्तलोहेन फालभुजवक्षःस्थलेषु मण्डल-चिन्हानि धृत्वा स्वमनस्येव देवतामनुक्षणं ध्यायन्तः सन्ति। तेषां षण्णामय-मेक एव मन्त्रः उपासनीयः 'घृणिस्सूर्य आदित्यो' इति। तत्र अनुस्वारलोपश्छान्दसः। तस्मादेतन्मन्त्रस्य श्रेष्ठत्वादयमेव सर्वैरुपासनीयः। तन्मण्डलस्तुतिपराः श्रुतयो बह्व्यः सन्ति। तथा हि—'हंसश्शुचिषद्वसुरन्त-



रिक्षसत्' [तै. आ. १०-१२] इति। 'आदित्यो वा एष एतन्मण्डलं तपति' [तै. आ. १०-१४] इत्युपक्रम्य 'य एवं वेद, इत्युपनिषत्' [तै. आ. १०-१५] इत्यन्तेन ग्रन्थेन 'ब्रह्मैतदमृत एष पुरुषः' [तै. आ. १०-१५] इति सूर्यस्यैव ब्रह्मत्वं पुरुषत्वञ्च घटते। 'सहस्रशीर्षा पुरुषः, सहस्राक्षस्सहस्रपात्, स भूमिं विश्वतो वृत्वा, अत्यतिष्ठत् दशाङ्गुलं, पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यं, उतामृतत्वस्येशानः' [तै. आ. ३-१२] इत्यादिपुरुषसूक्तप्रतिपादितः सूर्य एव। कथम्? मण्डलादुपरि तमोनिवृत्तये प्रसृता रश्मयः शीर्षाणि तान्यस्य सन्तीति सहस्रशीर्षाः। स एव आत्मत्वेन पुरीतति अन्तः शेते इति पुरुषः, शस्य षः (पुरुषः)—

> 'पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः।
> शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते'॥ इत्युक्तेः।

तस्य सर्वप्राणिकर्मसाक्षित्वात् सहस्राक्षः। अधः प्रसृता रश्मयः सहस्र-पादाः, तस्य ते सन्तीति सहस्रपात्। स एव भूमिं विश्वतः समन्तात् वृत्वा—व्याप्य ब्रह्ममानेन भूम्युपरि सूर्यपर्यन्ताकाशस्य दशाङ्गुलपरिमाणमात्रत्वात् दशाङ्गुलमतिक्रम्य अतिष्ठत् — स्थित इत्यर्थः। इदं - परिदृश्यमानं जगत् सर्वं पुरुष एव — सूर्य एवेत्यर्थः। यद्भूतं—पूर्वकल्पे यद्वृत्तं तदपि, यच्च भव्यं — वर्तमानकालापेक्षया भवितव्यं यज्जगत् वर्तते तद्भव्यमित्युच्यते, तदपि स एव, उत अमृतत्वस्य — मोक्षस्य तत्कारणस्य च ईशानः — कर्ता इत्यर्थः। इत्यादिमन्त्रैः सूर्यस्यैव सर्वोत्तमत्वमङ्गीकर्तव्यम्। 'अतो ज्यायांश्च पूरुषः' [तै. आ. ३-१२] इत्यत्र बहुवारपठितपुरुषशब्देन 'एष पुरुष' इति शब्दसाम्यात् सर्ववेदप्रतिपादितः सूर्य एक एव। 'पुरुषं कृष्णपिङ्गलम्' [तै. आ. १०-१३] इत्यादिरुद्रप्रतिपादकमन्त्रस्थपुरुषशब्दोऽपि भगवत्पर एव। भगवत्पुरुषशब्दावु भावपि सूर्यपरावेव। कथम्? हन्ति सर्वदा गच्छतीति हंसः। शुचिषु शुद्धेषु

प्रदेशेषु सीदतीति शुचिषत्। वसुः वसुदेवः, स एव वासुदेवः। तस्मिन् भगवत्पुरुष [1]शब्दावनुपाधिकौ वर्तेते।

'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधी प्रवर्तेते वासुदेवे सनातने ॥ इति भारतवचनात्।

ननु नेमौ सूर्यप्रतिपादकौ भगवत्पुरुषशब्दौ, किन्तु नारायणप्रतिपादकौ। तथा हि—वसुदेवस्यापत्यं पुमान् वासुदेवः कृष्ण इत्यर्थः। तस्मिन् पूर्णब्रह्मरूपे कृष्णे भगवत्पुरुषशब्दौ निरुपाधिकौ वर्तेते प्रकरणबलादित्याक्षिप्ते—

सूर्यपक्षावलम्बी पुनराह — भगवत्पुरुषशब्दौ उभावपि सूर्यपरावेव, तस्यैव विष्णुरूपत्वात्। कथम्? भगवतः सूर्यस्य द्वादशभेदात्मकत्वेन विष्णुनाम्नः तदन्तःपातित्वेन च तद्विरोधो नास्त्येव। 'अरुणस्सूर्यो भानुः तपनश्चन्द्रो रविर्गभस्तिश्चार्यमा हिरण्यरेता दिवाकरो मित्रो विष्णुश्चे'ति वचनात्, ''आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान्' [भ. गी.१०-२१] इति कृष्णवचनदर्शनाच्च कृष्ण एव सूर्यः। वासुदेवशब्दसाम्याच्च। 'ध्येयस्सदा सवितृमण्डलमध्यवर्त्ती नारायणः' [कृ. य. स. ४-५-१] इति वचनात् तयोर्भेदाभावः। हरतीति स हरिः। स्वास्तमयकाले सर्वप्राणहरत्वं प्रदातृत्वमरुणोदयकाले भगवतः प्रसिद्धमेव लोके। तथा व्यवस्थादर्शनात्। रुद्रोऽपि स एव, स्वशक्त्या लोकद्रावणस्य विद्यमानत्वात्। अत एव 'नमस्ते रुद्र मन्यव' [कृ. य. स. ४-५-९] इत्यादिशतरुद्रमन्त्रप्रतिपादितः सूर्य (एक) एव। तस्य स्वयं व्यक्तस्य सर्वदेवात्मकत्वात्। किञ्च ब्रह्मविष्णुरुद्राः सृष्ट्यादिकारणाः सूर्यादेव जाताः। सर्वलोकोद्धारणहेतुभूतस्य सूर्यतेजसः शुक्लवर्णत्वेन तद्वर्णादुत्पत्तिः तेषां युक्तैव। 'यच्छुक्लं तद्ब्रह्म' इत्युपनिषत्प्रमाणात्। अतः सूर्य एव सर्वैर्मुमुक्षुभिरुपास्यः। तदङ्कपूर्णमण्डलधारणा-

1. रा. ०शब्दौ। 'अनुपाधिकौ' इत्यत आरभ्य 'भगवत्पुरुषशब्दौ' इति पर्यन्तो भागः नास्ति।



दिभिः अलङ्कृतगात्राः तन्मन्त्रजपध्यानासक्ताश्च यूयं मुक्ता भविष्यथ इति पूर्वपक्षे प्राप्ते—

श्रीमदाचार्यैरिदमुच्यते—भो दिवाकर! (किमुक्तं) [यदुक्तं] भवता तदसमञ्जसम्, वेदविरोधात्। तथा हि—

'चन्द्रमा मनसो जातः, चक्षोस्सूर्योऽजायत' [तै. आ. ३-१२] इति श्रुतेः सूर्यस्य जन्यत्वदर्शनात्, यज्जन्यं तदनित्यमिति तर्कसिद्धान्तस्य विद्यमानत्वात्, घटादिवदशाश्वतस्य सूर्यस्य कथं ब्रह्मत्वं सिद्ध्येत्। किन्तु तादृक्श्रुतितात्पर्यन्तु सूर्यनिष्ठपरमात्मपरमित्युन्नेयम्। जगदीश्वराज्ञावशादेव सूर्यो भ्रमतीति तैत्तिरीयके समाम्नातम्—

'भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति' [तै. उ. २-८] [इति]

तस्मात् सूर्यस्य (पारतन्त्रिकत्वे) [परतन्त्रत्वं] प्राप्तम्। किञ्च सूर्यादिनिष्ठप्रभा जगदीश्वरस्यैव। तथोक्तं श्रुत्यन्तरे—

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥
[क. उ. ५-१५] इति

अत एव आदित्यान्तःपुरुषस्य 'हिरण्यश्मश्रुः हिरण्यकेशः' [छा. उ. १-६-६] इत्यादिप्रतिपादितस्यैव परमात्मनः सर्वोत्कृष्टस्य स्तुतिपराः श्रुतयः कथमादित्यं नित्यं वर्णयन्ति।

ज्योतिश्शास्त्रे तदनित्यता वर्णिता—

सृष्टिः सरोजासनवासरादौ वियच्चराणां विलयस्तदन्ते।
आद्यन्तकालः स च कल्प उक्तः कल्पद्वयं स्याद्दिवसो विरिञ्चेः ॥ इति।

वियति आकाशे चरन्तीति वियच्चराः ग्रहाः सूर्यादयः । तेषां सरोजासनस्य ब्रह्मणो वासरादौ सृष्टिरुत्पत्तिः। तदन्ते दिनान्ते विलयः।एवमाद्यन्तकालः कल्पः। सहस्रमहायुगप्रमाणः विरिञ्चेः चतुर्मुखस्य दिनं दिवाकालः । रात्रिरपि तादृशी। कल्पद्वयमितो ब्रह्मदिवस इत्यर्थः।एवं ब्रह्मदिनकर्तुः सूर्यात् ब्रह्माद्युत्पत्तिः भवदुक्ता। तस्मादेव विदितो भवदधिकारः। ब्रह्मायुःशताब्दमध्ये एकस्मिन् दिने जन्मादिवृत्तिं प्राप्तस्य सूर्यस्य ब्रह्मपुरुषशब्दवाच्यत्वं भवता संपादितम् । किमु वक्तव्यं भवद्विद्यावैशारद्यम्। 'सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्' [तै. आ॰ ३-१२] इत्यादिना भगवतो विश्वरूपत्वं प्रदर्शितम् । नित्यस्य परमात्मनो लोकबहिरन्तर्गतस्य यद्यद्विशेषणमुक्तं तत्तत्सूर्यस्येति भ्रान्तो वक्षि। सर्वगतः परमात्मसूर्यमण्डलात् बहिरन्तःस्थित एव । तद्द्वारा तमोनिबर्हणं स एव करोति । जगदीश्वरादन्यस्य तादृग्विधशक्त्यभावात् सूर्यादन्यः देवमनुष्यतिर्यग्जन्तुष्वपि परमात्मा नेत्रान्तर्गतस्सन् वर्तत एव। दीप्तेः तद्रूपत्वात् । 'य एषोऽक्षणि पुरुषो दृश्यते', [छा. उ. ८-७-४] 'यश्चासावादित्ये स एकः' [तै. उ. २-८] इति श्रुतेश्च एकोऽप्यात्मा सर्वजगद्बहिरन्तर्गतः । [1]'अन्तस्तद्धर्मोपदेशात्' इति सूत्राच्च। [2](तदधिकरणे श्रमिद्भिराचार्यैरुक्तं ब्रह्मपरमेव च तदधिकरणमिति) तस्मात् सर्वगतब्रह्मध्यानबुद्ध्या वर्तयत । भानुमतविजृंभणं त्यजत । चिन्हधारणं पाषण्डोद्बोधकं त्यक्त्वा स्मार्ताचारपरिलब्धशुद्धाद्वैतविद्याबलात् मुक्ता भवत। एवमाज्ञप्ता दिवाकरादयः सौराः परमगुरुं नत्वा तत्कटाक्षलब्धशुद्धाद्वैतवादिनः शिष्याः बभूवुः ॥

इत्यनन्तानन्दगिरिकृतौ सौरमतनिबर्हणं नाम प्रकरणं त्रयोदशम् ॥

1. क. प्रतिपादितश्च एतत् 'अन्तस्तद्धर्मोपदेशात्' [ब्र. सू. १-१-२०] इति व्याससूत्रेऽस्माभिः।
2. अनन्तानन्दगिरिवाक्यमिदमिति बोध्यम् ।

॥ १४ ॥

## ॥ गुरुस्तुतिः ॥

ततस्तत्रागतैर्विप्रैः सर्वैरपि यतीश्वरः ।
सभाजितो ययौ तस्माद्वायोराशां जयेच्छया ॥

शिष्येषु त्रिसहस्रेषु केचिच्छङ्खप्रपूरणैः ।
केचिद्वाद्यविशेषैश्च केचित्तालैः शुभोक्तिभिः ।

केचिद् घण्टानिनादैश्च करदीपैश्च केचन ।
केचिद्व्यजनवातैश्च पिच्छवातैस्तथा परे ॥

समर्चयन्ति संन्यस्तसुखदुःखं यतीश्वरम् ।
तत्तद्देशगता विप्रा दृष्ट्वा तच्छिष्यतां गताः ॥

एवं प्रतिदिनं गत्वा तत्र तत्रागतान् द्विजान् ।
कुमतस्थान् परानन्दभाजः कृत्वा शुभोक्तिभिः ॥

पुरं गणवरं प्राप गणपस्याश्रमं शुभम् ।
तत्र नद्यां हि कौमुद्यां स्नात्वा विघ्नेशमव्ययम् ॥

संपूज्य यतिराट् तत्र मासमास सहानुगैः ।
पद्मपादमुखाः शिष्याः पद्मपूजापरायणाः ।
दिग्गजा इति विख्याताः परविद्याप्रभेदिनः ॥

परपक्षक्षयोद्युक्तवचसः प्रौढवादिनः ।
तद्वाक्यं शिरसा धृत्वा शिष्योऽन्यः पुरजिद्बली ॥

नियन्ता सर्वशिष्याणां पाकादिषु च कर्मसु ।
समभ्यर्च्य गुरुं भिक्षां दत्त्वा तस्मै परात्मने ॥

पद्मपादस्तदन्येषां शिष्याणां षड्सैर्युतम् ।
अददाद्भोजनं नित्यं ब्रह्मार्पणमिति स्मरन् ॥

सायन्तने सर्वशिष्याः परमगुरुमाचार्यशिरोमणिं द्वादशवारं नत्वा ढक्का-तालकराः [परेशं] (परमेवं) स्तुवन्तो नृत्यन्ति—

परिपूर्णोऽहं ब्रह्म च सत्यं सत्सुखरूपचिदानन्दोऽहम् ।
शुक्तौ रजतवदाभातीदं मयि विश्वं निश्चिनु मिथ्येति ॥

स्थूलकारणलिङ्गदेहैराकाशादिवदस्पृष्टोऽहम् ।
तादृङ्मयि संबन्धः को वा दारादिर्नाम भविष्यति ॥

अंभः कणजालैरस्पृष्टं तामरसच्छदमिव देह्यभवम् ।
मत्तो जाता प्रकृतिरनन्ता तद्धर्मान्महदुद्भूतं हि ॥

तस्माज्जातोऽहंकाराख्यः त्रिगुणयुतोऽभवदस्माज्जाताः ।
रुद्रोविष्णुर्ब्रह्मा तेभ्यः सृष्टिस्थितिलयाऽभवन्नितराम् ॥

कार्यार्थिभिरेतैः कृतमपि तत् हृदयगतोऽहं साक्षी परमः ।
सर्वत्राऽहं बहिरन्तस्थः सम्यग्ज्ञानफलप्रद एव ॥

सत्यं ज्ञानमनन्तं ब्रह्म सर्वाधारः सर्वमयोऽहम् ।
सर्वातीतः सर्वव्याप्तः सर्वस्यापि कारणमेकः ॥

भानोर्मण्डलमध्येवर्ती पुरुषोऽक्षिगतः परमाद्वन्द्वः ।
ईशो नित्यः शाश्वतविभवः सर्वमुक्तिदः सदुपासनवताम् ॥

सन्त्येवैते वेदा यज्ञा मामद्वैतमजं च वदन्ति ।
किं मनसाऽहं स्पृष्टः किं वा करणैर्दूरतरैरपि वेद्यः ॥

आत्मा ब्रह्म सदद्वयमेकः सच्चित्सुखरूपोऽहं सकलम् ।
मामिति ये मनुजा विन्दन्ति मायामेतां हि तरन्त्येते ॥



नित्यं मां निगमाद्यैर्वेद्यं सत्यं मनसा ध्यायन्ति हि ये ।
मुक्तिस्तेषामनु(तु)[फ]लिता स्याद्भक्तिमतां किमसाध्यं लोके ॥

मम संवित्प्रदमद्भुतरूपं सममखिलेष्वपि गुरुमद्वैतम् ।
यमनियमादियुतः स्मरति हि चेत् सममखिलात्मा समुपास्यः स्यात् ॥

नृत्यन्तो जल्पन्तश्चैवं सत्यं गुरुमभिनत्वा बहुधा ।
श्रान्ता गुरुसन्निधिविश्रान्ता दान्ताः पद्मपदाद्याः शिष्याः ॥

एवं प्रतिदिनभावं प्राप्ताः श्रीशङ्करगुरुपदगतचित्ताः ॥

इत्यनन्तानन्दगिरिकृतौ गुरुस्तुतिर्नाम प्रकरणं चतुर्दशम् ॥

॥ १५ ॥

## ॥ गणपतिमतनिबर्हणम् ॥

एवमानन्दसन्तुष्टमाचार्यं सेवकानपि ।
तत्पत्तनद्विजाः प्रेक्ष्य किमेतदिति चाब्रुवन् ॥

न हि युष्मन्मतं सम्यगिव भाति हि पश्यताम् ।
आकाशवन्निरालम्बमद्वयं ब्रह्म केवलम् ॥

मनोवागादिवृत्तीनामगोचरतरं परम् ।
कथम[1]ज्ञोपबोधाय योग्यं स्यान्मतमीदृशम् ॥

तत् [2]त्यक्त्वाऽस्मन्मतं सम्यगाचरन्तु शुभाप्तये ।
गाणपत्यमितिख्यातं षड्भिर्भेदै[3]र्विजृम्भितम् ॥

---

1. रा. महामत्वो० 2. रा. ०ज्ञात्वा 3. रा. ०दैर्विभेदितम् ।

समस्तवेदतात्पर्यैस्तदेव हि समीरितम् ।
तदाचरध्वमत्यन्तशान्तिदं मोक्षदं नृणाम् ॥

तुण्डैकदन्तचिन्हाभ्यां चिन्हितं शक्तिसंयुतम् ।
महागणपतिं यस्तु सदा ध्यायत्यनन्यधीः ॥

तन्मूलमन्त्रपठनपरस्सन् ब्राह्मणोत्तमः ।
यो वर्तते स एवान्ते मोक्षभाग्भवति ध्रुवम् ॥

तद्ध्यानन्तु—

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्त्रविषाणरत्नकलशप्रोद्यत्करांभोरुहः ।

ध्येयो वल्लभया स पद्मकरयाऽऽश्लिष्टो ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश इष्टार्थदः ॥ इति ।

'विश्वोत्पत्तिविपत्तिसंस्थितिकर' इत्यनेन सृष्ट्यादिहेतु[1]त्वं गणेशस्य घटते । ब्रह्मादिलयेऽपि एकस्यैव गणपतेर्विद्यमानत्वात् । गणानां रुद्रविष्णुब्रह्मगणानां पतिः गणपतिः, स एक एव प्रथममासीत् । 'अहमेक एव गणपतिरासम्' इति श्रुतेः । तस्मात् गणपतेः सर्वातीतस्य परमात्मन एव जगत्कारणत्वं सिद्धम् । तन्मायारचिता ब्रह्मादयः (इति) । अत एव तस्य गणपतित्वं [2]इति प्राप्ते आहुः श्रीमदाचार्याः —

भो, गाणपत्य ! सत्यमुक्तं भवता गणपतेः सर्वोत्तमत्वम् । तन्मायाबलात् रुद्राद्युत्पत्तिः भवद्भिः प्रतिपादिता । तदसमञ्जसमिव प्रतिभाति । कथम् ? सगुणस्य गजमुखस्य गणपतेः रुद्रगणैस्सह लयानुगस्य जगत्कारणत्वं कल्पयितु-

1. रा. ०तुभूतत्वं ग०
2. म2 रा. इति एवं पठतो गाणपत्यानिदमाह श्रीमदाचार्यः ।



मनुचितम् । किञ्च रुद्रसुत इति [गणपतेः] लोके प्रसिद्धिरस्ति । तस्य ब्रह्मत्वे कल्पितेऽपि, पित्रादिकारणत्वं सुतस्यानुचितमेव । अतो रुद्रादिकारणं परं ब्रह्मैव । 'सदेव सौम्येदमग्र आसीत्' [छा. उ.६-२-१] 'ब्रह्म वा इदमग्र आसीत्' [बृ. उ. १-४-१२], इत्यादि वाक्यात् 'अहमेक एव गणपतिरासम्' इति वाक्यस्यार्थ उन्नेयः । तस्य विश्वोत्पत्तिविपत्तिसंस्थितिकरत्वं सिद्धं भवति इति निराकृते महागणपतिमते पुनराह —

स्वामिन् ! भवदनुकूलं भवद्भिरुक्तम् । अङ्काभावे पुरुषः निरालम्बन एव भवति, कस्यापि देवस्याभिमानाभावात् । अतः साङ्केन पुंसा भवितव्यम् । यस्याङ्कं धारयति पुरुषः तस्याभिमानः तस्मिन् वर्तते । [1]प्रायणेऽपि तद्गणैस्तल्लोको गृह्यते । अतः सालोक्यस्य मुक्तिरूपत्वात् तत्प्राप्तिर्निरङ्कस्य कथं भविष्यति मम गिराजापुत्रस्य मदीयानां गणनाथगणपत्यादीनाञ्चेति जल्पन्तं गिरिजापुत्राभिधं महागाणपत्यवरं श्रीमदाचार्य इदमाह —

शृणु , जडमते गिरिजापुत्र ! ब्राह्मणस्य किमङ्कः [कर्त] (वक्त)व्यः । प्रथमं ब्रह्मकुलजत्वमेकमङ्कनम् । द्वितीयं पुंसवनादिवेदोक्तकर्माङ्कनम् । तृतीयं ब्रह्मचर्याद्या[2]श्रमाङ्कनम् । एवमङ्कत्रयविराजमानस्य महाब्राह्मणस्य निरङ्कता कथम् ? ब्राह्मण्याङ्केन समं अन्याङ्कनं न विद्यते । ब्राह्मणकर्तव्येषु स्नानाचमनप्राणायाममार्जनगायत्रीजपाग्निहोत्रवेदाभ्यासेश्वरपूजादिषु वेदोक्तसत्कर्मसु किं न देवा विद्यन्ते । सर्वदेवतृप्त्यास्पदस्य ब्राह्मणस्य देवाङ्कं कथं न विद्यते । तादृग्विधाङ्कने वर्तमाने पुनरङ्कधारणं पशोरिव चिन्हं भवति ।

किञ्च, ब्राह्मणस्य किं वा लक्षणमित्युक्ते शिखायज्ञोपवीतधारणवेदोक्तकर्माचरणं लक्षणम् । तर्हि तत् क्षत्रियेऽपि विद्यमानत्वात् तत्रातिव्याप्तमित्युक्ते ब्रह्मकुलजत्वं विशेषणम् । एतन्मात्रेणैव ब्राह्मणस्य चारितार्थ्यात्

1. रा. प्रायेणापि 2. रा. श्रमोक्तम् । एवं

अङ्कधारणं पाषण्डताजनकं परिहर। अङ्काङ्गीकारे महापातकमस्तीति पुराणे श्रवणात्, वेदविरुद्धत्वाच्च। किञ्च (सदुपासकानां) [तदुपासकानां] मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञासहस्रारेषु चतुर्दल-षड्दल-द्वादशदल-षोडशदल-द्विदल-सहस्रदलेषु स्वर्णविद्रुमनीलपिङ्गलधूम्रतेजःकर्पूरवर्णेषु स्थिताः गणपति ब्रह्मविष्णुरुद्रजीवात्मपरमात्मानः[1] (संप्रति) सन्ति (प्रति) देहधारिणः। अतो गणपतेर्मूलाधारगतस्य सर्वाधारत्वं वर्तते। तदुपरिगतानां चक्राणां तदधिकारिणां ब्रह्मादिदेवानां च तदाधारकत्वात्। अतस्तथाविधे गणपतावन्तस्थे वक्रतुण्ड-दन्तचिन्हं भुजयोः कर्तव्यमिति निरर्थकम्।

किञ्च मूलाधारस्थे गणपतौ सर्वोत्तमे परमात्मनि सम्यगाज्ञाचक्रगते अनयोरधिकारं (भवन्मते विशेषत्वं) चिन्तय। द्विसप्ततिसहस्रनाडीनां मूलाधाराश्रितानां नियामकत्वमात्रं गणपतेरधिकारः। तज्जनितनाडीभिरूर्ध्वाधः प्रसृताभिर्देहस्थितिकारणभूताभिः उपरिचक्राधारभूताभिः गणपतेः कारणत्वं प्राप्तम्। परमात्मा सर्वगतोऽप्याज्ञाचक्रवासी भूत्वा स्वाधस्थजीवरुद्रविष्णुब्रह्मगणपतीन् तत्तद्विनियोगेषु प्रेरयित्वा स्वयं साक्षी निर्गुणः सच्चिदानन्दमयः सर्वातीतः सर्वोत्कृष्ट इति सम्यग्वेदेषु प्रतिपादितः। अतः परमात्मानं आज्ञाचक्रगतं चिन्तय, मुक्तो भवसि, इत्युपदिष्टः गिरिजापुत्रः सगणस्त्यक्तलिङ्गः परमगुरोः शिष्योऽभवत्।

पञ्चपूजापरो नित्यं पञ्चयज्ञपरायणः।
गुरुशुश्रूषणासक्तचित्तोऽभूद्गिरिजासुतः॥

॥ इत्यनन्तानन्दगिरिकृतौ गणपतिमतनिबर्हणं नाम प्रकरणं पञ्चदशम् ॥

1. रा. ०नः तदुपारि श्रीपरमगुरुः इति स्वतन्त्रदेवताः सन्ति प्रतिदेहधारिणः।

॥ १६ ॥

## ॥ गाणपत्यैकदेशिमतनिबर्हणम् ॥

एवं [1]निराकृते महागणपतिमतवादिनि गिरिजापुत्रे पुनरन्यो हरिद्रागणपतिमतवादी प्रत्यवतिष्ठते मन्त्रवर्णात् —

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥

[कृ. य. सं. २-३-१४] इति।

भो, यतिवर्य! गाणपत्यमतमयुक्तमिति प्रतिपाद्य चिरकालादारूढमत[2]पारीणं गिरिजापुत्रं तदाश्रितांश्च भ्रष्टान् कृत्वा वर्तसे। किमिदमुचितम्? तदिदानीमागतं प्रतिपक्षवि[3]घ्नदुण्ढिराजगणपतिकुमारनामानं मां विद्धि। किं गणेशमते न्यूनताऽस्ति। तत्प्रतिपादकमन्त्रस्यायमर्थः — गणानां ब्रह्मविष्णुरुद्रादिगणानां गणपतिं अध्यक्षं त्वां हवामहे ध्यानं कुर्महे। किंविशिष्टम्; कवीनां भृगुगुरुशेषप्रभृतीनां कविं उपदेष्टारं इत्यर्थः। [4]पुनः किं विशिष्टम्; उपमश्रवस्तमं उपमश्रवसां सकृच्छ्रवणात् सर्वविद्याविदां मध्ये श्रेष्ठमित्यर्थः। पुनः किंविशिष्टम्; ब्रह्मणां प्रपञ्चसृष्टिकर्तॄणां ज्येष्ठराजं (तद्वारा) ज्येष्ठप्रभुमित्यर्थः। ब्रह्मादिभिरपि सृष्ट्यादिषु विघ्नेश्वरः पूजनीय इत्यर्थः। आरब्धकार्येषु सर्वेष्वपि देवमनुष्यादिभिः सर्वैर्विघ्नेशः पूजनीय इति पुराणेषु बहुधा वर्तते। (तं)ब्रह्मणस्प(तिं)[ते] ब्रह्मणामपि (पति)[पते]इत्यर्थः। आ समन्तात् नः ऊतिभिः स्तोत्रैः, शृण्वन् सादनं, निर्विघ्नं शुभं सीद [5]दधात्वित्यर्थः। अतः सकलदेवपूज्यो गणपतिरेव।

1. रा., म$_2$ निरस्ते 2. रा., म$_2$ पदकीनं 3. म$_2$ विघ्नराज

4. 'पुनः' इत्यत आरभ्य 'ज्येष्ठप्रभुमित्यर्थः' इति पर्यन्तोभागः नास्ति म$_2$ मातृकायाम्।

5. भवान् दधातु इत्यर्थः — टि.

तद्ध्यानन्तु—

पीताम्बरधरं देवं पीतयज्ञोपवीतिनम् ।
चतुर्भुजं त्रिनयनं हरिद्रालसदाननम् ॥

पाशाङ्कुशधरं देवं दण्डाभयकराम्बुजम् ।
एवं यः पूजयेद्देवं स मुक्तो नात्र संशयः ॥

इति स्कन्दपुराणवचनात् । जगदादिकारणं गणपतिरेक एव । तत्कटाक्षवशाज्जातास्तदंशा ब्रह्मादयः । अतः सर्वदेवपितामहं विघ्नेश्वरं भवन्तोऽपिभजन्तु । तस्य चिन्हद्वयं तुण्डैकदन्तात्मकम् । तदाकाराकारिततप्तलोहाङ्कितभुजद्वयः तद्भक्ताग्रगण्यः । तस्यैव मुक्तिः करस्था भवतीति पूर्वपक्षे प्राप्ते श्रीमद्भिराचार्यैरिदमुच्यते—

गणकुमार ! भवद्बुद्धिः एवं कस्मात् प्रतिहता । वैकल्यमप्रतिहतम् । जगत्कारणवाक्यैः 'सदेव सौम्येदमग्र आसीत्' [छा.उ.६-२-१] इत्यादिभिः प्रतिपादितं ब्रह्मैव गणपतिरिति, तस्यांशाः ब्रह्मादयः सृष्ट्यादिकर्तार इति, भृग्वादीनामपि सर्वविद्यागुरुः गणपतिरेवेति च । प्रसङ्गात् किञ्चिदन्यच्च सम्यक्प्रतिपादितं भवता । शुद्धबुद्धमुक्तस्वरूपं सत्यं ज्ञानमनन्तं ब्रह्म गणपतिरेवास्तु । सर्वशब्दवाच्यस्य ब्रह्मणः गणपतिशब्देन किमपराद्धम् । अतः परमात्मनः सकाशात् ब्रह्मादयः जाता इत्यविरुद्धम् । ब्रह्मादीनां तदंशरूपत्वात् रुद्रपुत्रो गणपतिरिति तत्राप्यविरोधः, अंशांशिनोरभेदात् ।

अतो जगन्निर्माणादिषु विघ्नहर्तेति (अर्थः) देवकार्या (र्थी) [र्थं] संसारिणामपि सर्वविघ्ननिवृत्तये तादृग्गणपतिरुपास्य एव । अतः सर्वैर्मुमुक्षुभिः ईशविष्णुगणपतिशक्तिसूर्याः पञ्च उपास्या एव । किन्तु तुण्डैकदन्तचिन्हधारणमात्रमेव विरुद्धं, लिङ्गिनः पाषण्डत्वश्रवणात् , वेदविरोधाच्च । तस्मात् तुण्डैकदन्तचिन्हं परित्यज्य शुद्धाद्वैतवृत्तिमाश्रित्य पञ्चपूजां स्नानादि नित्यकर्म च



कुर्वन् मायानिवृत्तौ जातायां तद्द्वारा भग्नलिङ्गशरीरः मुक्तस्त्वं भवसीत्येवमुपदिष्टो गणकुमारो गाणपत्यः परमगुरुमाचार्यं द्वादशवारं नत्वा तत्कटाक्षविदितस्मार्ताचारलक्षणः शुभ्रभस्मकृतत्रिपुण्ड्रः सद्गुरुचरणं ध्यायन् पञ्चपूजापरायणः सुखमाप ।

॥ इत्यनन्तानन्दगिरिकृतौ गाणपत्यैकदेशिमतनिबर्हणं नाम प्रकरणं षोडशम् ॥

## ॥ १७ ॥

## ॥ उच्छिष्टगणपतिमतनिबर्हणम् ॥

एवं परिहृते गणपत्यैकदेशिमते पुनरन्यः उच्छिष्टगणपत्युपासकः दक्षिणेतरमार्गानुवर्त्ती हेरम्बसुत इति प्रसिद्धः प्रत्यवतिष्ठते । स तु श्रीमदाचार्यमिदमुवाच — भो, स्वामिन् ! हेरम्बसुतोऽहमागतोऽस्मि । केन विधिना गणपतिमतमयुक्तमिति भवद्भिरुक्तम् । श्रूयतामस्मन्मतम् । शैवागमे द्वादशगणपतिप्रकरणे महागणपतिमतमेकं, हरिद्रागणपतिमतमेकं, उच्छिष्टगणपतिमतमेकं, नवनीतगणपतिमतमेकं, स्वर्णगणपतिमतमेकं, सन्तानगणपतिमतमेकं,—एवं षड्विधगणपति मतानि भवन्ति । एतन्मतप्रवर्तकाः षण्महामन्त्राः उपमन्त्रषट्कश्च तत्तन्मतावान्तराणि ज्ञानमतानि वामावलम्बकानि । उच्छिष्टगणपतेः मतस्य ज्ञानमतं हैरम्बमित्युच्यते । उभयोरपि प्रधानाङ्गयोर्वाममार्गावलम्बकत्वेनोच्छिष्टगणपतिरिति नाम प्राप्तम् । तदीयध्यानन्तु —

चतुर्भुजं त्रिनयनं पाशाङ्कुशगदाभयम् ।
तुण्डाग्रपीतमधुकं गणनाथमहं भजे ॥ इति ।

तदङ्गहेरम्बस्य तु ध्यानमेतत्—

महापीठनिषण्णं तं वामाङ्कोपरिसंस्थिताम् ।
देवीमालिङ्ग्य चुम्बन्तं स्पृशंस्तुण्डेन वै भगम् ॥ इति ।

अत एव तयोरङ्गाङ्गिनोर्वामबाहुल्यवशात् जीवेशयोरिव ऐक्यानुसन्धानं युक्तमिति मतद्वयमप्यहमवलम्ब्य कुङ्कुमाङ्कितललाटः पुण्ड्रान्तरपरित्यागी सन्ध्यादिसकलकर्माणि[1] इच्छावशानि कृत्वा संवित्तीर्थपानजनितानन्दविदित सकललोकः एतत्समं मतान्तरं नास्तीति नित्यतृप्तोऽभवम् ।

किञ्च मदीयाचारे धर्मद्वयमेवानुवर्तनीयम् । पुरुषाणां सार्वजातिकानां एका जातिरित्येको धर्मः । स्त्रीणां सार्ववर्णिकानां एकाजातिरित्येको धर्मः । तेषां तासां च संयोगवियोगे च दोषाभावः । अस्या अयमेव पतिरिति नियमाभावात् । तासु रजस्सिक्तासु सुसंपर्के जाते रुधिरबाहुल्यात् आनन्दाधिक्याच्च आनन्दप्राप्तिरेव ब्रह्मप्राप्तिरिति । तस्य च सच्चिदानन्दलक्षणत्वात् । तस्मादुच्छिष्टगणपतेरखण्डानन्दरूपत्वेन ब्रह्मरूपत्वेन च तन्मतमनन्यभेद्यम् । तदंशाः सर्वे ब्रह्मादयो देवाः । अंशांशिनोरभेदः प्रतिपादितो रुद्रकाण्डे । नमकेऽपि. 'नमो गणेभ्यो गणपतिभ्यश्च वो नम' [कृ. य. सं. ४-५-४] इति गणरूपेभ्यो गणपतिरूपेभ्यश्च रुद्रेभ्यो नम इत्यनेन गणत्वं गणपतित्वञ्च एकस्मिन् रुद्रे घटते । ओङ्कारातीतस्य परमशिवस्य गणपतिरूपत्वेन तदंशास्सर्वा देवता इति युक्तमुक्तम् । अतो ब्रह्मप्राप्तये [2]कर्मणोऽकारणत्वात् कर्माचरणप्रवृत्तिर्व्यर्थैव । न कर्म मुक्तिसाधनम्, किन्तु कर्मत्याग एव, 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः' [म. ना. ८-१४] इति श्रुतेः । त्यागः सन्यासः । (स तु द्वन्द्वातीतः) 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितः (श्रद्धावित्तो) भूत्वाऽत्मन्येवात्मानं पश्येत्' [बृ. उ. ४-४-२३] इति श्रुतेः [च]। उपरतिः सन्यासः । तितिक्षा शीतोष्णद्वन्द्वसहनम् । एतदुपलक्षणम् — सुखदुःखमानापमानपुण्यपापादिष्वपि द्वन्द्वता योजनीया । द्वन्द्वातीतवृत्तेः मोक्षहेतुत्वेन तद्वृत्त्यवलम्बनस्य उच्छिष्टगणपतिमतानुकूलत्वात् तन्मतं मुमुक्षुभिः सर्वैरुपासनीयमिति प्राप्ते श्रीमदाचार्यैरुच्यते—

1. म2. ०णि च अवशगानि कृ० 2. म2. कर्मणो करणत्वात् ।



भो, हेरम्बसुत! भवन्मतमनुचितम् , वेदविरोधात् । वेदो हि ब्राह्मणादीनामुचितधर्माननुक्त्वा पश्चात् महापद्यपि इदं न ग्राह्यमिति निषेधमाह । 'न सुरां पिबेत्', 'न कलञ्जं भक्षयेत्' 'न परदारान् गच्छेत्', 'नाग्नीनुद्वासयेत्', इत्यादि बहूनि वचनानि सन्ति । तस्मादेतस्याग्राह्यमतस्य सुतरामयुक्तमेवाङ्गीकरणं मुमुक्षुभिः । अङ्गीकर्तव्यमिति भवदुक्तं [यत्] तदपि 'न्यास एवात्यरेचयत्' [म. ना. १६-१२] 'त्यागेनैके अमृतत्वमानशुः' [म. ना. ८-१४] इत्यादिना श्रुतिवाक्येन संन्यासिन एव मोक्षाधिकारित्वमित्युक्तं भवति । तस्य द्वन्द्वातीतत्वादिगुणविशिष्टत्वात् । सुखदुःखमोहादिपरित्यक्तस्य महायतेः परमहंसस्य दृक् यत्र यत्र पतति तत्र ब्रह्मस्वरूपनिश्चयात् । 'सर्वं खल्विदं ब्रह्म' [छा. उ. ३-१४-१] 'नेह नानास्ति किञ्चन' [क. उ. ४-११] इति ब्रह्मव्यतिरेकेण [प्रपञ्चासत्त्वात्]। सत्तामात्ररूपिणः शुद्धाद्वैतं ब्रह्माहमस्मि इति मार्गमारूढस्य सर्वभूतान्तःकरणसाक्षिणः शुद्धचैतन्यस्य द्वन्द्वातीतत्वं युक्तमेव । [1]तदुपमानं कृत्वा भवत्प्रमुखाः संसारिणः सुरां पिबामः, कलञ्जं भक्षयामः, इति प्रतारणबुद्ध्या जल्पथ । तदत्यन्तदुष्टं नरकप्रदमेव मतम् । तस्माच्च मूढबुद्धिं परित्यज्य ब्रह्मसभानुग्रहात् कृतप्रायश्चित्ताः यूयं श्रुतिमार्गमवलम्ब्य पञ्चपूजापराः पञ्चयज्ञादिनित्यकर्मनिरताश्च भवथ, यदि मोक्षमिच्छथ । मूलाधारादिब्रह्मरन्ध्रान्तं प्रतिचक्रे गणपतिब्रह्मविष्णुरुद्रजीवपरमात्मगुरून् स्वदेहान्तः परिकल्प्य पञ्चपूजापुरःसरं अजपामूलमन्त्रजपपराः तद्देवताध्यानमात्रेणैव मुक्ता भवथ, नान्यद्विचारणीयं भवद्भिः इति सम्यगुपदिष्टाः हेरम्बसुतादयः तत्सभानुग्रहात् कृतप्रायश्चित्ताः श्रीमत्परमगुरुं नत्वा तत्कटाक्षप्राप्तब्राह्मणधर्माः श्रुत्याचारपरिश्रान्ताः[2] अद्वैतविद्याभ्यासतत्परा बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ गणपतिमतमध्ये उच्छिष्टगणपतिमतनिबर्हणं नाम प्रकरणं सप्तदशम् ॥

1. क. तमुपमानं कृ० म2. तमुपादानं कृ० 2. म2. ०न्ताः बभूवुः ।

॥ १८ ॥

## ॥ गणपतिमतत्रयनिबर्हणम् ॥

ततः परं नवनीतस्वर्णसन्तानगणपत्युपासकाः समागत्य श्रीमदाचार्यस्वामिनं इदमूचुः — स्वामिन्। वयं नवनीतादिगणपत्युपासकाः [1]वेदोक्तकर्मानुकूल्येन तत्तदुपासनां कुर्मः। किन्तु गणपतेः उत्तमत्वं सर्वेषां देवानां तदंशजातत्वं च निश्चित्य गणपतिमतसिद्धान्तमोक्षाभिलाषिणः सर्वं जगत् गणपति[2]रिति ध्यायिनो भवामः। न किल तत्र [3]विचारः कर्तव्यः। तस्य सर्वकार्येषु सर्वदेवपूज्यत्वात्। कथं भवद्भिः महागणपत्यादिमतत्रयं निराकृतम्। तद्व्यतिरेकेण पारमार्थिकाभावादिति [4]तत्तदुपासकैश्च तत्प्रीत्यर्थं हरिद्रादिधारणं कर्तव्यमेवेति प्राप्ते श्रीशङ्कराचार्यस्वामिभिरिदमुच्यते — (तव मतमिति यत्) तदसत्। यूयं मूढाः पारमार्थिकावेदिनः। सत्यं ज्ञानं शृण्वन्तु। प्रकृतिपुरुषाभ्यामादौ महत्तत्त्वे जाते तद्गर्भे अहङ्कारतत्त्वं गुणत्रयात्मकं[5] उत्पन्नम्, तदेव रुद्रविष्णुब्रह्मरूपमभवत्। ते क्रमात् स्वशक्तितः तत्तद्गुणविशिष्टजगदुत्पत्तिहेतवोऽभवन्। तत्र किल तामसाहङ्कारे रुद्रसृष्ट्यन्तर्जाताः गणपतिकुमारभैरवाः। ते जगति स्वल्पाधिकारिणः। गणपतेः कृष्यादिप्रयोजनेषु मनुष्यसाध्येषु सृष्ट्यादिप्रयोजनेषु ब्रह्मादिसाध्येषु च आदौ पूज्यत्वं वर्तते। [6](तत्र सर्वकार्यनिर्विघ्नतासिद्ध्ये कार्यादौ गणपतिः पूजनीयत्वेन स्थापितः, लोके सार्वभौमेण तत्तत्कार्ये तत्तदधिकारकल्पनावत्। अस्तु वा गणपतिरेव परमात्मा। अंशांशिनोरभेदात्)। तस्माद्विप्रैः गणपति—

1. म$_2$., रा. मदीयाचारस्तु वेदोक्तकर्मानुकाले तत्तदुपा०
2. म$_2$, रा. ०तिमतत्रयमिति ध्या० 3. क. विवादः क०
4. म$_2$, रा. 'तत्तदुपासकैः' इत्यत आरभ्य 'कर्त०व्यमेवे'ति पर्यन्तो भागः नास्ति।
5. रा. ० कं उक्तम्। 6. क, मुद्रितपुस्तकस्थपाठोऽयम्।



ब्रह्मविष्णुरुद्रजीवपरमात्मानः देहान्तर्गतमूलाधारादिचक्रेषु उपासनीयाः; तादृगनुष्ठानाशक्तानां ब्राह्मणानां गणेशेनोमाहरीशाः प्रतिमादिषु पञ्च पूज्याः। सर्वथा प्रमाणरहितं हरिद्रादिचिह्नमसङ्गतमित्युपदिष्टाः वीरभद्रस्कन्दैकदन्तादयः नवनीतस्वर्णसन्तानगणपत्युपासकाः परमगुरुं नत्वा त्यक्तहरिद्रापुण्ड्रादिचिह्नाः पञ्चपूजापराः शुद्धाद्वैतविद्यावादिनः सच्छिष्या बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ गणपतिमतत्रयनिबर्हणं नाम प्रकरणं अष्टादशम् ॥

॥ १९ ॥

## ॥ शक्तिमतनिबर्हणम् ॥

अतः परं श्रीशङ्कराचार्यः तुलजाभवानीपुरं प्राप। [1]तस्मादिलां पादपद्मैर्विचित्रां कुर्वन् पलाशोत्तमाङ्गार्चिताङ्घ्रिद्वयां तां [2]कटाक्षपूर्णरूपां सशिष्योऽभजत् सः। एवं सकलयतिगुरुः श्रीशङ्कराचार्यः समस्तशिष्याचरितपूजाङ्गीकारविलसत्पादकमलः सर्वदेवार्चितो गुरुरिव प्रकाशमानमूर्तिः तत्र मासकालमतिष्ठत्। तत्रस्थाः परमगुरुं यतिशिरोमणिं [3]शिरोभिरभिवाद्य सविन[4]या इदमूचुः—स्वामिन्! अस्मन्मतमतिविचित्रतरं शृणु। भगवती किल महाशम्भुशक्तिः प्रपञ्चमूलकारणं गुणातीतवृत्तिश्च। तन्मायावशात् महत्तत्त्वादि जगदखिलमुत्पन्नम्। तद्द्वारा ब्रह्माद्युत्पत्तिः,[5] तत्तच्छक्त्युत्पत्तिश्च भवति। तस्याः मनोवाग्वृत्त्यतीतत्वात्। तदंशायाः भवान्याश्चरणारविन्दसेवापराः तदङ्क-

1. रा. तस्मात् किक पाद० 2. क, सकक्षपूर्णरूपां 3. म$_2$. शिरसाभि०
4. रा. ०नयमिदमूचुः।
5. म$_2$, ०त्तिः। ततः प्रपञ्चोत्पत्तिश्च सिद्धा भवति।

कुङ्कुमादिधारिणः तत्पादाकाराकारितस्वर्णपादबद्धगलबाहवो वयं जीवन्मुक्ता एव । विद्योपासकानां[1] तत्फलश्रवणात्[2] । एतदुपासनयैव मुक्तिं श्रुतिराह—

'विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥' [ ई. उ. ११ ]

इयमेवैका सर्वैर्मुमुक्षुभिरुपासनीया । तस्याः कटाक्षलेशेनैव मुक्तिदर्शनात् । सैव च प्रकृतिः प्रधानमिति च व्यवह्रियते । 'प्रकृतिश्चेश्वरश्च' इत्यनेन श्रुतिवचसा प्रकृतिपुरुषयोरभेदात्, 'सदेव सौम्येदमग्र आसीत्' [छा॰ उ. ६-२-१] इत्यादि जगदुपादानकारणवाक्यानि प्रकृतिपराण्येव । अतः प्रकृत्युपासका मुक्ता एवेति निरवद्यम् । प्रणवनिष्ठावर्णादुवर्णाद्युत्पत्तिर्यथा, तथैव तच्छक्तेर्भवान्या लक्ष्म्याद्युत्पत्तिः । अतः सर्वदेवकारणस्य रुद्रस्य या शक्तिः चन्द्रचन्द्रिकान्यायेन तदुद्बोधरूपिणी स्वाधीनवल्लभेति प्रसिद्धा, सैव भवानीति निश्चयज्ञानवतामस्माकं न कश्चिद्विचारः । परमपुरुषैर्भवद्भिरपि तदङ्कधारणपुरःसरं सैवोपासनीयेति प्राप्ते श्रीमद्भिरिदमुच्यते—

ननु भवदुक्ता भवानी संसारभयहारिण्येव, तथाऽपि पुरुषस्य श्रेष्ठत्वात् ईश्वरज्ञानेनैव मुक्तिरिति सर्वत्रापि प्रतिपादितत्वाच्च 'आत्मानमात्मना ध्यात्वा मुक्तो भवति नान्यथे'ति मुक्तिवचनदर्शनात् अजातीतस्य परमात्मन एव ज्ञानेन मुक्तिः । तैत्तिरीयोपनिषदि अजास्वरूपमुक्त्वा [3]तदितरत्वमीश्वरस्य दर्शितम्—

---

1. श. नां अविद्योपासकानां तत्फल॰
2. ॰त् सैव च प्रकृतिः प्रधानमिति च व्यवह्रियते । तदुक्तं साङ्ख्यसिद्धान्ते—
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥
श्रुतिश्च—'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः' इति । प्रकृतिपुरुषयोः शिवशक्त्योः चन्द्रचन्द्रिकान्यायेन अभेदः । तथा च श्रुतिः— 'मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति । एतदु॰ इति क. मुद्रितपुस्तके ।
3. म₂. तदतीत्वमी॰



अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥
[म. ना. ८-४] इति ॥

अतः परमात्मनो मायातीतस्य ज्ञानान्मुक्तिः । किञ्च, साङ्ख्यैरपि पुरुषलक्षणमुक्तम्—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

अतः प्रकृत्यपेक्षया भिन्नस्य परमात्मन एव ज्ञानान्मुक्तिरिति निरवद्यम् । [1]'विद्ययाऽमृतमश्नुते' [ई. उ. ११] इति विद्यापदार्थश्च आत्मभिन्नं सर्वमनित्यम्, आत्मैव शुद्धबुद्धमुक्तसच्चिदानन्दरूप इति ज्ञानमेव । प्रकृतेरजात्वं तु अनादिप्रवाहरूपेण स्वर्गादेरमृतत्ववदापेक्षिकम् । अन्यथा 'एकमेवाद्वितीयम्' [छा॰ उ. ६-२-९] इति श्रुतिविरोधापत्तेः । ज्ञानस्य मोक्षसाधनत्वेन मुक्तिदशायां न हि तत्सद्भावः शङ्कनीयः[2] । ईश्वरव्यतिरिक्तस्य सर्वस्याप्यनित्यत्वात् । किन्तु जीवनिष्ठज्ञानं परिहृत्य स्वयं नष्टो भवति, सपङ्कजलकतकरेणुवत् । कतकरेणुः जलनिष्ठं पङ्कमपहृत्य स्वयमपि नष्टो भवति, । एवं विद्यावतां ब्रह्मैक्यमुक्तम्, 'ब्रह्म वेद ब्रह्मैव भवति' [ मु. उ. ३-२-९ ] इति श्रुतेः । अतः परस्मिन्नद्वितीये ब्रह्मणि भवान्याः तद्बोधकारणत्वं घटते । अतो विद्याशब्दवाच्या भवानी । तदुपासनेन चित्तशुद्धौ जातायां लिङ्गशरीरभङ्गद्वारा मोक्षसिद्धिः । अतो भवानीभक्ता भवन्तोऽपि सर्वाणि सगुणोपासनानि अल्पफलत्वात् परित्यज्य कुङ्कुमपुण्ड्रस्वर्णपादादिचिन्हानि परित्यज्य शुद्धाद्वैतविद्यया ब्रह्माहमस्मीति निश्चयज्ञानेन मुक्ता भवथ । एतत्-

---

1. म₂, श. विद्यया 'इत्यत आरभ्य 'श्रुतिविरोधापत्तेः' इति पर्यन्तो भागः नास्ति ।
2. क. ॰यः । यतः तत्त्वज्ञानमपि जले कतकरेणुवत् अविद्यामपहृत्य स्वयमपि नश्यतीति न अद्वितीयत्वविरोधः । अतः परस्मिन्न॰

प्राप्ये भेदादिपशुमार्गो न साधनमिति सम्यगुक्ताः त्रिपुराकुमारबिन्दुभक्तपूर्णानन्दाः पूर्णभवानीचरणसेवकाः शुद्ध[1] मत्यादयः भवानीभक्ताः परमगुरुं यतिशिरोमणिं नत्वा त्यक्तलिङ्गाः कृताञ्जलयः शुद्धाद्वैतवर्त्माश्रिताचाराः स्नानसन्ध्यावन्दनपञ्चपूजानिरताः सच्छिष्या बभूवुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ शक्तिमतनिबर्हणं नाम प्रकरणं एकोनविंशम् ॥

॥ २० ॥

## ॥ शक्तिमतैकदेशनिबर्हणम् ॥

एवं श्रीमदाचार्यैः कृतं शक्तिमतनिरासं श्रुत्वा तत्समीपदेशस्थाः कुवलयपुरादिपट्टणाश्रिताः समागत्य परमगुरुमाचार्यस्वामिनं नत्वा इदमूचुः— स्वामिन्! महालक्ष्मीर्मातैव सर्वफलदा जगतामुत्पत्तिस्थितिलयकारणम् भगवतो विष्णोः प्राणशक्तिः। तद्द्वारेणैव पार्वतीवाण्यादिशक्तयश्च बहुधा उत्पन्नाः। किञ्च, त्रिमूर्तीनां मूलकारणमपि। तच्छक्तिरपि[2] सा एकैव। परमपुरुषस्य सच्छब्दवाच्यत्वं [3]तत्कारणायाः प्रकृतेः असच्छब्दवाच्यत्वं च तैत्तिरीयोपनिषदि समाम्नातम् — 'असद्वा इदमग्र आसीत्, ततो वै, सदजायत' [तै. उ. २-७] इति। अतो मूलप्रकृतिः परमशक्तिः ब्रह्मादीन् प्रलये सर्वानपि संभक्ष्य गुणातीतवृत्त्या असद्रूपेण अग्रे आसीत्। पुनः सृष्टिकाले तद्वशादेव ब्रह्मादयो जायन्त इति जगदुपादानकारणं सा एकैव। तत्रापि ईश्वरोऽस्तीति यद्युच्येत, तदन्तर्वर्त्यैव सोऽपीति विचारय। [4]सदादीनां तज्जन्य

1. म2 द्धमूर्त्यादयः भ०  2. म2. ०पि तस्यैव।
3. म2. 'तत्कारणस्य प्रकृतेः असच्छब्दवाच्यत्वं च' इत्ययं भागं नास्ति।
4. क. तदादीनां



त्वात्। अतः परब्रह्मण्यपि सविमर्शता कल्पनीया। तयोः सार्वकालिकनित्यत्वात्, [1]चन्द्रचन्द्रिकान्यायेन भगवदभेदस्यापि विरोधाभावात् परप्रकृत्युपासनं भवद्भिरपि अङ्गीकर्तव्यं मुक्तिकाङ्क्षिभिरिति। अतः कमलायाः सर्वोत्कृष्टत्वात् [2]तद्भक्तानां भुजयोः कमलाङ्कधारणं पद्माक्षमालापरिशोभितगलकरणम्। कुङ्कुमाङ्कितफालप्रदेशवतां भक्तानां मुक्तिः करस्थेति श्लिष्टभूषणगङ्गाकीर्तिप्रसन्नलक्ष्मीविलासरमाभक्तजगन्नाथादिभिः सर्वैर्विज्ञापितः श्रीशङ्कराचार्यगुरुः इदमाह—

श्रुतमद्भुतं भवद्भिः प्रतिपादितं मतम्। 'सदेव सौम्येदमग्र आसीत्', [छा. उ. ६-२-१] 'स ईशस्सर्वानसृजत', 'तत्सत्यं स आत्मा तत्त्वमसि, श्वेतकेतो' [छा. उ. ६-८-७] 'यः सर्वज्ञः सर्ववित्' [मु. उ. १-१-९] इत्यादिबहुश्रुतिप्रपञ्चसारविचारितः परमात्मा अपहतपाप्मा सर्वातीतः सर्वकारणं सर्वाधारः सर्वमयः स एकोऽद्वितीयः परानन्दमयः सदा वर्तते। तदिच्छारूपायाः प्रकृतेः तदाधारत्वेन तस्मिन् परमात्मनि प्रकृतिः गुणमयं निजाङ्कं परित्यज्य विनष्टसर्वविकारा सद्रूपा समभवत्। (पराधीन वृत्तिप्रत्यासत्ति) [पराधीनवृत्तेः] शक्तेः स्वातन्त्र्यलेशाभावात् सा कथं मुक्ता? स्वस्य मुक्त्यभावे कथं मुक्तिप्रदा भवति। विद्यारूपायाः तस्याः तथाविधसमर्थता अस्तीति चेन्न — ज्ञानस्यापीश्वरजीवभिदारूपमूलाज्ञाननिवृत्तिसमर्थतामात्रमेव संघटते। अतो मुक्ति [3]कारणस्य विद्यारूपस्यैव परमेश्वरत्वं वक्तुं न शक्यते। सर्वातीतं प्रसिद्धं ब्रह्माहमस्मीति यो वा ध्याता तस्यैव मुक्तिः। अन्येषामनित्योपासकानां अनित्यलोकप्राप्तिः 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' [भ. गी. ९-२१] इत्यादिना सिद्धम्। अतो यूयं कमलकुङ्कुमपुण्ड्राद्यङ्कं परित्यज्य शुद्धाद्वैतविद्यामाश्रित्य

1. म2. 'चन्द्रचन्द्रिकान्यायेन' इत्यत आरभ्य 'कमलाङ्कधारणं' इति पर्यन्तो भागः नास्ति।
2. तदुपासनं तच्चिन्हानां कमलपद्माक्षमालाकुङ्कुमानां भुजकण्ठललादिषु धारणं क्रमैः। भवद्भिरपि तथैवानुष्ठेयं मुक्त्यर्थमिति श्लिष्टभूषण०।
3. क. ०क्तिसमवायिका०।

मुक्ता भवथ इत्युपदिष्टास्ते परमगुरुं नत्वा शुद्धाद्वैतविद्यानिरताः पञ्चपूजादिसत्कर्माणः शिष्या बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ शक्तिमतैकदेशनिबर्हणं नाम प्रकरणं विंशम् ॥

## ॥ २१ ॥

## ॥ शक्तिमतैकदेशशारदामतनिबर्हणम् ॥

एवं निराकृतेषु दुर्गा [भवानी] लक्ष्मीमतसिद्धान्तेषु पुनरन्ये शारदोपासकाः पुस्तकपुण्ड्राः कमलपाणयः प्रत्यवतिष्ठन्ते । ते किल निगमः, सावित्रः, परागमः, सुवाक्, अव्यक्तः, सर्ववाक् इत्यादयः परमगुरुमिदमूचुः — स्वामिन् ! विचित्रवेषधारित्वं संपाद्य दुर्गाकमलाभक्तान् मतभ्रष्टान् कृत्वा सर्वज्ञ इव वर्तसे । विद्धि नः शारदाभक्तान् निगमादीन् । अस्मन्मतं निगमसिद्धम् । वेदानां तद्रूपत्वात् तेषां नित्यत्वाच्च । वेदानां नित्यत्वप्राप्तौ तद्रूपायाः शारदाया नित्यत्वमस्ति वा न वेति सन्देहाभावात् सैव जगत्कर्त्री, नित्या वाक् वे[1]दः, 'वाचा विरूप नित्यया' [कृ.य.सं.२-६-११] इति श्रुतेः[2] । अतः परात्परतरा शारदा जगदुपादानकारणम् । या नित्यप्रभा जगल्लयेऽस्ति सैव वाक् सद्ब्रह्मात्मा शिवनारायणादिशब्दवाच्या गुणातीतवृत्तिः तद्द्वारा परब्रह्माद्युत्पत्तिः[3], तद्द्वारा जगदुत्पत्तिः इत्यविरुद्धम् । अतः सर्वैर्मुमुक्षुभिः सैव निरन्तरमुपासनीया । अतो भवन्तोऽपि वृथाशाजालं परित्यज्य पुस्तकादिभिः चिन्हिताः वागुपासनं कुरुध्वम् । वाग्रूपज्ञानेनैव मुक्ता भवथ । अवेदार्थवित् पुरुषः तं परमं वाग्रूपं न वेद । 'नावेदविन्मनुते तं बृहन्तम्' [शा. उ. ४] इति

---

1. क. ०दः इति श्रुतेः वा० । 2. क. ०तेश्च ।
3. क. ०त्तिः इत्यवि० ।



श्रुतेः । अतः सद्ब्रह्मादिशब्दवाच्यं परं वाग्रूपं सम्यग्वेत्ता पुरुषो मुक्तः । ब्राह्मणस्य तद्व्यतिरेकेण मुक्त्यभावात् । '(साङ्गः)[षडङ्ग] वेदोऽध्येतव्यः' 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (साक्षात्कर्तव्यः) [बृ. उ. २-४-५] इति श्रुतेः । अतः सर्वदा निश्चयेन वाग्रूपानुसन्धानं कुरुत । एवं प्राप्ते श्रीमद्भिराचार्यैरिदमुच्यते— निगममूढ ! किं ब्रवीषि ? भवदज्ञानं केन निवारयितुं शक्यम् । वेदनित्यत्वसत्त्वे वाङ्नित्यता स्यात् । कण्ठताल्वोष्ठादिसङ्गमसञ्जातशब्दरूपवाचः कथं नित्यता शक्यं संपादयितुम् । वेदप्रपञ्चस्य वाग्रूपस्य सदादिशब्दवाच्यत्वं कथमुक्तं भवता । किञ्च वर्णमात्रस्य नित्यत्वं वा वर्णसन्ततेर्वा । नाद्यः, 'उत्पन्नो गकारः', 'नष्टो गकारः' इत्यादिप्रतीतेः वर्णमात्रस्यानित्यत्वात् । 'सोऽयं गकारः' इत्यादि प्रतीतेस्तु 'सेयं दीपज्वाला' इतिवत् सादृश्यावलम्बनत्वात् । सर्वप्राणिप्रलये वर्णस्यापि प्रलयसंभवात् । न द्वितीयः, 'यस्य निश्वसितं वेदाः' इति जन्यत्वदर्शनात् । 'यज्जन्यं तदनित्य'मिति प्रमाणेनानित्यत्वावगतेः । 'वाचा विरूप नित्यया' [कृ. य. सं. २-३-११] इत्यादिश्रुतिस्तु प्रवाहानादितया स्वर्गादिवदापेक्षिकं नित्यत्वं प्रतिपादयति, नात्यन्तिकम् । (अतः) षडङ्गपरिशोभितस्य वेदराशेर्महायुगान्ते प्रलयदर्शनात् । तदनुप्रवृत्तमहायुगे सूर्यः किल कालयुगादिकर्ता महर्षिभ्यो यच्छास्त्रं प्राह तदेव वेदादिकमिति उक्तं (च) सूर्यसिद्धान्ते—

'युगे युगे महर्षीणां स्वयमेव विवस्वता' इति ।

अतः प्रतियुगप्रलय (वृत्ति) संपत्तिश्रुतेः (प्रत्यासत्ति) शक्तेः सरस्वत्याः कथं शक्यं नित्यतां रचयितुम् । वेदानामनित्यत्वेऽपि ब्रह्मणो वक्त्रस्थायाः सरस्वत्याः नित्यत्वं, तद्द्वारा जगत्सृष्टिः, तस्याः ब्रह्मशक्तित्वमिति यद्युच्येत, न हि तदपि रमणीयम् । चतुर्मुखस्य प्रथमजीवस्यानित्यत्वे तच्छक्तेरनित्यत्वमस्ति वा न वेति सन्देहाभावात् । परब्रह्मशक्तिः परप्रकृतिः महदादितत्त्वकारणं सरस्वतीति यद्युच्येत न हि तदपि समञ्जसम् । ईश्वरव्यति-

रिक्तस्य सर्वस्यापि प्रलयदर्शनात् । वाङ्मनोवृत्तिद्वयातीतस्यैव परमात्मनः सद्ब्रह्मादिशब्दवाच्यत्वम्, न तु प्रकृतेः । अतः सगणनिगम ! मूढबुद्धिं परित्यज्य सर्वशब्दवाच्यस्य तद्वृत्त्यतीतस्य परमात्मनः सम्यग्ज्ञानेनैव मुक्तिः, अन्यथा न ह्येव । अतः शुद्धाद्वैतवृत्तिमाश्रित्य स्नानादिसत्कर्म कुर्वन् पञ्चपूजापरायणः त्वं कर्मफलं ब्रह्मार्पणमिति कृत्वा अनुष्ठिते सत्कर्मणि अनेकदुरितक्षयकारणे ज्ञानप्रवृत्तौ जातायां लिङ्गशरीरभङ्गद्वारा मुक्तो भवसीति सम्यगुपदिष्टः निगमः [1]स्वकीयैस्सह त्यक्तलिङ्गः कृतार्थोऽहमिति परमगुरुमाचार्यस्वामिनं नत्वा शुद्धाद्वैतवृत्त्याश्रितोऽभवत् ।

॥ इत्यनन्तानन्दगिरिकृतौ शक्तिमतैकदेशशारदामतनिबर्हणं
नाम प्रकरणं एकविंशम् ॥

॥ २२ ॥

॥ शक्तिमतैकदेशित्रितयनिबर्हणम् ॥

एवं परिहृतेषु दुर्गाकमलावाणीमतसिद्धान्तेषु पुनरन्ये शक्तिवादिनः [2]राजश्यामलोपासकाः शक्तिविलासचिदानन्दादयः वामा[3]चाराः समागत्य श्रीमदाचार्यस्वामिनमिदमूचुः — भोः स्वामिन्, संवित्स्वरूपमविदित्वा यतिवेषधारी मत (वञ्चक) वह्निरिव समागत्य दुर्गाद्युपासकानां वृत्तिमन्यथासिद्धां कृत्वा करतलीकृतब्रह्मतत्त्व इव वर्तसे । किं तज्ज्ञाने[4]नाद्वैतेन । तस्य शशविषाणवत्

1. क, ०सर्वैः स्व०
2. म2; रा. राजश्यामलोपासकाः 'शक्तिविलासचिदानन्दादयः' इति पदद्वयं नास्ति ।
3. म2, रा. ०चारतत्पराः ; क. ०चारिणः
4. म2, ०नाद्वतेन



वन्ध्यापुत्रवत् गगनारविन्दवत् अत्यन्तासत्वात्; सृष्टौ प्रलयेऽपि च भेदस्यैव सिद्धत्वात् । [1]ईश्वरोऽपि विमर्शात् पृथगेव । यथा भर्तरि [2]भार्या स्यात् तथैव[3] । या स्वतन्त्रा शक्तिः शिवस्यापि बलकारिणि, तया विना तस्य तृणचलनक्रियायामप्यसमर्थत्वात्, शक्तिरेव शिवस्यापि कारणम् । तद्द्वारा जगदुत्पत्तिदर्शनात् । अतश्च विमर्शवादिनामस्माकं मतमेव श्रेयस्करम् । निर्विमर्शवादिनां तु भवतां मुक्तिरपि नास्ति । कथमित्युक्ते, मुक्तिकारणाभावात् । मुक्तिकारणं हि विद्या किल । अतश्चापि विद्यावादिनां मुक्तिः करस्था, विमर्शप्राप्तिरेव मुक्तिरिति एते राजश्यामलोपासकाः [4]मणीन्द्रसुहोतवीतरूपपरा[5]मृतभृग्वादयः पञ्चदश्युपासकाः शक्तिविलासचिदानन्द (चिद) [6]विद्वदङ्कुरद्विचरणोपासका(श्चन्द्रा)दयश्च सञ्चिरन्ते । अव्यक्तरूपं विमर्श एव ब्रह्म, तदतिरिक्तं वाङ्मनोवृत्त्यतीतं ब्रह्मास्तीति यद्युच्येत, तदपि [7]तदाश्रितं शिवशब्दवाच्यम्; तद्व्यतिरिक्तवस्त्वभावात् । तयोर्नित्यत्वं श्रुत्यागमादि सिद्धम् । नित्यपदार्थयोः तयोर्मध्ये शक्तेरधिकत्वम् । तत् ज्ञानकारणम्, रहस्येष्ट्यादिकं कर्म कुर्वतां ज्ञानसिद्धिदर्शनात् । अतो वयं [8]पञ्चदश्युपासकाः पूर्णाभिषिक्ताः कृतार्थाः कृत्याकृत्यसमाः किल । तस्मात् त्रिविधानामस्माकं निस्त्रैगुण्ये पथि विचरतां किं अवकुण्ठनं लोकत्रये विद्यते । विहिताविहितमार्गद्वयसूत्रबद्धानां स्वर्गनरकप्रवृत्तिः, ज्ञानिनां तु [9]मत्तगजवन्निरवकुण्ठनगतिप्रवृत्तेर्विद्यमानत्वात् । पूर्वयुगेषु

1. क० ईश्वरेऽपि विमर्शः पृथगेव ।
2. क. म2, भार्या अन्या तथैव
3. क. म2, रा. ०व तयोः जन्मादिविरुद्धत्वात् स्वतन्त्रा ।
4. रा. मणिवद्वसु
5. रा. ०राश्रितभुजादयः पञ्च०
6. रा, मातृकास्थपाठोऽयम् ।
7. रा. तदाश्रितयोरतिरिक्तशब्दवाच्यं, तद्व्यापाराभावात् । तयोर्नि०
8. क. म2, रा. षोडश्युपा०
9. रा. ०मत्तत्रयगळवन्नि०

भृग्वगस्त्यऋभुनिदाघजडभरतविश्वामित्ररामादिषु वामोपासकेषु लोकत्रयातीतवृत्तेः[1] [2]ज्ञानोन्नतेश्च दृष्टत्वात्तेषां मुक्तिः करस्थैव। तस्माच्च तदाचारशीलवतां [3]नः जीवद्दशायामपि मुक्तिरेव।

[4]यदि नो पश्चिमं जन्म यदि वा शङ्करस्स्वयम्।
तेनैव लभते विद्या श्रीमत्पञ्चदशाक्षरी ॥

इति देव्यागमवचनस्य सत्त्वात्। अतो विद्यावतां नः न किञ्चिद्विचारणीयम्। भवन्तोऽपि सर्वं परित्यज्य विद्योपासका भवत इति प्राप्ते श्रीमदाचार्यः पठति—भो, पूर्णाभिषिक्त! भवन्मतमसत्यम्; कथं? अनित्यत्वात्। तथाहि श्रुतिः—'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् [बृ. उ. ४-५-१५] इत्यादिना सिद्धज्ञानिनः पुरुषस्य आत्मातिरेकेण वस्त्वदर्शनात् तदानीं विमर्शः कुत्र कल्पनीयः। ईषदपि [5]तदतिरिक्तजगदभावात्। जगत्सत्यत्वे हेतुः प्रकृतिः; जगदभावे किं प्रकृत्यभावः शङ्कनीयः? अनित्यप्रकृतिज्ञानेन किं फलम्; अथ च तस्याः बहुरूपतोक्ता 'इन्द्रो मायाभिः पुरुरूप ईयते' [ऋ. सं. ४-५-३३] इति श्रुत्या। गुणमयी गुणकारणञ्च सा भवति। अतोऽनित्यायाः प्रकृतेरुपासनापेक्षया सत्यादिलक्षणलक्षितस्य परमात्मनो विशेषज्ञानेन मुक्तिदर्शनात् स एक एव सर्वैर्मुमुक्षुभिरुपासनीयः। तस्य सत्यसङ्कल्पत्वादिच्छामात्रेणैव महदादिजगदुत्पत्त्यादिकारणत्वात् ईश्वर एक एव सर्वैरुपास्यः। गृहस्थैः गृहिणीव देवी विमर्श इत्युक्तं, तदप्यसत्यम्। गृहिणीजात-

1. म2, ०त्तेः दर्शनात् मतस्य चाद्दष्टत्वात् तेषां मु०
2. रा. ज्ञानान्प्रत्यंस्य च दृष्टत्वात्
3. रा. नः निजदशायां मु० 4. म2. यश्च नो पश्चिमं; रा. यस्य नो पश्चिमं.
5. क. ०तिरेके जग०



सुखानुभवो गृहस्थस्यास्ति; देवे तदभावात्। किञ्च ईश्वरस्य अकि[1]ञ्चित्करत्वमुक्तम्, तदपि न संभवति; सर्वशक्तिः सर्वमयः सर्वकारणमिति श्रुतिभ्यः। वाङ्मनोवृत्त्यतीतस्य ब्रह्मणः [2]तदाश्रितत्वमुक्तम्। [3]भवद्विवेकस्य लक्षणं किमु वक्तव्यम्। कलञ्जभक्षणशीलस्य तव वाक् किं सत्या? अभक्ष्यभक्षणशीलस्य प्रामाणिकत्वाभावात्, वेदवि[4]रोधाच्च। अतो वामाचारवतां ब्राह्मण्यविच्छित्तिदर्शनात् भवद्भिः प्रायश्चित्तं कर्तव्यम्। भृग्वादिवद्वयं कृतार्था इत्युक्तम्। मन्दबुद्धीनां युष्माकं भृग्वादिसमता कथं स्यात्? भृगुपादताडितो[5] विष्णुः (ब्रह्मादि) प्रियमेव चकार। अगस्त्यादिषु समुद्रपानादिसाहसकर्माणि वर्तन्ते। भवतां तादृक्शक्तिः कथं नास्ति। तस्मात् मूढबुद्धिं परित्यज्य ब्राह्मण्याद्भ्रष्टैः भवद्भिः प्रायश्चित्तं कर्तव्यमिति सम्यगुपदिष्टास्ते परमगुरुं नत्वा सच्छिष्याः कृतप्रायश्चित्ताश्च शुद्धाद्वैतवादिनः सत्कर्मशीलाः पञ्चपूजापराः बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ शक्तिमतैकदेशत्रितयनिबर्हणं नाम
प्रकरणं द्वाविंशम् ॥

॥ २३ ॥

॥ कापालिकमतनिबर्हणम् ॥

तस्मात्पुरादुत्तरमार्गगामी श्रीशङ्कराचार्यगुरुस्सशिष्यः।
स उज्जयिन्याख्यपुरं ददर्श कापालिकाचारपरैस्समेतम् ॥

स्थित्वा द्विमासं तत्रैव तत्रस्थानाह सत्वरम्।
आचारः प्रोच्यतां युष्मत्कुलागतविधिश्च नः ॥

1. रा. किञ्चित्कर्तृत्वं० 2. म2. तदाश्रयत्व०
3. क. मद्विवेकस्य ल० 4. रा. ०विरुद्धत्वाच्च। म2 ०विरुद्धवचाच्च।
5. म2, रा. ०तो ब्रह्मापि प्रियमेव चकार। अग०; क. ब्रह्मादि प्रियमेव चकार।

इति पृष्टाः यतीशं तमूचुः कापालिकाः परे ॥
स्फटिकैरर्द्धचन्द्रैश्च जटाभिः परिशोभिताः ॥

स्वामिन्! [1]कर्मणा न मुक्तिरिति वचनात्। [अस्]मदुपास्यो भैरव एक एव जगत्कर्ता। यतः प्रलयो भवति, यो वा प्रलय[स्य]कर्ता स एव स्थित्युत्पत्त्योरपि। उपसंहारब[2]लान्निर्द्धारित उपक्रमोऽपि (चेति) शास्त्र[3]ज्ञैः तदंशा एव सर्वे देवाः तत्तदधिकारसंपन्नाः श्रीमद्भैरवाज्ञां शिरसा धृत्वा [4]तदुक्तिप्रत्या[पन्न]शक्तयः तत्तत्कार्यपरा बभूवुः। किञ्च मद्गुरुभिरिदमुक्तम् — एको भैरवो ह्यष्टमूर्तिधरः

असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः।
कपाली भीषणश्चैव संहारश्चाष्टभैरवाः ॥

इति वचनात्।

असिताङ्गो विष्णुरूपः। रुरुः ब्रह्मरूपः। चण्डः सूर्यरूपः। क्रोधो रुद्रः। उन्मत्तः इन्द्रः। कापालिकश्चन्द्रः। भीषणो यमः। संहारः स्वयम्। एतद्व्यतिरिक्ता देवाः तदंशाः। सृष्टिकर्तारस्सर्वेऽपि [5]रुर्वंशाः। स्थितिकर्तारस्सर्वेऽपि असिताङ्गांशाः। संहारकर्तारस्सर्वेऽपि क्रोधांशा इति। एवं जगत्सृष्ट्यादिकं कृत्वा प्रलयानन्तरं निजसप्तमूर्तिसंकोचं कृत्वा एकः शाश्वतः संहारभैरवः परमात्मा वर्तते। अतः सर्वथाऽस्मन्मतस्य श्रेष्ठत्वात् सर्वैः [अस्]मदाचारः परिग्राह्यः। सर्वदा बोधोल्बणत्वात् नित्यानन्दोऽहम्। वटुकनाथनामकः मच्छिष्योऽस्ति। विश्वरूपविदितवेषविश्वलयरूपादयः सर्वेऽपि सदा द्रव्यपानजनितबोधपरवशाः, कापालिकशक्त्यालिङ्गनतुष्टान्तरङ्गाः सङ्गमोद्भूतपरामृतपानपराः पशुजनकल्पितस्वाराज्यसुखं तृणीकृत्य देहान्ते भैरवपदमस्तीति निर्भया

1. 'न कर्मणा न प्रजया' [म. ना. ८·१४] इति वाक्यस्य अर्थतोऽनुवादः अयम्।
2. क. ०बलेनैव नीयतां उप० 3. क. स्त्रवृत्ते।
4. क. तदुक्ति प्रत्यासन्नशक्तय: म2. तदुक्तिप्रत्यासक्तय: 5. क. रुद्रांशाः



वर्तन्ते। एवमत्यन्तसन्तोषजनकमतममलकीर्तिविस्तृतं [सिद्धान्तं] परित्यज्य मूर्खजनाः श्रुतयः प्रमाणमिति (पूर्वपक्षसिद्धान्तं) [पूर्वपक्षं] नन्दिकेशविश्वकर्मादिदत्तशापाग्निभस्मादियुतमवलम्ब्य घटीयन्त्रघटवन्नैरन्त (र्ये) [र्येण] जन्ममरणप्रवाहपतिताः कथं बोधं (वहन्ति) [लभन्ते]। तस्मात् भवान् संन्यासी दण्डकमण्डलुधारी किल कर्महीनः [1]कापालिकमतयोग्य एव। अतो भवता स्वीकृते कापालिकमताचारे मच्छिष्याः सर्वे तथैव भविष्यन्तीति प्राप्ते श्रीमदाचार्यस्वामिभिरिदमुच्यते —

किं मूढमते! जल्पसि। मूलश्रुतिः भवन्मुख[2] गुहान्तरादाविर्भूतपश्चास्या इव विधिरहित[जन] मत्तमातङ्ग(जन)शिक्षादक्षा किल। अतः श्रुतिविरुद्धाचारतत्परान् युष्मान्[3] क्षेप्तुमाग[च्छ](म)म्। मद्यमांसाशिनां ब्राह्मण्यहानिदर्शनात् मद्यपायिनस्तत्र भैरवपरवचनेन किमागतम् [इति]। असंबद्धप्रलापिनं कापालिकमतगुरुं बहुस्त्रीपुरुषमर्यादाहन्तारं सर्वस्त्रीपुरुषसंपर्कसञ्जातपापभागिनं तृणीकृतवेदशास्त्रादिप्रपञ्चं ब्राह्मण्यसमिदावानलं त्वां [4]ताडयिष्यामि इति शिष्यैः तं सगणं ताडयामास। [अभि]हतः कापालिकगुरुः स्वशिष्यान् [5]ताडितान् दृष्ट्वा सक्रोधमुच्चैः हुङ्कृत्याह यतीश्वरम्। [6]एतावत् प्रापश्चिकैरवध्यः सगणोऽहं भवता ताडितोऽस्मि। मदुपास्यं संहारभैरवं मन्त्राविर्भूतं करोमि। स [7]तु त्वामचिरेण भक्षयिष्यतीति। एवमुक्त्वा पुनर्हुमित्युच्चार्य वामहस्तेन नरकपालं धृत्वा तत्सुरापूर्णं मन्त्रेण विधाय स्वयमर्धं पीत्वा अवशिष्टं शिष्येभ्यो दत्वा घूर्णारुणलोचनः स्वमध्यं पश्यन्निदमाह—

1. क ०कयोग्य एव।
2. रा. ०खगह्वराद्वा०; म2. खगह्वराच्छादितगुहावक्त्रात्पञ्चा०
3. म2. रा. ०न् ईक्षितुं पापतरम्। अद्य०
4. रा. वधिष्यामि इति। म2. दण्डयिष्यामि इति।
5. म2 परिपीडितान् दृ०; क. परिताडितान् दृ० 6. म2 एवं तावत् प्रापञ्चिकैः
7. 'स तु' इत्यत आरभ्य 'स्वमध्यं पश्यन्निदमाह' इति पर्यन्तो भागः नास्ति म2 मातृकायाम्।

यस्संहार[1] करो लोके भैरवः प्रभुरीश्वरः ।
स एवागत्य संन्यासिप्रभृतीन् भक्षय[2]त्वलम् ।

इत्युच्चैस्त्रिरुक्तिमात्रेण खड्गकपालभुशुण्डीशूलपाणिः दिगंबरो जटाक्षिप्तांबरः संहार-भैरवः किल आविर्बभूव—

संहारभैरवं नत्वा संन्यासीति किलाब्रवीत् ।
स्वामिन्! वेदेषु शास्त्रेषु पुराणेषु च कर्म यत् ॥

प्रतिपादितमस्तीह तत् कर्तव्यं हि धर्मतः ।
विप्राणां कर्मणा धर्मः साध्यस्स्यादिति मे मतम् ॥

धर्मेण सर्वपापौघो नाश याति शुचिव्रतात् ।
पापसङ्घे तथा नष्टे मनश्शुद्धिः प्रजायते ॥

शुद्धे मनसि सर्वात्मसाक्षात्कारो भवत्यलम् ।
स एवमुक्तः सर्वेषां ब्राह्मणानां भयेरितः ॥

त्वद्भक्तः सहसाऽवादीत् दुष्टयुक्तिपरंपराम् ।
एतन्नोचितमित्युग्रं मच्छिष्यैस्ताडितस्सतु ॥

अकरोदागतं त्वां तु मन्त्रबीजपरायणः ।
इतः परं त्वमेवैतत्सत्यासत्यं कुरु प्रभो ॥

इत्युक्तो भैरवः प्राह विप्रदण्डार्थमागतः ।
शङ्करस्त्वं सदापूज्यः [3]सर्ववेदपरार्थभाक् ॥

भवत्कृतं हि यत्कर्म मयापि च कृतं हि तत् ।
तेषां कापालिकानां तु ब्राह्मण्याचारतां कुरु ॥

1. क. ०रकालो भैर०  2. क. ०य सत्वरम्
3. क. सर्ववेदपदार्थभाक् ।



विकले तु कलौ प्राप्ते तेषां वृत्तिर्यथेप्सिता ।
बभूव मन्त्रबद्धोऽहं प्रत्यक्षोऽस्मि न धर्मतः ॥

इत्युक्त्वान्तर्दधे देवः, कापालिकमतानुगाः ।
तद्वाक्यश्रवणाद्भीताः परिव्राट्कुलशेखरम् ॥

नत्वा द्वादशधा सर्वे वटुकाद्याः सुविस्मिताः ।
स्वामिन्! मूढा वयं यस्मात् पालयास्मांश्च सादरम् ॥

एवमालापिनो दृष्ट्वा करुणापूर्णविग्रहः ।
आज्ञापयामास यतिः शिष्यांस्तेषां विशोधने ॥

पद्मपादमुखाः शिष्याश्चक्रुस्तान् ब्राह्मणाध्वगान् ।
प्रातः स्नानरतान्नित्यं सन्ध्याकर्मदृढव्रतान् ॥

पञ्चपूजापञ्चयज्ञपरान्निश्चलमानसान् ।
वटुकादयस्ते सर्वज्ञमूर्तिं परमगुरुमाश्रित्य सच्छिष्या बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ कापालिकमतनिबर्हणं नाम त्रयोविंशं प्रकरणम् ॥

॥ २४ ॥

## ॥ कापालिकैकदेशिमतनिबर्हणम् ॥

एवं निराकृते कापालिकमते पुनरन्ये नानावर्णाः कापालिकाः चार्वाक-सौगत-क्षपण[काःच](क-जैन-बौद्धाः)प्रत्यवतिष्ठन्ते । तत्र [1]तावच्छूद्रजातिः उन्मत्त-

1. तावदित्यत आरभ्य 'कापालिकः' इति पर्यन्तो भागः नास्ति रा. मातृकायाम् ॥

भैरवनामा कश्चन कापालिकः, चितिभस्मसंपूर्णकलेवरः नरकपालमालावृतगलः फालप्रदेशरचितकज्जलरेखः सकलकेशरचितजटाभारी व्याघ्रचर्मरचितकटिसूत्र-कौपीनः कपालशोभितवामकरः [1]सनादघण्टाधृतदक्षिणकरः शम्भुभैरव! अहो, कापालीश! इति मुहुर्मुहुर्जल्पन्नाचार्यस्वामिनमिदमब्रवीत् —

स्वामिन्! कापालिकमते का न्यूनताऽस्ति। तदन्यत्र किं फलमस्ति? वटुकनाथादिकाः भवद्भिस्तिरस्कृताः कापालिकमतभ्रष्टा बभूवुः। तद्दूषणं ब्राह्मणजातिमत्त्वम्। न मे जात्या प्रयोजनं वर्तते। अविवेकस्यैव जातिः कारणम्। ब्रह्मादिपिपीलिकान्तदेहस्य भौतिकत्वात् कस्य जातिर्वक्तव्या। अन्नमयशरीरस्य चर्ममांसास्थ्यादिसप्तधातुमयस्य सर्वप्राणिषु समत्वेनैव वर्तमानस्य[2] विशेषा[3]विशेषौ भवद्भिः [4]कल्पितौ। भैरवाज्ञया मातृयोनेरुत्पन्नस्य नीचोच्चवृत्तित्वं मन्दा अपि नाङ्गीकुर्वन्ति। अतोऽस्माकं न हि प्रमाणं जातिः। किन्तु जातिद्वयं दृश्यते—स्त्रीणामेका जातिः पुंसामेका जातिः इति। तयोर्मध्ये स्त्रीजातिः श्रेष्ठा। कथमित्युक्ते, तत्संयोगे नानन्दभैरवानन्दस्य विद्यमानत्वात्। यदुक्तं श्रुत्यादि[5]भिः भवद्भिः परदारान्नगच्छेदिति निषेधवाक्यं, तद्वयं नाङ्गीकुर्मः। अस्मन्मताधिकारिणि या विद्यते सा मदीयैव। आनन्दग्रहणार्थं चर्मणश्चर्मसंयोगे कृते जीवस्य कोऽनर्थ आगतः। परामृतवृत्तजीवस्य मोक्षदर्शनात् [स] (सार्थक एव) [6]साधक एव, देहपातनानन्तरं भैरवप्राप्तिरेव मोक्षः इति प्राप्ते श्रीमदाचार्यः पठति —

1. रा. सहस्रनाथघटीधृतद०
2. म$_2$. ०स्य विशेषं भव०
3. क. म$_2$. रा. ०विशेषत्वं
4. क. म$_2$. रा. कल्पितम्।
5. म$_2$, ०दिभवद्भिषयाभिः पर०
6. रा. मातृकास्थपाठोऽयम्।



भोः! कापालिक, समीचीनमुक्तं भवता। इदमेकं सत्यं वद, भवन्माता कस्यपुत्री इति। [एवं] नियमितः कापालिकः पुनराह—स्वामिन्। मदीयमाता दीक्षितपुत्री। [तत्पितुः] दीक्षितत्वं कथमित्युक्ते तालादिवृक्षगतां सुरामाहृत्य हस्तग्रहणादिना, तदानन्दाभिज्ञोऽपि[सः]स्वयं न पिबति। किन्तु तद्विक्रयणशीलः; तस्मात् दीक्षित इत्युच्यते। तस्य पुत्रिका मम माता। आनन्दानुभवाय आगतान् पुरुषान्निजाङ्गसमर्पणानन्दमहासमुद्रमग्नान् सदा करोति। तत्सुतोऽहं उन्मत्तभैरव नामा। सुरापानचमत्कारसंपन्नस्य एवमेव प्रसिद्धेः। मत्पिता कुलाल; तदग्रे देवा अपि न तिष्ठन्ति। सुरागन्धविमुखाः पलायन्ते। अतः पितृतः समागतः सत्कुलप्रसूतोऽहं भवद्भिरपि न विचारणीय एव—इत्यादि वचनालापिनं परमयतिः इत्थमाह[1] — गच्छ कापालिक! यथासुखं विहर! ब्राह्मणान् दुष्टमतावलम्बिनो दण्डयितुमस्मदागमनम्। तदितरेषां अग्रजपादसेवनादिवृत्तिः तदाचारानुसरणं च प्रशस्तम्। [तथापि] भ्रष्टस्य तव किं न्यूनमिति। एवमुक्त्वा एव उच्चाटनीय इत्याह। आचार्यवचनं शिरसा परिगृह्य तच्छिष्याः केशघातपुरस्सरं मदिरापानमत्तं कापालिकं दूरमत्यजन्।

|| इत्यनन्तानन्दगिरिकृतौ कापालिकैकदेशिमतनिबर्हणं नाम प्रकरणं चतुर्विंशम् ||

1. रा. मातृकास्थपाठोऽयम्।

॥ २५

## ॥ चार्वाकमतनिबर्हणम् ॥

ततश्चार्वाकः प्रमथैः शङ्करमिव बहुशिष्यवरैराश्रितं लोकगुरुं श्रीशङ्कराचार्यं दृष्ट्वा, ‘किमेतत् जगत् मूर्खजनाक्रान्तं विचित्रमिव भाति, किञ्चिज्ज्ञाः देहेन्द्रियातीतशून्यात्मवादिनः, अतस्तेषां मुक्त्यभावादेव लोके किल विकला इव [1]बहवो जाता मूढतराः, तेषां सहवासेन बुद्धिमतामस्माकमपि दुष्टमतिता आयास्यति’ इति बहुधा विचार्य, एवमपि तदग्रणीः संन्यासी कश्चिदस्ति खलु; तस्य यदि विवेकोऽस्ति तदा तदग्रे क्षणं स्थास्यामि नोचेच्छीघ्रमागच्छामीति च सभां प्रविश्येदमुवाच —

स्वामिन्! यदि भवता परमार्थो विदितः तर्हि मुक्तिलक्षणं वद। [2]तावत् मद्विवेकः श्रूयताम्। पितृमातृकारणस्य कार्यरूपशरीरस्य इन्द्रियप्राणजीवात्मकस्य लय एव मोक्षः। मन्दमतयः तस्य पुनरागमनं जल्पन्ति। भस्मीभूतस्य देहस्य पुनरागमनं कुतः शक्यं वक्तुम्। यदि समुद्रलीनसरिदंभसां पुनरागमनमस्ति तदा मृतिं गतानामपि पुनरागमनमायाति। अतो मृतिरेव मुक्तिरिति निरवद्यम्। केचिन्मन्दधियः किल मृतानां श्राद्धं कर्म कुर्वन्ति; वदन्ति तदन्नेन मृतानां तृप्तिरस्तीति। तद्विवेकः किमु वक्तव्यः। किञ्च स्वर्गनरकरूपः परलोकोऽस्ति; तत्र सुखदुःखानुभवो मृतानामस्त्येव। पुण्ये पापे वा क्षीणे देहिनः पुनर्मर्त्यलोकप्राप्तिरिति केचिज्जल्पन्ति। तन्मतं

1. म$_2$. पिशाचा जा०
2. रा. तावत् मद्विवेकशून्या। पितृ०



सुनरामप्रमाणम्। इहैव स्वर्गनरकानुभवस्य विद्यमानत्वात्। यो वा सुखभुक् स एव स्वर्गस्थः; यो वा क्लेशभुक् स एव नरकस्थः, इति प्रत्यक्षदृष्टस्वर्गनरकरूपफलस्य परोक्षस्थितिः न हि कल्पयितुमुचिता। (भूतेषु) भूतानां तत्कार्येन्द्रियाणाञ्च नष्टत्वात्तेषां परलोकगमनमनर्थकम्[1]; किन्तु (जीवस्येति चेन्न—तस्य रूपाभावात्, रूपहीनस्य जीवस्य कथं गमनं वक्तुं उचितम्। घटाकाशस्य गमनास्ति तथा) जीवस्य गमनं वक्तुं शक्यम्; वृक्षाद्वृक्षाग्रं गतस्य पक्षिण इवेति चेन्न—सरूपस्य पक्षिणस्तथागमनमुचितं, नीरूपस्य जीवस्य तथा वक्तुमशक्यत्वात्। तस्मादस्मन्मतमेव फलदमिति प्राप्ते श्रीमद्भिराचार्यैरिदमुच्यते —

भोः चार्वाक! भवन्मतं नार्हम्। वेदविरोधात्। जीवः देहेन्द्रियादिभ्यो भिन्नः। स [2]एवास्माभिः परमात्मेत्युच्यते। स एव सर्वभूतान्तःकरणेषु वर्तमानः साक्षी कूटस्थ इत्युच्यते। अन्तःकरणवृत्तौ कूटस्थस्यैव प्रतिफलने जीव इति प्रसिद्धिः। [स] यदा शुद्धान्तःकरणः लिङ्गशरीरग्रन्थिच्छेदं करोति तदा जीवस्य जीवत्वभ्रान्तिविच्छित्तिः सैव मोक्षः, इति निश्चयस्य सर्ववेदवचन (सम्यगर्थ) तात्पर्यात्; देहपतनमेव मोक्ष इति कथमुक्तं भवता। ज्ञानादृते मोक्षस्याभावात्। ‘ज्ञानाग्निदग्धकर्माणो यान्ति ब्रह्म सनातन’मिति श्रुतेः। भौतिकदेहे अग्निना दग्धेऽपि स्थूलाख्ये, सूक्ष्मकलेवराख्यलिङ्गदेहावृतः परत्र याति जीवः। तस्य स्वर्गनरकयोः पुण्यपापानुभविता युक्तैव। ज्योतिष्टोमेन स्वर्गकामो यजेत’ इति श्रुतेः। इहलोकदेहात् अन्यः परलोके तदनुकूलश्च देहः। जीवस्य जलूकावत् परावलम्बमनतीन्द्रियवादिभि-

1. परलोकगमनवाक्यं अर्थशून्यं वाक्यम् इत्यर्थः — टि।
2. म$_2$. एव भावायक्तः पर०

रुदाहृतम्। श्रुतिश्च—‘तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति’ [बृ. उ. ४-४-३] इति। तत्पुत्रादिना मृतोपाधिस्थस्य जीवस्य श्राद्धकर्म कर्तव्यम्। तेन तस्य प्रेतत्वनिवृत्तिः पुण्यलोकावाप्तिश्च भवत्येव। गयादिषु पुण्यस्थलेषु पिण्डदानान्मुक्तिरस्तीति पुराण[1]दर्शनात्। जीवस्य रूपाभावात् कथं परलोकगमनमित्युक्तम्। जीवस्य लिङ्गशरीरमेव रूपम्। इदं सप्तदशेन्द्रियात्मकं लिङ्गं मदीयमित्यभिमान(तो)विशेषात्। अमुक्तेलिङ्गस्थस्य अन्तःकरणवृत्त्यन्तःप्रतिफलितत्वात् सगुणता कल्पनीया। तावदज्ञोऽहं जीवोऽहं कृशोऽहं स्थूलोऽहं सुख्यहं दुःख्यहं चेति स एव मन्यते। अतः सगुणत्वात् पक्षीव लोकाल्लोकान्तरं गन्तुमुचितमेव (सिद्धान्तितम्)। तस्मात्[2] चार्वाकमूढ! पापाचार! तूष्णीं गच्छेत्युक्तः स तु वेषभाषादिकं परित्यज्य श्रीमदाचार्यगुरुपादपद्मद्वयं नत्वा तत्पुस्तकभारभरणो[3]द्युक्तोऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ चार्वाकमतनिबर्हणं नाम प्रकरणं पञ्चविंशम् ॥

॥ २६ ॥

## ॥ सौगतमतनिबर्हणम् ॥

ततः पीनकलेवरः सूक्ष्मशिरस्कः सौगतः शङ्करगुरुं [1]नमस्कृत्येदमुवाच—स्वामिन्। जगदिदं व्यत्यस्तमासीत्। सर्वेऽपि दुर्बोधवशात् कर्मशीला इव

1. म₂. ०णश्रवणात्।
2. म₂. ०त चारुवाक गच्छे०
3. म₂. चुक्तगोपालकोऽभवत्।
4. क. नत्वा इद०



भान्ति। किं कर्मणा भौतिकदेहास्यास्ति सृष्टिस्थितिलयं विना। तादृक्शरीरस्य भौतिकरूपस्य स्नानेन किं शुद्धताऽस्ति? जीवस्तु निर्मलो देहपातानन्तरं मुक्तः। तयोरन्तरं वेत्ति चेत् कथं वा स्नानवशात् शुद्धिरस्ति। अतो निरर्थकत्वात् स्नानादिकर्म न कार्यम्। ऋणवशाज्जीवः पुनर्जातो भवतीति केचिन्मूर्खजनाः जल्पन्ति, तदसत्। देहादृष्टप्राप्तधनस्य कथं ऋ(णि) [ण]ता वक्तुमुचिता। द्रव्यलब्धघृतादिभक्षणेन देहपुष्टेः विद्यमानत्वात् पुष्टशरीरस्यैव जीवतुष्टिकारणत्वात्। अतः ‘ऋणं कृत्वा घृतं पिबेदि’ति वचनस्य प्रमाण्यात् तत्त्वविदा पुष्टशरीरेण भवितव्यम्। देहान्ते ऋणाभावात्। तस्मात् तत्र तत्र ऋणं कृत्वा समग्रभक्षणशीलस्य सुखप्राप्तिरेव मोक्षसाधनम्। तदन्ते मोक्षप्राप्तिः करस्थैवेति प्राप्ते—

श्रीमच्छङ्कराचार्यैरिदमुच्यते — किं सौगत! जल्पसि। देहपातानन्तरं जीवस्य मोक्ष इत्युक्तम्। तदसत्यम्। कथं? परलोक[1]गमनदर्शनात्। तत्र सुखदुःखानुभवस्य श्रुतिसिद्धत्वात् अन्यथा वक्तुमनुचितम्। स्मृतिश्च—‘क्षीणे पुण्ये मर्त्यलोकं विशन्ति’ [भ. गी. ९-२१] इति। अनेन परलोके लिङ्गशरीरबद्धजीवस्य सुखदुःखाद्यनुभवः सिद्धोऽभूत्। अतः परलोकादागत्य यस्य वा ऋणं दातव्यं, यस्य वा द्रव्यमपहर्तव्यं तद्गर्भे तस्य जन्म भवत्येव। तस्माद[2]ज्ञबुद्धिं पापपङ्कलिप्तां परित्यज्य सन्मार्गगामी भव इत्युक्तः पुनराह—स्वामिन्! सुगतमुनिः चतुस्समुद्रान्तां भुवं दृष्ट्वा विस्मयाविष्टमानसः सत्यमेतदिति जगद्विचार्य सर्वप्राण्युपासकोऽभवत्। स तु मदुपदेशकाले करुणावशादिदमाह—‘सर्वप्राण्यहिंसा परमो धर्मः। तादृग्विधधर्मेणैव(कपाल)[पाप]निवृत्तेर्मुक्तो भवसी’ति। तदारभ्य अहमपि गुरुवाक्यं शिरसा परिगृह्य तत्पादध्यानासक्तः

1. क. ०कागमन०
2. क. रा. ०दज्ञानबु०

सर्वप्राणिषु दयापरोऽस्मि। तदन्यो धर्मो नास्त्येव लोके किल; अतः परं मतमस्मदीयं धर्मस्थानं भवदादिभिः सर्वैरङ्गीकरणीयमिति पुनस्सौगतमते प्राप्ते परमगुरुभिरिदमुच्यते—रे रे सौगत! नीचतर किं किं जल्पसि। अहिंसा कथं परमो धर्मो भवितुमर्हति। यागीयहिंसायाः धर्मरूपत्वात्। तथाहि—अग्निष्टोमादिक्रतुषु छागादि[1]पशुवपयागस्य परमधर्मत्वात् सर्वदेवतातृप्तिमूलत्वाच्च, तद्द्वारा स्वर्गादिफलदर्शनाच्च, पशुहिंसायाः श्रुत्याचारतत्परैरङ्गीकर्तव्यतया तद्व्यतिरिक्तस्यैव पाषण्डत्वात् तदाचाररता नरकं यान्ति।

वेदनिन्दापरा ये तु वेदाचारविवर्जिताः।
ते सर्वे नरकं यान्ति यद्यपि ब्रह्मबीजजाः।

इति (मनु) वचनात्।

हिंसा कर्तव्या इत्यत्र वेदाः सहस्रं प्रमाणं वर्तन्ते। ब्रह्मक्षत्रियवैश्यशूद्राणां इतिहासपुराणाचारः प्रमाणमेव। तदन्यः पतितः नरकगामी चेति समुपदिष्टः सौगतः परमगुरुं नत्वा निरस्तसमस्ताभिमानः पद्मपादादिगुरुशिष्याणां [2]पादरक्षाधारणाधिकारकुशलः सन्ततं तदुच्छिष्टान्नभक्षणपुष्टतनुरभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ सौगतमतनिबर्हणं नाम प्रकरणं षड्विंशम् ॥

1. क. ०शुमान् या०
2. रा. रक्षणाधारणाधिकारकुशलः सन्त० म$_2$. रक्षाधारणकुशलः सन्त०

॥ २७ ॥

## ॥ जैनमतनिबर्हणम् ॥

ततः क्षपणकः कौपीनमात्रधारी गोलयन्त्रं तुरीयन्त्रं च कराभ्यां धृत्वा समागत्याचार्यस्वामिनमिदमब्रवीत् — भोः स्वामिन्! मदीयमतमतिविचित्रं शृणु। क्षपणकः पूर्णसमयनामाऽहं कालजनकं सूर्यं गोलेन तुरीयन्त्रेण बद्ध्वा समयज्ञानेन स्वर्गमर्त्यपातालस्थललभ्यालभ्यशुभाशुभं वच्मि। किञ्च काल एव परमदेवता। मत्पक्षं चलयितुमीश्वरोऽपि न समर्थ इति। [एवं] जल्पन्तमाचार्यः प्रत्युवाच —

भोः पूर्णसमय! समीचीनमुक्तं भवता। त्वं कालवित् किल; तथैवाहमपि। तस्मान्मदाश्रयेणागच्छ। यत्र भवत्परीक्षोचितकालागमनं तदानीं त्वां पृच्छामीति। एवमुक्तः स तु तथैवास्त्विति तं सर्वदाऽऽश्रित्य सिद्धसङ्कल्पोऽभवत्।

ततो जैनः कौपीनमात्रधारी मलदिग्धाङ्गः सदा अर्हन्नर्हन् इति मुहुर्मुहुरुच्चैरुच्चरन् शून्याङ्कः शून्यपुण्ड्रः धृतबिन्दुपुण्ड्रः शिष्यसमेतः पिशाचवत् सर्वजनभयङ्करः सभामागत्य लोकगुरुमिदमुवाच — मदीयमतमत्यन्तसुगमं श्रूयताम्। जिनदेवः सर्वेषां किल मुक्तिदः। [1]जीतिवाच्यस्य जीवस्य नेतिपदेन न पुनर्भव इति। स एव दीव्यत इति देवः सर्वप्राणिहृत्पुण्डरीकेषु जीवरूपेण व्यवस्थितः इति ज्ञानमात्रेण देहपातानन्तरं मुक्तिः, तस्य नित्यमुक्तस्वरूपत्वात्। [2]अतो जीवश्शुद्धः। देहस्तु मलपिण्डः; स्नानादिना तस्य शुद्ध्यभावात् वृथाप्रयोजनं स्नानादिकर्म न कार्यमिति। [एवं] प्राप्ते परमगुरुः पठति —

1. म$_2$. जनिपद्वा०
2. तेन करचरणादिगूढनद्वारा यद्यत्कर्म कृतं, तत्तदसत्यम्, तस्य तदधीनत्वात्। अतो जीवः इति म$_2$ मातृकायाम्।

भो, जैन! किमुक्तं भवता मूढतरेण। 'जीवस्य देहनिवृत्तिरेव मुक्तिरिति, निष्प्रयोजनत्वात् स्नानादिकर्म न कर्तव्य'मिति च। तदयुक्तम्। कथं? जीवस्य देहत्रयं विद्यते। स्थूलसूक्ष्मकारणभेदात्। स्थूलस्य लक्षणन्तु पञ्चीकृतपञ्चमहाभूतस्वरूप[त्वम्](चतुर्विंशतितत्त्वात्मकत्वम्)। सूक्ष्मस्य सप्तदशात्मकत्वं लक्षणम्। [तत्] एकादशेन्द्रियपञ्च(भूत)[प्राण] बुद्धिसंघात[रूप]म्। कारणं तु अज्ञानमात्रम्। तेषां लयस्तु - स्थूलस्य सूक्ष्मे, तस्य कारणे, कारणस्य सगुणे, सगुणस्य निर्गुणे परमात्मनीति। तत्तदधिपतिविशिष्टानां देहानामेवं लये सच्चिदानन्दलक्षणलक्षितः परमात्मैव जीवः। तथा भेदभ्रमनिवृत्तौ मुक्तिरिति निरवद्यम्।

ननु प्रत्यक्षदृष्टाच्छरीरात् शरीरान्तरकल्पना निरर्थिका। तत्सत्तामाने प्रमाणाभावात्। यद्यस्ति तर्हि जीवस्य देहत्रयसञ्चारो वक्तव्यः। मनःकल्पिते स्वप्ने मया गङ्गा दृष्टा, हिमवान् मया दृष्ट इति च प्रत्ययोऽस्ति। [अतः स्थूलात्] देहादात्मनो निर्ग[मः](मनस्य) युक्[तः](त्वात्)। [सुषुप्तौ] कारणशरीरे प्रवेशे जीवस्य [मनःकल्पितात् स्वप्नात्] निर्गमनमेव वक्तव्यम्। निर्गते जीवे पुनः प्राप्त्यभावात् स्वप्नानन्तरमेव मरणप्रसक्तिः। [प्रत्यक्षदृष्टपञ्चभूत] (चतुर्विंशति)तत्त्वेष्वेव लिङ्गस्यान्तर्भावात् तत्कल्पना व्यर्था। इन्द्रियाणां तद्रूपत्वात्। अतोऽनया क्लिष्टकल्पनया न हि किञ्चित्प्रयोजनमस्ति। तस्मादेको देहः प्रतिजीवम्। तत्पातानन्तरं जीवस्य मुक्तिरिति —

श्रीमद्भिरिदमुच्यते — जैन मूढतर! त्वं न श्रुतवानसि। पञ्चीकृतभूतैः (पञ्चविंशतिसंख्या जाता। तथा तत्त्वानां चतुर्विंशतिः अभवत्। पञ्चविंशतिसंख्याकस्य ज्ञानरूपत्वात्) [स्थूलशरीरमभवत्]। नहि (चतुर्विंशत्या) [तन्मात्रेण पूर्ण] देहसिद्धिर्भविष्यति, अपञ्चीकृतपञ्चभूताभावात्। अतः पञ्चीकृतैरपञ्चीकृतैश्च भूतैर्देहसिद्धिर्वक्तव्या। अतः स्थूलापेक्षया [अन्यत्] लिङ्गशरीरमङ्गीकृतम्। स्थूलशरीरपातानन्तरं जीवे सूक्ष्मशरीरासक्ते परलोकगमना-



रम्भः प्रसज्यते। आरूढस्य पुरुषस्य तु[1] जीवलिङ्गे मनस्येव सर्वमध्यस्तं भवति। तच्छुद्धं मनस्तु जाग्रदाद्यवस्थास्ताभिभ्यो विश्वतैजसप्राज्ञेभ्यश्चोपरि विराजमानमङ्गुष्ठमात्रं सर्वजगत्प्रभुं मनोन्मनाख्य समधिगच्छति। स एव कारणशरीरलय इति प्रसिद्धः। एवं नष्टे शरीरत्रितये सगुणनिर्गुणोभयात्मको मनोन्मनः परमात्मनि लीनो भवति। स एव मोक्ष इति सर्वैरतीन्द्रियविद्भिरुदाहृतः। एवमत्यन्तदुस्साध्यस्य मोक्षस्य न हि देहपातात् प्राप्तिस्सम्भवतीति सिद्धान्तः। एवं श्रीमद्भिरुक्तो जैनः शिष्यैस्सह वेषभाषाविमुक्तः परमगुरूणां प्रतिदिनं तण्डुलादिकवस्त्वा[हरण](कर्षण)शीलः। [2]परिजनः अभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ जैनमतनिबर्हणं नाम प्रकरणं सप्तविंशम् ॥

## ॥ २८ ॥

## ॥ बौद्धमतनिबर्हणम् ॥

एवं निराकृतेषु कापालिकचार्वाकसौगतक्षपण [केषु अन्यः] (कजैनेषु) बौद्धः किल शबलनामा (प्रबलः) प्रत्यवतिष्ठते। स्वामिन्! सर्वोत्तम इव ऽवर्तसे। किं तव ज्ञाने। अद्वैते न फलमस्ति। तस्य शशविषाणवदत्यन्तासत्त्वात्। दृष्टफलं परित्यज्य अदृष्टफलाभिलाषी कथमसि। प्रत्यक्षद्रोहिणस्तव परोक्षेऽपि फलाभाव एव भविष्यति। सर्वशून्यस्य परोक्षस्य फलदानासमर्थत्वान्निर्जीवत्वाच्च। यस्तु, जीवशब्दवाच्यं चैतन्यं किल लोके सर्वप्राणिषु वर्तते स तु एकोऽपि बहुरूपाणि धृत्वा हृदयादिप्रेरको भूत्वा नित्यमुक्तस्वरूपः कर्ताऽहं भोक्ताऽहमद्वयः परमानन्दोऽहमिति मन्वानः स्वाभीष्टं यावत् तावद्देहेषु क्रीडन् पश्चान्मुक्तो भवति देहं परित्यज्येति बौद्धोक्तः परमगुरुः पठति —

---

1. क., स2,. तु क्षीणे लिङ्गे सर्वं मनस्येवाध्यस्तं भवति।
2. क. श्रा. वणिग्जनः अ०

भो शबल ! अनर्हं भवता प्रतिपादितम् । कथम् ? अत्यन्तविरुद्धत्वात् । तस्य मोक्षः कथम् ? देहपातानन्तरं परलोकगमनदर्शनात् । तथा हि पुराणे—

सत्यशौचरतो यस्तु देवतातिथिपूजने ।
स याति ब्रह्मणो लोकं यावदिन्द्राश्चतुर्दश ॥

अग्निष्टोमं देवताप्रीतिदं यः कुर्यादस्मादिन्द्रलोकं हि याति ।
सत्याख्यं सत्पौण्डरीकात् प्रयाति तत्तद्देवोपासकास्तं तमेव ॥ इति ॥
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ [भ. गी. ७-२१]

इति भगवद्गीतावचनात् । इयं देवता मदीयोपासनया तुष्टा देहावसा[ने] ([1]नात्) मे तल्लोकवासं दास्यतीति प्रमाणशतस्य विद्यमानत्वात् जीवस्य देहपातानन्तरं लोकान्तरगमनमस्तीति सिद्धमेव । परमात्मा सर्वदेवरूपः सर्वलोकद इति प्रसिद्धः । यो देवो यस्याभीष्टः तल्लोकदः स एवात्मा एकोऽद्वितीय इति सिद्धम् । अतो देहपातानन्तरमेव मुक्तिरिति सुतरामयुक्तम् । ज्ञानमृते मुक्त्यभावदर्शनात् । ज्ञानस्य किं वा लक्षणमित्युक्ते सर्वभूतानि स्वस्मिन् सर्वभूतेषु [स्वं] च ध्यात्वा पुरुषो मुक्त इति प्रसिद्धेः । उक्तञ्च श्रुतौ —

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥ [कै. उ. १०] इति ।

तस्मात् शबल ! मूढबुद्धिं परित्यज्य स्वस्थो भवेत्युक्तः शबलनामको बौद्धः[2] परमगुरुं नत्वा तत्कीर्तिस्तवपरो बन्दिमागधस्तवेषधार्यभवत् ॥

॥ इत्यनन्तानन्दगिरिकृतौ बौद्धमतनिबर्हणं नाम प्रकरणमष्टाविंशम् ॥

1. क. ०नान्मे लोकवा०
2. क. ०द्धः श्रीमदद्वैतसिद्धान्तिनं शङ्करमात्मानं पर०

॥ २९ ॥

## ॥ मल्लारिमतनिबर्हणम् ॥

तस्माद्वायुदिशि प्रसिद्धमखिलैः शिष्यैः समेतः परः
प्राप प्रोद्यदिनाभमूर्तिरनुमल्लाख्यं हि सत्पत्तनम् ।
स्थित्वा तत्र दिनैकविंशतिमशेषान् वीक्ष्य तत्राश्रितान्
किं विप्रा ! वदत प्रभातमुखकाले कृत्यमार्षोद्गतम् ॥

जगद्गुरुभिराचार्यैः एवमुक्ताः पौराः किल नत्वेदमूचुः । स्वामिन् ! मद्वंशप्रवृत्तेरागतमिदं लक्षणं यः परमेश्वरः मल्लासुरहरः मल्लारिरिति प्रसिद्धो लोके वर्तते । तन्मूर्तिः किलालैवाविर्भूता [1]जगदुत्पत्तिस्थितिसंहतिकारणम् । तामनुदिनं संपूज्य तद्वाहनरूपशुनकवेषभाषादियुक्ता वयं कण्ठधृतवराटिकामालिकाङ्काः शङ्काहीनाः त्रिकालं नाटयस्तवादिभिः मल्लारिं प्रीतं कृत्वा वसामः । तत्कटाक्षजनितानुदिनवर्धमानानन्दपरवशाः सर्वं जगत् मल्लारिगर्भकोटरान्तर्गतमिति[2] ध्यानासक्ताः तदतिरिक्तं किञ्चिदपि नेच्छामः, तस्यैव सर्वात्मकत्वात् । किञ्च वेदेषु मल्लारिणः सर्वव्यापकत्वं वर्तते । तद्वाहनस्यापि [3]वेदगीतत्वात् तद्वेषभाषासक्तानामस्माकं [4]नह्यन्यास्ति देवता । तथा हि श्रुतिः—' श्वभ्यः श्वपतिभ्यश्च वो नमः ' [कृ. य. सं. ४-५-४] इति । अतः श्रुतिप्रसिद्धाचारस्य दुर्निवार्यत्वात् त्वमपि सशिष्यः परममुक्तिकारणं अस्मदाचारानुग्रहणं कुरु । भवद्धारणयोग्यानि वराटकानि दास्यामः इति प्राप्ते —

श्रीमदाचार्यैरिदमुच्यते — किं मूढतम ब्रवीषि । मल्लारिकारणवादित्वं कथं घटते, वेदविरुद्धत्वात् । यतः परमात्मा एकोऽद्वितीयः सर्वसाक्षी सर्वकारणं

1. क. ०स्थिसंपत्तिका० 2. म2. ति ज्ञानास० 3. क, वेदविहितत्वात्
4. रा. मातृकास्थपाठोऽयम् । क. म2, मातृकयोः 'नह्यन्येच्छा' इति पाठः वर्तते ।

‘सदेव सौम्येदमग्र आसीत्’ [छा. उ. ६-२-१] इत्यादिश्रुतिप्रतिपादितः। [1]तद्ब्रह्माखिललोककर्ता। तदिच्छारूपया प्रकृत्या महदादिकं[2] जगदसृजत। प्रकृतेर्गर्भजाताः ब्रह्मविष्णुरुद्राः सृष्ट्यादिकर्तारः किल। [3]तदन्ये ये देवाः तत्तद्गुणानुकूलवृत्त्या तदंशा एवेति प्रसिद्धाः। तेषां [4]तत्र तत्र लयः [5]प्राप्तः। तादृशरुद्रांशाः वीरभद्रादयो बहवस्सन्ति। तेषां ज्ञानेन मुक्तिरिति वक्तुं अनुचितमिव भाति। मुक्तेः जीवेशभिदाविरहकारणत्वात्। किञ्च श्ववाहनारूढस्य मल्लारिनाम्नो रुद्रांशस्य वेदप्रतिपादितत्वात् तन्मतमङ्गीकर्तव्यमिति किल भवतोक्तम्। न हि तदपि प्रौढतरम्। एकादशरुद्राणां स्तवमारभमाणेन नमकेन कथं मल्लारिस्तुतिः कृता। ‘श्वभ्यः श्वपतिभ्यश्चे’ [कृ. य. सं. ४-५-४] त्यत्र रुद्रबाहुल्यात् बहुवचनमुक्तम्। ननु — पूजायां बहुवचनमिति न्यायेन मल्लारिभ्यः श्वपतिभ्य एव नम इत्यर्थः, पूर्ववाक्ये श्वभ्य इति तद्वाहननमस्कारस्य विद्यमानत्वात् इति यद्युच्येत — न तदङ्गीकर्तव्यम्। रुद्राणां जगद्व्यापकत्वं प्रतिपादितम्। श्वभ्यः श्वान्तर्गतरुद्रेभ्यो नमः। श्वपतयः [6]श्यावशबलादयो वैवस्वतवंशसंभवाः; अथवा श्वपतयः श्वविक्रमार्जितमांसादिभुजः; अथवा श्वपतयः चाण्डालाः श्वमांसभक्षणशीलाः तेषां विविधानां हृदयव्यापकेभ्यो रुद्रेभ्यः इति निरवद्यम्।

किञ्च शुनां निकृष्टजन्तुत्वात् पापरूपत्वाच्च तदीयस्पृष्ट्या मृत्तिकास्नानस्य ब्राह्मणानां सिद्धत्वात् तद्वेषभाषाचिन्हं कथं भवद्भिर्धृतम्। तन्मात्रस्य प्रायश्चित्ताभावात्। भवदाचरितत्रिकाल[7]नाट्यादिक्रियाचरणेन लुप्तसन्ध्यादिनित्यकर्मणः

1. म$_2$. ०ह्मा किल लो०
2. क. ०दिकारणं जग० ; रा. ०दिसत्त्वकारणं जग०
3. म$_2$. तस्य ये देवाः ते तत्तद्गुणानुकूलं कृत्वा।
4. म$_2$. यत्र यत्र लये; क. यत्र कुत्र वा लये; रा. यत्र कुत्र वा लयकारणे प्राप्ते रुद्रांशाः
5. म$_2$. प्राप्ते रुद्रादयो वीरभ०; क. प्राप्ते रुद्रांशाः वीरभद्रभैरवादयो ब०
6. म$_2$. कामशावरादयः वै०
7. क. ०नाथारात्रिक्रिया०



प्राप्तदोषस्य किं प्रायश्चित्तं वक्तव्यम्। एवं वंशप्रभृति आचरितमिति भवदुक्त्या [1]ब्राह्मण्यस्यानवकाश एव प्रसक्तः। तस्माद्भवन्मुखनिरीक्षणेन सूर्यावलोकनस्य विधिबोधितत्वात् इतःपरं मौनमेव कर्तव्यमित्युक्ताः मल्लारिगाः परमगुरुचरणारविन्दसमीपे कृत्तमूलतरव इव महाराजसमीपे कृतापराधिन इव किलापतन्। दयारसाभिषिक्ततनुराचार्यस्वामी समीक्ष्य तान् तिष्ठध्वमित्युक्त्वा तेषां पापविशोधनं कर्तुं अत्यन्तनिपुणानखिलज्ञान् स्वशिष्यान् पद्मपादहस्तामलकमुख्यानाज्ञापयामास। ते किल तेषां शिरोमुण्डनं महानद्यामयुतमृत्तिकास्नानं [2]मण्डलाहारनियमं पुनः मुण्डनं शतमृत्तिकास्नानं प्रायश्चित्तं सङ्कल्प्य ब्रह्मदण्डं यथाविधिकारयित्वा ब्राह्मण्यमार्गगतानाचक्रुः। तत्पुरब्राह्मणाश्च परमगुरूणां मुख्यशिष्याः स्नानादिसत्कर्मशीलाः पञ्चपूजारताः शास्त्राध्ययनपरा बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ मल्लारिमतनिबर्हणं नाम प्रकरणं एकोनत्रिंशम् ॥

॥ ३० ॥

## ॥ विष्वक्सेनमतनिबर्हणं ॥

तस्मात् पुरात् पश्चिममार्गगामी (नि)[म]रुन्धसंज्ञं पुरमाप शिष्यैः।
ढक्कादि[3]वाद्यानुचलत्करौघैर्विचित्र(वन्ध्यादिबहु[4]प्रवाद्यैः) [बन्धादिबहुप्रपद्यैः]॥

तत्र पुर्यां विचित्रविष्वक्सेनगोपुरपूर्वभागे विपुलतरायां प्रपाशालायामन्त-

1. रा. ०ण्यस्य निरवकाश एव
2. म$_2$. मण्डलापहारनियमं; क. मुण्डनाहारनियमनं रा.; ‘मण्डलाहारनियमं पुनः मुण्डनं’ इत्ययं भागः नास्ति।
3. रा. ०वाद्यमुकुलत्कलौघैः ; म$_2$. ०वाद्यानुचलत्कलाद्यैः।
4. म$_2$. प्रपद्यैः

गृहादि कल्पयित्वा[1] तत्र देवगृहे श्रीमदाचार्यः सम्यग्दर्भासनगतः [2]सन् मनोन्म-न्याख्यं अङ्गुष्ठमात्रलक्षणं पूर्णं मण्डलाकारं परमात्मानमीक्ष्य तन्निष्यन्दपीयूषबिन्दुसन्दोहपानतृप्तसर्वाङ्गः कुण्डलिनीं पुनर्मूलाधारं नीत्वा तदधीशं गणपतिं स्तुत्वा सुखं चिरमास । तत्र विष्वक्सेनपरायणाः शङ्खचक्रचिन्हविराजद्भुज-दण्डतोत्रपाणयः श्रीगुरुस्वामिनं नत्वेदमूचुः — स्वामिन् ! मदीयमतमत्यन्तपुण्यदं विष्वक्सेनाधिदैवतम् । स तु किल [3]वैकुण्ठसेनाधिपतिः भगवतः द्वितीयावतार इव सकललोकनियन्ता वर्तते । तस्य भक्ता वयमनिशम्[4] । ([5]आवसामः वैकुण्ठे । नित्यमुक्ताः खलु) । नास्माकं यमादिभिरपि भीतिरस्ति [6]देहपातात् । तद्भटचोदितमार्गेण वैकुण्ठ एव प्राप्तव्यः इति प्राप्ते (तदुपासनेन वैकुण्ठलोक-प्राप्तिरिति वयं तमुपास्महे । भवद्भिरपि तदुपासना विधेयेति प्राप्ते)—

लोकगुरुभिरिदमुक्तम् — भवन्मतमयुक्तम् । कथम् ? वेदबाह्यत्वात् । तत्कथम् ? नारायणकाण्डेषु श्रुतिप्रकरणेषु विष्वक्सेनस्यानुक्तत्वात् । भगवद्भक्ता वैकुण्ठे बहवो वर्तन्ते भगवदर्चापराः । तद्भक्तानाञ्च किञ्चित्प्रसादलवो[7]दातव्य इत्यनुज्ञामात्रेण कथं तेषामुपास्यत्वमासीत् । तथाकर्तव्यत्वे प्रमाणाभावात् । तदीशस्य नारायणस्योपासनन्तु तल्लोकेप्सुभिः कर्तव्यम् । तस्य सगुणत्वात् परम्परया मुक्तिद इति प्रसिद्धेः । न तु साक्षान्मुक्तिप्रदः । तमेवाखण्डरूपेण सर्वजीवैक्यभावनाविशेषेण ध्यायतोऽस्य साक्षान्मुक्तिरिहैव । यूयं मुक्तिकाङ्क्षि-णश्चेत् शुद्धमद्वितीयं सर्वव्यापिनमात्मानं सर्वगुणातीतं श्रीगुरूपदेशाल्लक्ष्यद्वारा

1. रा. मातृकास्थपाठोऽयम् । अन्यासु मातृकासु ०दि कल्पनां कृत्वा इति वर्तते ।
2. म2. 'मनाख्यात् अङ्गुष्ठमात्रेणलक्ष्यात् पूर्णमण्डलाकारं परमा०; रा. ०मनाख्यात् अङ्गुष्ठमात्रेण लक्ष्यादि पूर्णमण्डलाकारं परमा०
3. क. ०कुण्ठवासिनः भाग०
4. रा. ०शं मत्तवैकुण्ठात् नित्यमुक्ताः ; म2. ०शं अत्र वैकुण्ठनित्यमुक्ताः । नास्मा०
5. क. पुस्तकस्थपाठोऽयम् ।
6. म2. ०तात् तद्भटचोदितमार्गेण वैकुण्ठ एव
7. म2. ०लवं दास्यामि इत्य०



ध्यात्वा[1] मुक्ता भवतेत्युपदिष्टाः त्यक्तलिङ्गाः परमगुरुचरणारविन्दद्वन्द्वं उत्तमाङ्गैर्नत्वा शुद्धाद्वैतविद्यां तदुपदेशेन प्राप्य पञ्चपूजापराः [2]स्मार्तश्रौतसकल-कर्मशीला बभूवुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ विष्वक्सेनमतनिबर्हणं नाम प्रकरणं त्रिंशम् ॥

॥ ३१ ॥

## ॥ मन्मथमतनिबर्हणम् ॥

एवं परिहृतेषु विष्वक्सेनमतेषु पुनस्तत्रस्था एवान्ये विष्णुसुता इति प्रसिद्धाः मन्मथोपासनानिरताः क्रौञ्च[3]वित्कामविद्विद्याविदित्यादयः पुष्पधनुर्लक्ष्म-शोभितबाहुयुगलाः परमगुरुं नत्वेदमूचुः—स्वामिन् ! अस्मन्मतं शृणु । सर्व-जनमनोरञ्जनहेतुभूतः मम मतेशः मन्मथः । सर्वप्राणिहृदन्तर्वर्ती परमात्मा स एवोत्पत्तिकारणम् । यस्योत्पत्तेरीशत्वं तस्यैव स्थितिसंहारयोरपीति जगदुपादान-कारणत्वे सिद्धे सर्वैर्मुमुक्षुभिः स एक एवोपासनीयः । नराणां समूहो नारं तस्मिन् अयनं यस्य सः नारायणः मन्मथः । तस्य सर्वप्रदातृत्वे समर्थता अस्तीति (तत्स्तुतिं कृत्वा मोक्षप्रदोऽपि स एवेति सम्यगुक्तम्) । तस्मात् धर्मार्थकाममोक्ष-प्रदातृत्वं तस्य सिद्धम् । तस्य (वसन्तोत्सवादिषु भूषणानि) मदनतेजो[4]विजृम्भितं नित्यानन्दतरङ्गं नाम [5]भूषणं हृदयदेशे वर्तुलाकारभूषणद्वयं वशीकृतत्रैलोक्यं स्त्री-कदम्बकं [6]यदस्ति तदीयदर्शनस्पर्शनाभ्यां निरवधिकानन्दस्य (प्राप्तौ) [प्राप्तिः] । अखण्डानन्दस्य भगवद्रूपत्वेन तत्प्राप्तिरेव मोक्षः । अतो मोक्षकाङ्क्षिणो यूयमपि

1. म. ०क्ता भविष्यन्तीति नियमिताः त्य० 2. म2. ०मार्तकर्मशीला ब०
3. रा. ०विद्भवविदित्यादयः 4. रा. विजृम्भितानि
5. रा. भूषणद्वयं 6. म2. यतः तदी

(मन्मथोत्सवभूषण) [वसन्तोत्सवादिषु भूषणानि] पुष्पधनुश्चिन्हानि धृत्वा तज्जनितनिरवधिकानन्दप्राप्तिमन्तो मुक्ता भवतेति प्राप्ते परमगुरुभिरिदमुच्यते—

भोः क्रौञ्चविदादयः। भवदुक्तमसमञ्जसम्। कथम्? प्रमाणाभावात्। तावन्मन्मथस्य सृष्ट्यधिकारः कथं संभावनीयः। ब्रह्मण एव सृष्टिकर्तृत्वदर्शनात्। तथैव स्थितिलयकर्तृत्वाभावः। विष्णुशिवौ तत्कर्तारावितिं प्रसिद्धेः। मन्मथस्य नारायणपुत्रत्वात् स्थित्यधिकारस्तस्यापि वक्तुं शक्यते इति यद्युच्येत तदसमञ्जसम्। पुत्रे पितृशक्त्यभावदर्शनात्, यथा सूर्यपुत्रे शनैश्चरे सूर्यप्रभाद्यदर्शनम्। ननु वसन्तोत्सवकालसंपादितविशेषभूषणधारणं कर्तव्यं, तल्लोकत्रयविद्यमानस्त्रीवश्यं करोतीति यदुक्तं तत् किं प्रमाणकम्। 'स्त्रीणां तत्सङ्गिनां सङ्गं दूरतः परिवर्जयेत्' इति निषेधदर्शनात्। किञ्च, मन्मथस्य स्त्रीपुरुषमोहकारकशक्त्यभावात् तदुपासनं व्यर्थम्। कथम्? रुद्रकोपाग्निना भस्मीभूतस्य जगत्संमोहनवशीकरणाद्यसंभवात्। तथापि तत्संभवोऽस्त्विति यद्युच्येत तर्हि आकाशस्यापि कार्यकरणसमर्थताप्रसक्तिः। तस्मादनङ्गस्य [1](मोक्षहानि) प्रपञ्चेऽनवकाशे प्राप्ते रतिदेविप्रार्थनया परमेश्वरवरात् (तन्मात्रमस्तीति) [तस्याः केवलं] कल्पनीयम्। तादृशस्य प्रद्युम्नस्य कथं सृष्ट्यादिकर्तृत्वं शक्यं संपादयितुम्। अतः प्रत्यक्ष[2]विरोधात् भवन्मतमप्रमाणमित्युक्ताः क्रौञ्चविदादयः परमगुरुं नत्वा त्यक्तलिङ्गाः शुद्धाद्वैतवृत्त्याश्रिताः पञ्चपूजापराः सत्कर्मशीला बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ मन्मथमतनिबर्हणं नाम एकत्रिंशं प्रकरणम् ॥

1. 'मोक्षहानि'रिति क. पुस्तकस्थपाठः। 'मोहादिप्रपञ्चानवकाशे प्राप्ते' इति श, म$_{2}$, मातृकयोः। 2. ०विरुद्धत्वात्,

॥ ३२ ॥

## ॥ कुबेरमतनिबर्हणम् ॥

तस्मादुदङ्मार्गमाश्रित्य मागधपुरं प्राप्य तत्र यक्षालय नाम प्रसिद्धं देवस्थानमाश्रित्य पक्षकालमात्रं सर्वशिष्यजनकृतपूजाङ्गीकारचमत्कारधुरीणे जगद्गुरावाचार्ये समासीने तत्रस्थब्राह्मणाः कुबेरोपासकाः नवनिधानरूपस्वर्णघुटिकामालिकापरिशोभितगलाः [1]कुबेरस्वेशपरार्धेशप्रमुखाः स्वामिनं नत्वेदमूचुः—स्वामिन्! मदीयमतमतिविचित्रतरं किल। यस्मान्[2]मम स्वामी कुबेरः। तस्य नवनिधानेशत्वात्। लोके तद्व्यतिरिक्तपूर्णधनाभावात् सर्वमर्थवता जितमिति वचनाच्च कुबेरभक्तानामस्माकं दारिद्र्यादिदोषाभावात् पूर्णानन्दत्वं सिद्धम्। तस्य ब्रह्मरूपत्वात्तदेव मोक्षप्राप्तिः। कर्मसिद्धेरप्यर्थमूलकत्वान्न हि तद्व्यतिरेकेणार्थसिद्धिरपि विद्यते। अतोऽर्थस्य कर्मज्ञानमूलत्वात् तदधिपतेः कुबेरस्योपासनं कर्मिभिर्मुमुक्षुभिश्च कर्तव्यमिति सिद्धम्। किञ्च, दिक्पालानां मध्ये कुबेरस्य श्रेष्ठत्वं[3] विद्यते। यावदभीष्टमर्थं इन्द्रादीनां ब्रह्मविष्णुरुद्राणां च स एव ददातीति [4]मर्त्यलोकपाताललोकस्थानामपि स्वदाता स एव। तस्य तत्स्वामित्वात्। तत्परिचारकसुरसुन्दरीनामयक्षिण्युपासकानामपि महदैश्वर्यस्य सत्त्वात्[5]। किं रिक्तोपासनेन शक्यं वक्तुम्। धर्मार्थकाममोक्षरूपपुरुषार्थजनकरिक्थस्वामिनं विना केचिन्मन्दमतयः तदन्यदेवताराधनं कुर्वन्ति। तत् अविवेककारणं पूर्वजन्मसञ्चितपापसङ्घकृतम्। कृतव्रतानां हि धनं अकृतव्रतानां कुतः इति वचनबलात्, कुबेरोपासनं मुक्तिकाङ्क्षिणो भवन्तोऽपि कुर्वन्त्विति प्राप्ते, श्रीमदाचार्यैरिदमुच्यते — भोः कुबेर[6]स्वेशपरार्धेशाः! युष्मन्मतमसमञ्जसम्, प्रमाणाभावात्।

1. श. कुबेरस्येशप० 2. श; ०स्मान्मम मतस्वामी
3. म$_{2}$. ०त्वं दर्शितम्।
4. श. 'मर्त्यलोक' इत्यतः आरभ्य 'स एव' इति पर्यन्तो भागः नास्ति।
5. म$_{2}$. ०त् तद्व्यतिरिक्तोपासनेन न शक्यं वक्तुम्। 6. श. ०रस्येशप.

कुबेरस्यार्थस्वामित्वे सिद्धेऽपि न हि तेन कस्मैचिदर्थो दत्तः । निधानादिगतार्थेन कस्तृप्तो विद्यते लोके । दैवादर्थवतः पुरुष[1]स्य अर्थलोभबाहुल्यात् रागाद्यरिषट्कस्य स्थानत्वात् धर्मलेशोऽपि नास्त्येव । ज्ञानसाध्यस्य मोक्षस्यावकाशः सुतरां नास्त्येव इति सिद्धमेव । अतोऽर्थस्यानर्थरूपत्वात् मुमुक्षुणा द्रव्यं परित्याज्यमेव । उक्तं च—

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥

(इत्याचार्योक्तेः)

धर्मोऽपि तत्साध्य इति चेत , भवतु नाम। प्राक्कर्मवशात कुबेरनिधानार्थं विना द्रव्यं प्राप्यते । तदेव विवेकिनां धर्मकारणम् निधानव्यतिरिक्तद्रव्यस्य भूगर्भनिविष्टत्वात् [च]। जनाः खनिसैकतादिरूपेण स्वर्णं बहुधा संपादयन्ति तेन केचिज्जीवनं कुर्वन्ति । केचिद्भूषणानि धारयन्ति । कुबेरद्रव्येणेन्द्रादयोऽप्युपजीवन्तीति यदुक्तं तदसत् । कनकमयमेरुप्रदेशविलसदिन्द्रादयः स्वतन्त्रपुरुषाः सर्वसुखभाजः सर्वोन्नतैश्वर्यसंपन्नाः दीना इव निर्भाग्या इव किं कुबेरं याचन्ते । भवदज्ञानवाक्यानां प्रामाण्याभावात् किमुत्तरं वक्तव्यम् । ब्रह्मविष्णुरुद्राणां द्रव्यदाता कुबेर इत्युक्तम् । भवत्पशुमार्गः केन परिहर्तव्यः । हिरण्यगर्भस्य ब्रह्मणः लक्ष्मीपतेर्नारायणस्य हिरण्यरेतसो रुद्रस्य द्रव्ययाचनासंपादितस्य तवाप[2]वादोपदेशः किमन्यैः कार्यः । एवं समर्थतरेण भवता कुबेरेण मर्त्यलोकस्थेषु निरर्थापवादपरंपरा सदैव कृता भाति । भवतः तिलकमशकजिह्वया किं [3]किमनृतं नोच्चारितम् । अतः [4]मद्वाक्यात् मूढतरकुबेरशिष्यैस्सह

1. म$_2$. स्य अवलेपनबाहु०
2. रा. ०पराधोपदेशः
3. रा. किमनृतं मुखरितम्; क. किमन्यदुचितम्
4. पतितवाक्यमूढकुबेर।



विगत (लिङ्गस्सन्) [ज्ञाः सन्तः] अद्वैतविद्यामाश्रित्य स्नानादिनित्यकर्मसक्ताः पञ्चपूजापरायणाः भवत इत्युक्ताः कुबेरादयः त्यक्तनवनिधानचिन्हाः परमगुरुपादाम्बुजासक्ताः शुद्धाद्वैतविद्याश्रिता बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ कुबेरमतनिबर्हणं नाम द्वात्रिंशं प्रकरणम् ॥

॥ ३३ ॥

## ॥ इन्द्रमतनिबर्हणम् ॥

इन्द्रप्रस्थपुरं प्रसिद्धमखिलैः शिष्यैस्समेतः परः
प्राप प्रौढमहीसुराः पुरगताः संवीक्ष्य नत्वा गुरुम् ।
श्रोतव्यं मतमस्मदीयममलं लोकत्रयाधीश्वरेणेन्द्रेणैव विनिर्मितं हि फलदञ्चेत्यब्रुवन्नद्भुतम् ॥

पुनः परमगुरुमाचार्यस्वामिनं नत्वा ते किलेदमूचुः—स्वामिन् ! मदीयमताधिदैवतमिन्द्रः सर्वदेवपरिसेव्यमानचरणाम्बुजः । स एव जगदुपादानकारणं किल। अतस्तदंशा एव ब्रह्मविष्णुशिवाः । ब्रह्मविष्णुरुद्रा(दि)[द्य]साधारणशब्दवाच्योऽपि स एवेति प्रतिपादितं नारायणोपनिषदि—

‘स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्’ [म.ना.उ.१०-१०] इति । कैवल्योपनिषदि च ‘स एव विष्णुः [कै. ३. ८] इत्यादि। तस्य चतुर्दशलोकेश्वरत्वात् सर्वदातृत्वं ऋक्काण्डे (ऋक्संहितायां) अभिहितम्—‘इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे । पोषं रयीणामरिष्टिं तनूनां, स्वाद्मानं वाचः सुदिनत्वमन्हाम्’ [ऋ. सं. २-६-२७] इति । ‘इन्द्रो

‘राजा जगतो (य ईश)’ [ऋ. सं. ५-३-११] इति च। तस्मादिन्द्रस्य सर्वोत्तमत्वं प्राप्तम्। किञ्च, इन्द्रस्य श्रेष्ठत्वद्योतकानि बहूनि सन्ति। तथा हि—इन्द्रानुजो नारायण एव उपेन्द्रनामा वसति कनकाचले (स्थानम्), जरामरणवर्जितममृतम्। इष्टभोगार्थदा कामधेनुः, कल्पवृक्षः चिन्तामणिः, ऐरावतोच्चैश्रवप्रमुखाः वाहनम्, सेवकास्त्रयस्त्रिंशत्कोटिदेवताः कार्यसहायाः, सगणाः चित्रभान्वादिदिक्पालाः। तस्यैव ब्रह्मविष्णुशिवात्मकत्वात् सृष्ट्यादिकर्तृत्वसिद्धिः। (इवर्णेन) इमं लोकं द्रावयति स्वशक्तिभिरिति इन्द्रः। स एव सर्वात्मा गुणातीतः परात्परतरश्च। तन्मायावशात् अहङ्कारादितत्त्वद्वारा प्रपञ्चप्रवृत्तिरिति। ऊर्ध्वरेतसां यतीनां स एव शिक्षां करोति। ‘अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छ[म्](दिन्द्रः)’ [कौ.उ.३-१] इति। अतः सर्वनियन्ता सर्वकारणं सर्वातीतः स एव स्वमायाप्रविष्टः जगत्पालनार्थमिन्द्ररूपेण सर्वैरुपास्य इव वर्तते। तस्माच्च श्रेयस्कामिभिः भवद्भिरपि स एक एव वेदितव्यः। धर्मार्थकाममोक्षेच्छूनां तत्तत्पुरुषार्थसिद्धिं स एव करोतीति निरवद्यम्। वयं किल बहुजन्मतपःफलितकायाः जीवन्मुक्ताः किलेन्द्रोऽहमिति तादात्म्योपदेशवशात् विदितपरमानन्दाः करस्थमुक्तिफलाः भद्रहरिजिष्णुहरिभद्रेन्द्रशचीपतिसरस्वतीपत्यादयो वयमिति सम्यक् पूर्वपक्षे प्राप्ते परमगुरुभिरिदमुच्यते—भो भद्रहरिमुखाः। भवन्मतमसमञ्जसम्। कथम्? प्रमाणाभावात्। इन्द्रशब्दस्य ब्रह्मादिशब्दान्तःपातित्वेन इन्द्र एव जगदुपादानकारणमिति नारायणीयश्रुत्या प्रदर्शितमिति किल भवद्भिरुक्तं, तदयुक्तम्। ‘सदेव सौम्येदमग्र आसीत्’ [छा. उ. ६-२-१] इत्यादिजगत्कारणवाक्येषु प्रतिपादितं यद्ब्रह्म [तत्] ‘तत्सत्यं स आत्मा, तत्त्वमसि श्वेतकेतो’ [छा. उ. ६-८-७] इत्यादिब्राह्मणोक्त्या नित्यशुद्धबुद्धमुक्तस्वरूपं सर्वज्ञं सर्वजगदुपादानकारणमद्वितीयं बोध्यते। ‘स ईक्षत लोकान्नुसृजा’ [ऐ. उ. १-१] इत्यादिना जगन्निर्माणार्थं स परमात्मा ईक्षत ईक्षां कृतवान्। या भगवदिच्छा सैव प्रकृतिः। तया किल महदादि-



तत्त्वपूर्वकं जगत्सृष्टम्। तत्राहङ्कारतत्त्वे गुणत्रयात्मके ब्रह्मविष्णुरुद्राः संप्रसूयन्त इति ते किल सृष्टिकर्तारः। तत्र सृष्टिकर्तुर्ब्रह्मणः मुखादिन्द्राग्नी जायेते। यद्वा विराड्मुखात् (भवन्ति) इन्द्राग्न्युत्पत्तिः। तादृगिन्द्रस्य जगदुपादानकारणत्वे प्रोच्यमाने तदन्यैर्दिक्पालैः किमकार्यं कृतम्। सर्वप्रदातृत्वमिन्द्रस्य वर्तत इत्युक्तम्। सर्वेषां जन्तूनामपि तत्तदधिकारयोग्यतादातृत्वमस्त्येव; किं तेन ब्रह्मत्वमस्ति। जरामरणरहितममृतसेवनमस्ति, तेन ब्रह्मत्वमित्युक्तम्। भवदज्ञानं केन निवारयितुं शक्यम्। तथाच इदममृतपानं येषां विद्यते तेषां ब्रह्मत्वप्राप्त्या ब्रह्मानन्त्यप्रसक्तिः! ‘एकमेवाद्वितीयं ब्रह्म’ [पै. उ. १-१] इत्यादिश्रुतयः व्यर्थाः स्युः। किञ्च, सहस्रमहायुगात्मके ब्रह्मदिने किल इन्द्राश्चतुर्दश। एकस्येन्द्रस्य आ पाततः साधितस्य कालस्य प्रमाणं घटिकादि
२×८×१४

अतो ब्रह्मदिनचतुर्दशांशानुजीविनः स्वर्गराजस्य एकसप्ततिमहायुगाधिपस्य कथं ब्रह्मत्वं वक्तुमुचितम्। स्वमानेन ब्रह्मणः शताब्दायुषि पूर्णे पृथिव्यास्तोये विलय तस्याः अग्नौ, वन्हेर्वायौ, वायोराकाशे, तस्य ब्रह्मणि। ब्रह्मणो यथा देवाः इन्द्रादिदिक्पालप्रमुखा उत्पन्नाः, निवृत्तावपि तथैव ब्रह्मणः तदङ्गं प्रविशन्ति। एवं सर्वलोकदेवलयस्थानं ब्रह्मापि नारायणे विलीनः स्यात्, तस्य रुद्रे, तस्य महत्तत्वे, तस्य अव्यक्तप्रकृतौ, सा हि गुणरहिते चिदानन्दमये परमात्मनि लीना सन्मात्रेण रूपेणावतिष्ठते। तदानीं ‘सदेव सौम्येदमग्र आसीत’ [छा.उ.६-२-१] ‘ब्रह्म वा इदमग्र आसीत्’ [बृ. उ. १-४-१२], ‘आत्मा वा इदमेक एवाग्र आसीत्’ [ऐ. उ. १-१] इत्यादिब्रह्मकारणवाक्यानि प्रवृत्तानि। ‘यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति [तै. उ. ३-१] ‘सत्यं ज्ञानमनन्तं ब्रह्म’ [तै. उ. २-१-१] ‘यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह’ [तै. उ. २-४, ५] इत्यादिश्रुतयः प्रमाणम्।

तस्मात् भद्रहरिप्रभृतयः मूढाः यूयं शुद्धाद्वैतविद्याश्रिताः (विगतलिङ्गाः) भवतेति सम्यगुपदिष्टास्ते परमगुरुं नत्वा स्मार्तकर्मशीलाः पञ्चपूजापरायणाः शुद्धाद्वैतविद्याश्रिताः बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ इन्द्रमतनिबर्हणं नाम प्रकरणं त्रयस्त्रिंशम् ॥

॥ ३४ ॥

## ॥ यममतनिबर्हणम् ॥

तस्माद्यमप्रस्थपुरं स चाप सर्वात्मकः सद्गुरुराद्यशिष्यैः ।
शुम्भुर्यथा सर्वगुणैरुपेतः पुरन्दरस्सर्वसुरैरिवासीत् ॥

तत्र किल मासकालमास्थिते परमगुरौ यमोपासकाः महिषरूपतप्तलोहाङ्कितभुजद्वयाः चित्रमहिषवेषं धृत्वा नाट्यमाचरन्तः सन्तः यमदेवं पुरस्कुर्वन्तः समागत्य स्वामिनं नत्वेदमूचुः—स्वामिन्! वयं किल किङ्करनामानः सशिष्याः । ते वृद्धयमबद्धकिङ्करतरुणदूतादयः सर्वेऽपि यमपरायणाः । यमस्यैव लयहेतुत्वेन सृष्टिस्थित्योरपि स एव करणमिति कृत्वा तस्यैव सर्वोत्कृष्टत्वं इति निश्चित्य तदुपासकानामस्माकं मुक्तिरेव भविष्यतीति निर्भीत्या जन्ममरणप्रवाहमुल्लङ्घ्य वर्तामहे । किञ्च, यमप्रतिपादिका ऋगियम्—

'यमाय सोमं सुनुत, यमाय जुहुता हविः यमं ह यज्ञो गच्छत्यग्निदूतोऽरंकृतः' । [ऋ. सं. ७-६-१६] एतदर्थः एवमुन्नेयः—सोमं यागद्रव्यं यमाय सुनुत वह; हविश्च यमाय जुहुत । कस्मादित्युक्ते यज्ञः श्रौतः स्मार्तो वा यमं गच्छति । हशब्दो निश्चयार्थः । अरमलमग्निरेव दूतः सेवकः कृतः यमेनेति शेषः । एवं यज्ञभुजो यज्ञरूपस्य यमस्य सृष्ट्यादिकारणस्य परब्रह्मत्वे सिद्धे तन्मूर्तिर्द्विधा भवति । शुक्लकृष्णभेदात् । या शुक्ला सा परब्रह्मरूपा ।



'यच्छुक्लं तद्ब्रह्म' इति श्रुतेः । तस्मान्निर्गुणाद्यमादाविर्भूतमहत्तत्वादिद्वारा रुद्राख्यो यमावतारः, तस्माज्जातो कृष्णवर्णो यमः सर्वव्यापकः विष्णुसंज्ञः । तन्नाभिकमले जातो (रक्ताधिकत्वाद्रक्तवर्णाख्यः) [रक्तवर्णः] ब्रह्माख्यो यमः । तद्द्वारा किलाष्टदिगीशाः सूर्यादिग्रहाः सर्वचराचरात्मकं जगत् इति कृत्वा स्वयं पुण्यपापकर्मोपाधिद्वारा सर्वप्राणिशिक्षां कुर्वन् दक्षिणदिङ्मालेश्वरः दण्डपाणिः महिषवाहनारूढो यमदेवो वर्तते । वेषधारीव (निज) सत्यज्ञानानन्तलक्षणं विहाय किञ्चिज्ज्ञानामिन्द्रादीनां स्वांशानां मध्ये स्वयमपि कश्चिदिव लक्ष्यते । भस्मान्तर्गताङ्गार इव, पवनान्तर्गताग्निरिव, समुद्रान्तर्गतबाडव इव, मेघान्तर्गतजलमिव, जडान्तर्गतात्मेव, घटान्तर्गतदीप इव, सरोऽन्तर्गतपद्ममिव भाति । तस्माज्जगत्कारणवाक्याभिप्रायरूपं शुद्धबुद्धमुक्तस्वरूपं ब्रह्म यमः, तस्यांशः सगुणः, शुद्धयमोपासनायाः कर्तुमशक्यत्वात्, सगुणनीलवर्णयमोपासनमस्माभिः क्रियते । ज्ञानात् मूलाज्ञाननिवृत्तौ एव सर्वमितिबोधोत्पत्त्यनन्तरं शुक्लयमप्राप्तिरेव मोक्ष (इति च) । (तस्मात्) [यतश्च] यूयं मोक्षकाङ्क्षिणः (किल) तस्माद्यमोपासनं कुरुध्वम् । तत्कटाक्षलेशेनैव मुक्तिर्वो भविष्यति इति प्राप्ते—परमगुरुरेवं पठति—भो किङ्करादयः । शृणुध्वं यूयम् । भवन्मतमनर्हम् । कथम्? श्रुत्यादिसर्ववाग्प्रपञ्चविरुद्धत्वात् । वेदविरोध एव तावद्भवति । पुरा नचिकेताः किल पितृशापात् यमपुरं प्राप्तः तद्द्वारे त्रिरात्रमनशनवृत्त्यैव उवास । तं सूर्यवर्चसं नचिकेतसमतिथिं दृष्ट्वा वेपमानशरीरो यम इदमुवाच—

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥

[क. उ. १. ९] इति ।

एवं नमःपुरःसरं यमेनादरेणोक्तः नचिकेताः किल [एवं] वचनमुवाच—

शान्तसङ्कल्पः सुमना यथा स्यात् वीतमन्युर्गौतमो माऽभिमृत्यो।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥

[क. उ. १. १०]

इति नचिकेतसोक्तः मृत्युः पुनराह—

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥

[क. उ. १-११]

इति। पितृसौमनस्यकाङ्क्षिणो नचिकेतसः पितुः (जरादिदोषविहीनं स्वर्गलोकप्राप्तिरूपं फलं) शान्तसङ्कल्पविग्रहादिफलं सम्यग्ददौ। तं मृत्युं नचिकेताः पुनराह—

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति।
उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके॥

[क. उ. १-१२]

स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥

[क. उ. १-१३]

इति नचिकेतसा पृष्टेन यमेन प्रोक्तो द्वितीयवरः (त्रेता) [नाचिकेता]ग्निरूपः—

त्रिणाचिकेतः त्रिभिरेत्यसन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥

[क. उ. १. १७]

एवमुक्तो नचिकेताः तृतीयवरप्रार्थनामकरोत्—



येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥

[क. उ. १. २०]

इति पृष्टो यमः तद्वरस्य रहस्यगोचरत्वात् बहुधाद्रव्यवाहनं अतिचिरायुः पुत्रमुखं फलं दास्यामि तृतीयवरार्थमिति बहुधा लोभयित्वा पश्चान्निराशालेशलेपं नचिकेतसं दृष्ट्वा प्रणम्य यम इदमाह—

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥

[क. उ. २-१५]

इति।

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति। [क. उ. २-२२]

इति ।

यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ [क. उ. २-२५]

इति च ।

जाग्रदाद्यवस्थासाक्षी स्वयमशरीरः शुक्लतेजोमयः तुर्यः परमात्मा मूर्ध्नि पूर्णमण्डलाकारविराजमानः सर्वातीतः सर्वकारणं परं ब्रह्मास्ति। तस्य गुणतीतत्वेन सर्वोत्कृष्टत्वेन तदुपासनमत्यन्तगहनमपि तदधःप्रदेशवर्तमानपरमाङ्गुष्ठमात्रे पुरुषे मनोलयं यः करोति स मुक्त इति। किञ्च सर्वसंहारकर्तृत्वं तस्यैव प्रतिपादयति — ब्रह्मक्षत्राद्युपलक्षितं जगत् अन्नम्, मृत्युरुपसेचनमिति। [एवं] सम्यगुपदिष्टो नचिकेताः कृतार्थो भूत्वा पितरं प्राप। यमस्यैव परब्रह्मत्वे प्रोच्यमाने स्ववाक्याप्रामाण्यप्रसक्तिः। यस्यात्मनो जगदन्नं मृत्यु-

रुपसेचनमिति तस्यैव स्वोपसेचनत्वविरोधात् । अतो यमान्यद्ब्रह्म सर्वकारणं परिकल्पनीयम् । यमादीनां किञ्चिज्ज्ञत्वेन यमाद्युपास्यं ब्रह्म सर्वकारणम् । निर्गुणं सगुणं च परं ब्रह्म 'सदेव सौम्यदेमग्र आसीत्' [छा. उ. ६-२-१] इत्यादिकारणवाक्यप्रतिपादितम् । सगुणं सृष्ट्यादिकारणं ब्रह्मविष्णु-शिवात्मकम् । अतो लयमूर्तेः शिवस्य महदुदरं प्रलये चतुर्मुखादयो देवाः इन्द्रादिदिक्पतयः सूर्यादयो ग्रहाः पृथिव्यादिभूतानि चराचरं सर्वमपि जगत् प्रविशन्ति । तदानीं किल सर्वजगद्रूपान्नभक्षणकाले उपसेचनं नामोपदंशः यमो भविष्यतीति तादृग्यमस्य लिङ्गादिधारणेन मुक्तिरित्य-नृतमुक्तं भवता यमादिगुरुणा किङ्करेण । पुराणेष्वपि मार्कण्डेयादिषु यमार्दितेषु शत्रुसूदनः भक्तवत्सलो महादेवः स्वतन्त्रो यमं निष्पीड्य भक्तपालनमकरोदिति [प्रोक्तम्] महापातकिनः सुन्दरनामब्राह्मणस्य यमदूतैराकृष्यमाणे जीवे धनलोभा-त्कृतैकशिवरात्रिजागरणतुष्टमहादेवदूतैः सर्वोत्कृष्टबलवद्भिः ताडिताः खण्डिताः यमदूताः सुन्दरं परित्यज्यापलायन्त । शिवदूतैर्नीतः सुन्दरः शिवभक्ताग्रगण्य इव कैलासे वर्तत इति च पुराणेषु वर्तते । अजामिलस्य ब्राह्मण्यकर्मपरित्यज्य चाण्डालस्त्रीसंपर्कात् पुत्रान् पञ्च लब्ध्वा कनिष्ठनारायणाख्यपुत्रनामोच्चारणात् त्यक्तकलेवरस्य ब्राह्मणस्य सूक्ष्मशरीरे यमदूतैर्नीयमाने बलाढ्याः विष्णुदूताः समागत्याजामिलं स्वर्लोकं प्रापयन्ति स्म; दुर्बलिनस्तु यमदूताः तैर्भग्नकलेवरा रुदन्तः सन्तो यमलोकं गता इति वर्तते । तस्माद्यूयं किङ्करादयः त्यक्तलिङ्गाः शुद्धाद्वैतविद्यामाश्रित्य स्नानसन्ध्यावन्दनस्वाध्यायपितृतर्पणवैश्वदेवातिथिपूजा-दिकं सत्कर्म समाचरत । एवं निष्पापात्मानः सद्गुरूपदेशात् ब्रह्मस्वरूपं ज्ञात्वा मुक्ता भवत इत्युक्ताः किङ्करादयः परमगुरुं नत्वा शुद्धाद्वैतवृत्त्याश्रिताः सच्छिष्याः बभूवुः ।

॥ इत्यनन्तानन्दगिरिकृतौ यममतनिबर्हणं नाम चतुस्त्रिंशं प्रकरणम् ॥

॥ ३५ ॥

## ॥ वरुणवायुभूम्युदकमतनिबर्हणम् ॥

तस्मात् प्राप प्रयागाख्यं स्थलं पुण्यविवर्धनम् ।
गङ्गायाः यमुनायाश्च सरस्वत्याश्च सङ्गमम् ॥

तत्र परमगुरौ समास्थिते वरुणोपासकाः पाशचिह्नाः वायूपासकाः, ध्वज-चिन्हाः, भूमिदेवोपासकाः पूर्णाङ्काः, तीर्थोपासकाः बिन्दुचिन्हाश्च समागत्य तीर्थपतिप्राणनाथानन्तजीवनदाख्यस्वशिष्यैस्सह इदमूचुः—स्वामिन्, आचार्य! अस्मदीयमतमतिविचित्रमत्यन्तपुण्यदं शृणु । अहं किल तीर्थपतिः, मदीशो वरुणः सर्वदेववन्दितचरणारविन्दः सर्वेषां जीवनद इति च सर्वोत्कृष्टः स एवोपासनीय इति । ततः प्राणनाथः स्वामिनं नत्वेदमाह, स्वामिन्! मम मतेशो वायुः किल । सर्वदेहेषु प्राणरूपः स एक एव लोकैरुपासनीयः । 'ये प्राणं ब्रह्मोपासते, प्राणो हि भूतानामायुः' [तै. उ. २-३] इति श्रुतेः । अतः प्राणोपासकानामस्माकं तदङ्गपरिशुद्धगात्राणां न विचारः कर्तव्यः किल इहामुत्र च । ततः परमगुरुमनन्तो नत्वेदमुवाच, स्वामिन्! मदीयमतमुत्तमम् । भूमिः किल सर्वकारणम् । 'स्योना पृथिवि भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथः' [ऋ. सं. १-२-१५] इति श्रुतेः । भूमेः सर्वोत्कृष्टत्वात् सर्व-देवमयत्वाच्च तदुपासकानामस्माकं इहामुत्रापि न विचार इति । ततः परमगुरुं जीवनदो नत्वेदमुवाच — स्वामिन्! मन्मतमतीवविचित्रतरम् । तीर्थस्य ब्रह्मरूपत्वात् तदुपासनमेव सर्वैर्मुमुक्षुभिः कर्तव्यम्, तद्व्यतिरिक्त(परमा)[ब्रह्मा]भावात् । त्रिवेणीतीर्थबिन्दुसेवनमात्रेण ब्रह्महत्यादिदोषशान्तिर्भवति । दर्शन-मात्रेण चैवेति केचिद्वदन्ति—

"अम्ब! त्वद्दर्शनान्मुक्तिः न जाने स्नानजं फलम्"

इति नारदोक्तेः ।

किञ्च उदकस्यैव सर्वात्मकत्वं श्रुत्या दर्शितम्—"आपो वा इदं सर्वं विश्वाभूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापस्स्वराडापश्छन्दांस्यापो ज्योतीꣳष्यापो यजूꣳष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप ओम्" [म. ना. उ. ११-१] इत्यादि। अतः सर्वदेवमयत्वेन तीर्थस्य ब्रह्मत्वं सिद्धम्। तदुपासकानामस्माकं इहामुत्र न विचारः कर्तव्य इति। तस्माद्भवन्तोऽपि मोक्षकाङ्क्षिणः सर्वदा सर्वार्थदतीर्थोपासनं कुरुध्वमिति प्राप्ते परमगुरुभिरेवमुच्यते—

भोः तीर्थपतिप्राणनाथानन्तजीवनदाख्याः यूयं शृणुध्वम्। युष्मन्मतान्यप्रमाणानि, जगत्कारणवाक्यविरुद्धत्वात्। प्रथमं वरुणोपासनमनुचितम्, तस्य जगत्कारणत्वाभावात्। तथा वायोरपि परमत्वाभावः, क्षरपञ्चभूतान्तःपातित्वात्। भूमेरपि तद्वत्, जन्यत्वदर्शनात्; यज्जन्यं तदनित्यमिति मानम्। "आत्मन आकाशस्संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' [तै. उ. २-१-१] इति श्रुतेः तीर्थस्याप्यनित्यतैव। किन्तु भूतानां मध्ये तीर्थस्योत्तमत्वं वर्णयति 'आपो वा इदꣳ सर्वम्' [म. ना. उ. ११-१] इति - क्षरज्ञानेनाक्षरप्राप्त्यभावात् युष्माकं कथं मुक्तिरस्ति। तदभावात् तज्ज्ञानस्यापि फलाभाव एव वक्तव्यः; उपास्यानामनित्यत्वात्। तस्मान्मोहबुद्धिं परित्यज्य यूयं शुद्धाद्वैतविद्यानिरता भवत। विश्वतैजसप्राज्ञातीतपरमाङ्गुष्ठमात्रब्रह्मद्वारा मनोलयानन्तरं पूर्णं शुद्धं ब्रह्म प्राप्य मुक्ता भवत इत्याज्ञप्ताः परित्यक्तलिङ्गाः शुद्धाद्वैतविद्याश्रिताः शिष्या बभूवुः।

इत्यनन्तानन्दगिरिकृतौ वरुणवायुभूम्युदकमतनिबर्हणं
नाम प्रकरणं पञ्चत्रिंशम् ॥

॥ ३६ ॥

॥ शून्यमतनिबर्हणम् ॥

एवं निराकृतेषु पुनरन्यः शून्यवादी (प्रणम्य) प्रत्यवतिष्ठते। स किल स्वामिनं नत्वेदमुवाच — मम मतमतिसुखदम्। तथा हि—मया मार्गे किञ्चित् दृष्टं तत् सावधानेन[मनसा] शृणु—

मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ॥
तं दृष्ट्वा देवभावेन प्रणम्य शिरसा भृशम्।
आगतोऽस्मि यतिश्रेष्ठ! तवान्तिक[1]महं द्रुतम् ॥

इति श्रुत्वा भो [विद्वत्तर] (विचित्रतर) त्वन्नाम किमित्याचार्यैरुक्तः स तु पुनरुवाच— स्वामिन्! अहं निरालम्बनामा, मत्पिता [2]कल्पितरूपनामा (मन्माता निर्जरिता) [मन्मतस्य प्रवक्ता] इति निशम्य परमगुरुरिदमाह— भो निरालम्ब! भवन्मतसमञ्जसम्। कथम्? तस्य शून्यत्वात्। शून्यस्यैव ब्रह्मत्वमिति यद्युच्येत, तदयुक्तम् — 'तमेव भान्तमनुभाति सर्वं' [क. उ. ५-१५] इति श्रुतेः। कोटिसूर्यतेजोरूपस्य ब्रह्मणः शून्यत्वं वक्तुमनुचितम्। तदधिकतत्सम(तत्)स्वरूपाभावात् एकमेवाद्वितीयं ब्रह्म सर्वैरुपासनीयमिति सिद्धान्तः। तस्मान्मूढबुद्धिं परित्यज्य शून्यमतं त्यक्त्वा शुद्धाद्वैतविद्याश्रितो भव इति नियमितो[3]ऽपि निरालम्बः पुनराह—स्वामिन्! आकाशस्य ब्रह्मत्वं युक्तं किल। कथम्? व्यापकत्वात् वेदमूलकत्वाच्च। तथा हि— 'आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्'

---

1. रा. ०मतिद्रुतम्। 2. म[2]. खपुष्पनामा रा. कल्पितनामरूपः
3. क. ०तो निरा०

[छा. उ. १-५-१] इति। किञ्च, वेदा(न्ते)[न्तसूत्रे] 'आकाशस्तल्लिङ्गात्' [ब्र. सू. १-१-२२[८]] इत्याधिकरणे आकाशस्य (ब्रह्मत्वप्राप्तिः) [ब्रह्मता] निर्धारिता। अतः श्रुतितात्पर्यात् ज्यायस्त्वपरायणत्वे निर्धारिते। 'आकाशं प्रत्यस्तं यन्ति' [छा. उ. १-५-१] इत्यादिना लयस्थानञ्चाकाश एवेति कृत्वा सृष्ट्यादिकारणमाकाश एव ब्रह्मेति प्राप्ते पुनराचार्यैरिदमुच्यते—किं निरालंब, मूढतम! ब्रवीषि। कथमाकाशस्य ब्रह्मत्वमुचितं वक्तुम्। (आकाशसलिलांशाभ्यां जातस्य) शब्दस्याकाशगुणत्वात्, सगुणस्याकाशस्य कथं ब्रह्मत्वप्राप्तिः। भूतरूपस्यास्य 'आकाशाद्वायु' [तै. उ. २-१-१] रित्यादि श्रुतिसिद्धत्वात्[4] स्वकार्यभूतोत्पत्तिलयस्थानमाकाशः। तस्यापि ब्रह्मजन्यत्वं वर्तत एव। (किन्तु) आकाशशब्दः साधारणः ब्रह्माकाशयोर्वर्तते। 'यदेष आकाश आनन्दो न स्यात्' [तैं. उ. २. ७.], 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तत् ब्रह्म' [छां. उ. ८-१४-१], इति। ज्यायस्त्वपरायणत्वादिगुणा[5] अपि भगवत्येव निर्निमित्तेन व्यवस्थापिताः। तथाहि श्रुतिः "ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः' [छा. उ. ३-१४-३] इति। 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्' [बृ. उ. ३-९-२८] अपि चान्तवत्त्वदोषेण शालावत्यस्य पक्षं निन्दित्वा अनन्तं किञ्चिद्वक्तुकामेन जैवलिना आकाशः परिगृहीतः। तच्चाकाशमुद्गीथे संपाद्योपसंहरति। 'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' [छा. उ. १-९-२] इति। 'ऋचोऽक्षरे परमे व्योमन्' [ऋ. सं. १-१६४-३९], 'सैषा भार्गवी वरुणी विद्या परमे व्योमन् प्रतिष्ठिता' [तै. उ. ३-६] इत्यादिश्रुतिभ्यः आकाशशब्दस्य ब्रह्मत्वे निर्धारिते शून्यवादी निरालम्बनामा परमगुरुं नत्वेदमाह—स्वामिन्! भवत्पाददर्शनेन कृतार्थोऽहं पुनः ब्रह्मबोधमिच्छामि। तदुपदेशं कुर्विति। एवं जल्पन्तं निरालम्बमिदमाह गुरुः—

4. क; ०त् कार्य०

5. क. ०णाऽपि भगवत्येव निर्निमित्ते नभसि अवस्थिताः।



'आकाशस्तल्लिङ्गात्' [ब्र. सू. १-१-२२(८)] इत्यधिकरणे ब्रह्मैवाकाश इति सम्यक् (प्राप्तम्) [प्रतिष्ठापितम्]। हृदयकमलाग्र [सूक्ष्मविवरनिष्ठः आकाशः] (निष्ठसूक्ष्मविवराकाशः) दहराख्यो ब्रह्म, तदुपास्य सततं कृतार्थो भवेत्युक्तः शुद्धाद्वैतविद्याश्रितः शिष्योऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ शून्यमतनिबर्हणं नाम प्रकरणं षट्त्रिंशम् ॥

## ॥ ३७ ॥

## ॥ वराहमतनिबर्हणम् ॥

एवं परिहृते शून्यमते पुनरन्यः बालचन्द्राङ्कविराजमानभुजद्वयः[1] आदिवराहोपासकः स्वामिनं नत्वेदमुवाच—भो यतिवर्य। ब्रह्मकल्पान्ते किल एकीकृतसकलवारिधिजलनिमग्नभूम्युद्धरणहेतुभूतस्य आदिवराहस्य मदीयं मतं विद्धि। भगवद्दंष्ट्राग्रे सप्तसमुद्रकुलाचलादियुक्ता जगती कमलमा(त्रेणा) [त्रत्वेना] वतिष्ठते। तस्मात् स एव जगत्कारणं; सगुणं निर्गुणं च ब्रह्म; सर्वैर्मुमुक्षुभिः स एक एव उपासनीयः। अतः भवन्तोऽपि मोक्षकाङ्क्षिणः दंष्ट्राङ्कयुतभुजाः वराहोपासकाः भवध्वमिति (पूर्वपक्षे) प्राप्ते पठत्याचार्यः—भो वराहोपासक! भवन्मतमनर्हम्। कुतः? वेदविरोधात्। तत्कथम्? ब्राह्मणेन तपः कर्तव्यमित्येतत् ब्राह्मणलक्षणम्। तपस्तु शास्त्रे प्रतिपादितम्—'ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपः दमस्तपः शमस्तपः दानं तपः यज्ञं तपः भूर्भुवस्सुवर्ब्रह्मैतदुपास्वैतत्तपः' [तै. आ. १०] इति। तप एव ब्रह्म। बृंहतेर्धातोः अर्थभूतं कृत्स्नं वस्त्वभिधीयते। तत्समाधिकवस्त्वभावात्[2] ब्रह्माभिन्नो जीवः। यावदज्ञानं तावन्न्यूनवस्तुमात्रमस्ति। अतो जगदुपादानकारणस्यांशात् सृष्टिस्थितिलयार्थं बहवो जाताः तैः चिन्हैरङ्कनीयमिति यदि (प्रामाण्यं) [दुराग्रहः] तर्हि मत्स्य-

1. बालचन्द्रसमानाकार - आदिवराहदंष्ट्राङ्कयुतभुजद्वयः—टि.

2. क. ०त्। ब्रह्मणस्तावदभिन्नवस्तुमात्रमस्ति तेन न ब्रह्माभिन्नो जीव इति। अतो जगदु०

कूर्मादिचिह्नैः शिरःप्रभृतिगात्रेषु यथाशक्यमङ्कनीयम्। ब्राह्मणव्यतिरिक्तस्यैवाङ्केन प्रयोजनम्, न तु ब्राह्मणानाम्। ब्राह्मणः वेदोक्तं कर्म कुर्वीत[1] (तत्प्रयासस्या) [तत्फलस्या]न्यथा असिद्धत्वात्। विप्रो[1]दितं कर्म परित्यज्य आदिवराहोपासनं कर्तव्यमिति को वा अशनिपातस्तवागतः। 'उदिते सूर्ये प्रातर्जुहोति' इति श्रुतिः क्व गता? ब्राह्मण्याचारं परित्यज्य शूद्राचारपरिग्रहणं कथं भवता कृतम्? 'अहरहस्सन्ध्यामुपासीत' इत्यादिविप्रकर्तव्यविधिवचनानि तव शिक्षां किं न कुर्वन्ति। सगुणब्रह्मोपासनं कर्तव्यमिति चेत्, तथापि 'ब्रह्मविष्णुरु(द्राः)[द्रेन्द्राःते] सम्प्रसूयन्ते' [अ. शि. ३] इति प्रमाणा[2]त्तेषामेकतमोपासनेन भवितव्यम्, किमर्थं तदपि नाङ्गीकृतं भवता, वराहदंष्ट्रा(दण्ड)चिह्नं धृतम् किमर्थम्। (मया ताडितवक्त्रस्त्वं) सर्वं परित्यज्य दंष्ट्रा(दण्डा)ङ्कविराजमानभुजः पशुमार्गेण वर्तसे। ज्ञानं विना मोक्षाभावः। दण्डच[3]स्तावत् त्वं स्वकर्माण्युल्लङ्घ्य वर्तसे। कर्मातिक्रमी दण्डच इति मन्वादिकृतधर्मशास्त्रेषु प्रमाणदर्शनात्। तस्मात् [मया ताडितवक्त्रः]त्वं मूढबुद्धिं परित्यज्य विगतलिङ्गः स्वकुलोचितसत्कर्म कुर्वन् वर्तय, शुद्धाद्वैतविद्योपदेशं गुरुमुखात् प्राप्य मुक्तो भवसीति सम्यगुपदिष्टो वाराहः परमगुरुं नत्वा तन्मुखारविन्दात् पारमार्थिकज्ञानं लब्ध्वा लक्ष्मणाख्यशिश[4]ष्योऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ वराहमतनिबर्हणं नाम प्रकरणं सप्तत्रिंशम् ॥

॥ ३८ ॥

॥ लोकमतनिबर्हणम् ॥

एवमेतन्मते परिहृते पुनरन्यश्चतुर्दशलोकोपासकः कामकर्मनामा समागत्य यतीशं नत्वेदमाह—स्वामिन्। लोकसंघ[5] एवेश्वर इति[6] कृत्वा लोकानामुपास-

1. क ॰प्रोचितं कर्म 2. क. ॰माणम्। तेषा॰
3. रा. तावत् स्वकर्मानुलङ्घ्य कर्मातिक्रमात् अन्त्यज इति मन्वा॰
4. क., रा. ॰ष्यतरोऽभ॰ 5. रा. ॰संघभू ई॰ 6. रा. ॰तिमुत्वा लो॰



कोऽहम्। लोकानुग्रहवशादेव सर्वलोकप्राप्तिफलं [1]सम्भवति। तस्मादिहामुत्रापि न विचारः कर्तव्य इति भवन्तोऽपि मुक्तिकाङ्क्षिणः सत्यलो[2]कवासेच्छावन्तः प्रतिदिनं लोकोपासनं कुरुध्वम्। प्रसन्ने लोकसंघे [3]सत्यलोकप्राप्तिरेव मुक्तिरिति सर्वोन्नतफलं प्राप्स्यथ इति प्राप्ते भगवद्भिराचार्यैरिदमुच्यते—

भो कामकर्मन्, मूढतम! ना[4]स्ति किं तव विवेकलेशोऽपि। लोकोपासनेन फलमस्तीति भवतोक्तम्। तेषां भौतिकत्वादनित्यत्वाच्च तदुपासनमनृतम्। जडस्य [6]फलार्पणासमर्थत्वाच्चैतन्योपासनं कर्तव्यम्। [7]यदिवा सगुणब्रह्मण एव, तस्यापि फलमस्त्येवेति सम्यगुपदिष्टः कामकर्मनामा परमगुरुं नत्वा तदुपदेशबलादद्वैतविद्याश्रितोऽभवत् ॥

॥ इति अनन्तानन्तगिरिकृतौ लोकमतनिबर्हणं नाम प्रकरणं अष्टत्रिंशम् ॥

॥ ३९ ॥

॥ गुणमतनिबर्हणम् ॥

एवमेतन्मते परिहृते पुनरन्ये गुणोपासकाः तत्तद्वेषधारिणः प्रत्यवतिष्ठन्ते। ते किल स्वामिनमिदमूचुः—स्वामिन्! गुणाः किल लोककर्तारः, ब्रह्मादिदेवकारणं किल। अतो वयं गुणोपासनमात्रेण कृतार्थाः। सर्वस्यापि प्रपञ्चस्य गुणमयत्वात् सर्वलोकपूज्यत्वं गुणोपासकानामस्मामस्त्येव। तस्माद्भवन्तोऽपि गुणोपासनं कुर्वन्तो मुक्ता भविष्यन्तीति (पूर्वपक्षे) प्राप्ते दुष्टमतशिक्षादक्षैराचार्यैरिदमुच्यते—

1. क., म[2]. सम्यगस्ति। तस्मा॰
2 क. ॰कवासेच्छातः रा. ॰कप्राप्तीच्छावन्तः म[2]. ॰कवासमिच्छन्तः प्रति॰
3. रा. त्रिलोक॰ 4. रा. ॰स्ति तव नि॰ 5. रा. भवन्निर्णेतुं स॰
6. म[2]., रा. तपसा तृप्ते परमेश्वरे यदि सगुणैऽपि फलमस्त्येवेति सम्यगु॰

(किन्तु) [यदु]क्तं मूढतमैर्भवद्भिः गुणोपासनं कर्तव्यमिति तदनुपपन्नम्। तेषां जन्यत्वात्। अशाश्वतगुणोपासनेन किं शाश्वतफलरूपो मोक्षोऽस्ति। तस्मान्मूढबुद्धिं परित्यज्य शुद्धाद्वैतविद्यामाश्रित्य सत्कर्मशीला विगतवेषा भवथत इति प्रोक्तास्ते कृतविलासजीवविलासलयविलासाः शिष्याः बभूवुः ॥

॥ इत्यनन्तानन्तगिरिकृतौ गुणमतनिबर्हणं नाम प्रकरणं एकोनचत्वारिंशम् ॥

॥ ४० ॥

## ॥ साङ्ख्यमतनिबर्हणम् ॥

एवमेतेषु गुणोपासकेषु परिहृतेषु साङ्ख्यः प्रधानवादी कश्चित् प्रत्यवतिष्ठते। [1]स तु आचार्यस्वामिनमुवाच—[2]प्रधानं जगदुपादानकारणम्[3]। कस्मात्? स्मृतिबलात्। साङ्ख्याना[4]मस्माकं स्मृतिः किल प्रमाणम्, मन्वादिस्मृतिवत्। श्रुत्यर्थ एव श्लोकरूपेण ऋषिकल्पितत्वमात्रेण स्मृतिरासीत्। अतो वेदानां प्रमाणत्वात् स्मृतिरपि प्रमाणमिति प्राप्ते प्रधानस्य जगदुपादानकारणत्वं सिद्धमासीत्। तत्र किलायं श्लोकः स्मर्यते—

गुणसाम्यं प्रधानं हि महत्तत्वादिकारणम्।
अव्यक्तं व्यक्तभावश्च जगत्येकं परात्परम् ॥ इति।
तदुपासनमात्रेण मुक्तिः सन्निहिता नृणाम् ॥ इति।
कपिलादिभिराचार्यैरादृतं योगमुत्तमम् ॥ इति च

तस्मात् साङ्ख्यानामस्माकं प्रधानमेकमेव शरण्यं मोक्षेच्छूनामिति प्राप्ते श्रीमद्भिरिदमुच्यते—

1. रा. नत्वा आचा०
2. म[2]. 'प्रधानं' इत्यत आरभ्य 'सिद्धमासीत्' इति पर्यन्तो भागः नास्ति।
3. क. ०णम्। तस्मिन् साङ्ख्यानां स्मृतिः किल प्रमाणम्। मन्वादि०
4. रा. ०नां स्मृ०



भो साङ्ख्य। भवन्मतमनुचितम्। कथम्? प्रमाणाभावात्। स्मृतिः प्रमाणमिति यद्युच्येत, तन्न संभवति। वेदानुकूलायाः स्मृतेरेव प्रामाण्यात्। वेदगर्हितसाङ्ख्यस्मृतिप्रसिद्धं अप्रमाणमेव प्रधानं, तस्य ईक्षितृत्वाभावात् अशब्दत्वम्। अत एवाचार्यैः 'ईक्षतेर्नाशब्दम्' [ब्र. सू. १. १-५] इत्यधिकरणे अशब्दं प्रधानं न हि प्रमाणिकम्, ईक्षतेः इति (भाष्ये) प्रतिपादितम्। अचेतनस्य प्रधानस्य ईक्षितृत्वासंभवात् [1]चैतन्यस्य ब्रह्मणः जगदुपादानकारणत्वम्। 'आत्मा वा इदमेक एवाग्र आसीत्, नान्यत्किञ्चन मिषत्, स ईक्षत लोकान्नुसृजा' [ऐ. उ. १. १-१] इति; 'तदैक्षत, बहुस्यां प्रजायेय' [छा. उ. ६-२-३] इति; 'सदेव सौम्येदमग्र आसीत्', [छा. उ. ६-२-१] 'ब्रह्म वा इदमग्र आसीत्,' [बृ. उ. १-४-१२] 'एको ह वै नारायण आसीत्', [म. उ. १-१] 'एक एव रुद्रो न द्वितीयाय तस्थ' इत्यादि ब्रह्मकारण[2]वाक्यानि कथमचेतनं प्रधानं शंसन्ति। तस्मात् साङ्ख्य! मूढबुद्धिं परित्यज्य शुद्धाद्वैतविद्यामाश्रित्य सुखी भवेत्युपदिष्टः साङ्ख्यः परमगुरुं नत्वा इदमुवाच—

स्वामिन्! महानुभाव! महत्तत्वादिकारणमव्यक्तं वेदचोदितमेव प्रधानं, तत्कथमशब्दं भवितुमर्हति। तथा हि कठे—

(अचिन्त्यमव्यक्त) [अशब्दमस्पर्श] मरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥ [क.उ.३-१५]

इति। अतः अव्यक्तसंज्ञं प्रधानं वेदप्रतिपादितमेवेति पुनः साङ्ख्यमते प्राप्ते परमगुरुभिरेवमुच्यते—

भो साङ्ख्य! भवदुक्तमतमनर्हम्। कथम्? अव्यक्तं प्रधानं श्रुतिसिद्धं न भवति। अव्यक्तस्य महत्तत्वादिलिङ्ग[3]बीजरूपत्वेन गुणाङ्कुररूपत्वादव्यक्तं

1. क. चैतन्ये ब्रह्मण्येव जगदुपादानकर्तृत्वम्। आत्मा
2. रा. ०णवाक्यानि कथ०
3. क, म[2], रा. ०ङ्गरूप०

[1]कलिलवदभवत्, तस्यैव प्रधानत्वं त्रिगुणसाम्यमिति यद्युच्येत तदयुक्तम्, गुणत्रयसाम्यप्रधानोपासनेन सत्त्वोद्रेको[2] ज्ञानं कथं सिद्ध्यति। ज्ञानं सात्त्विकमित्युक्तेऽपि गुणसाम्यावस्थायां एकगुणवृद्ध्यसंभवात्। मोक्षस्यानर्पणयोग्यमपि जगत्कारणमिति यद्युच्येत तदपि न समञ्जसम्, [3]तन्निर्वृत्त्यदर्शनात्। तस्मात् साङ्ख्य। मूढकल्पितं प्रधानं कारणं परित्यज्य शुद्धाद्वैतविद्यामाश्रितस्त्वं सुखी-भवेत्युक्तः साङ्ख्यः परमगुरुं नत्वा तदुपदेशेन तच्छिष्योऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ साङ्ख्यमतनिबर्हणं नाम प्रकरणं चत्वारिंशम् ॥

॥ ४१ ॥

## ॥ योगमतनिबर्हणम् ॥

एवं परिहृते साङ्ख्यमते पुनरन्यः कापिलयोगवित् प्रत्यवतिष्ठते। स तु किलाचार्यस्वामिनं नत्वेदमुवाच—

भो, स्वामिन्! मदीयमतमतिविचित्रतरम्, योगेन मुक्तिरिति निगमागम-वचनदर्शनात्। तथा हि—

'त्रिरुन्नतं स्थाप्य समं शरीर'मित्यादि।
विविक्तदेशे च सुखासनस्थः शुचिस्समग्रीवशिरःशरीरः।
अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य॥
हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम्॥
अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम्।
अनादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्॥

1. सकलवदभवत्।
2. रा. ०द्रेको प्रधानं जगत्कारणमिति यद्युच्येत तदपि न समञ्जसम्। तन्निवृ०
3. क. अतन्निवृत्ति० म₂. मतनिवृत्ति०
जगत्कारणज्ञानात् मोक्षस्वरूपनिष्पत्तिदर्शनात्।—टि.



उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्॥
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्॥ इति।

आगमेऽप्यजपाविद्यायां मूलाधारचक्रमारभ्य सहस्रारपर्यन्तषट्चक्रस्थ-देवातानां [1]गणपत्यादीनां सम्यगुपासनेन ब्रह्मनाडीबिले ज्ञाते ततः कुण्डलिनीं मूलाधारचक्रस्थां वामपादपार्ष्णीनिपीडितवायुबलात् प्राणापानवाय्वैक्यं गुरूपदे-शात् [2]कृत्वा तद्देशात् समुत्थाप्य प्रतिचक्रभेदेन सहस्रारं प्रापयित्वा तन्मूलाधारे पुनः स्थापयित्वा ब्रह्मानन्दसुखभुग्पुरुषः मुक्तो भविष्यति। अतो यूयं मुक्ति-काङ्क्षिणो योगमाश्रयध्वमिति।

तत्राचार्यः पठति—कापिल! भवन्मतमनर्हम्। कुतः? प्रमाणाभावात्। प्रमाण 'विविक्तदेश' इत्यादि (लिखितमेव) [उदितमेव] इति यद्युच्येत, तथा न वक्तव्यम्। हृदादिवाक्यैर्दहरविद्यैव प्रतिपादिता, न योगः। अजपाविद्यायाः आगमोक्तत्वबलात् सैव योग इत्यद्युच्येत तदपि न सम्भवति। अजपामूलमन्त्रस्य हंसरूपत्वेन सोऽहमित्यर्थे निर्धारिते परजीवयोर्भिदागन्धलेशाभावात् कथं योग इति वक्तुं शक्यते। मन्त्रवशात् योगस्याप्राप्तावपि कुण्डलिन्या षट्चक्रभे-दमात्रं योग इति यद्युच्येत, तदपि न (मानम्) [समञ्जसम्] मुक्ति (मार्ग) [मार्गत्वा] भावात्।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना।

इति (निषेध[3]स्यान्यपरत्वात्) [अन्यपरस्य निषेधात्]। किञ्च, ज्ञानाधि-कारपरामर्शोऽपि। 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितः श्रद्धावित्तो भूत्वा-ऽत्मन्येवात्मानमनुपश्येत्' इति प्रतिपादितः। 'अनु' शब्देन ब्रह्मविषयक-वेदान्तशास्त्राङ्गीकारमात्रं चोद्यते।

1. रा. ०नां सम्यगुपासनेन 2. रा. ०त्वा समुत्थाप्य
3. रा. ०धेन अन्यपरत्वात्।

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥
[मु. उ. ३-२-६] इति श्रुतेः ।

अतो योगस्य सर्वदा निरवकाशत्वादप्रामाण्ये प्राप्ते पुनः कापिलः स्वामिनमिदमुवाच—

भो, परमयतिवर्य ! योगो न मुक्तिकारणमिति भवता उक्तं, सत्यं मुक्तिस्वरूपानभिज्ञस्त्वमेवं जल्पसि ।

अज्ञात्वा खेचरीमुद्रां ब्रह्मज्ञोऽहमिति द्विजः ।
यो वदेत्तस्य जिह्वायाश्छेदं कुर्विति शासनम् ॥
नदीत्रितयसंयोगं त्रिकूटाख्यमपि द्विजः ।
ब्रह्माहमिति यो ब्रूते तज्जिह्वाच्छेदमाचरेत् ॥

अविदित्वा द्विजो यस्तु भृङ्गाटकमतःपरम् ।
ब्रह्माहमिति यो ब्रूते तज्जिह्वाच्छेदमाचरेत् ॥
मनोन्मन्याः स्वरूपं हि पूर्णमण्डलमार्गतः ।
अविदित्वाऽब्रवीद्ब्रह्म तस्य जिह्वां हि संछिनेत् ॥

अङ्गुष्ठमात्रस्य पुंसः स्थानज्ञानं विना द्विजः ।
ब्रह्मास्मीति च यो ब्रूते तस्य जिह्वां हि संछिनेत् ॥

अवस्थात्रितयस्थानं नीचोन्नतविगर्हितम् ।
अज्ञात्वा ब्रह्म यो ब्रूते शिरस्तस्य पतत्यधः ॥

इत्याद्यनेकगोप्यलक्ष्यस्थानव्याप्तं ब्रह्मस्वरूपं योगशास्त्रं विना ज्ञातुमशक्यम्, लययोगे तत्प्रपञ्चस्यातीव दर्शनात् । 'लयवित् परमं ब्रह्म याति नान्येन वर्त्मने'ति अयोगपरस्य निषेधदर्शनात् योगोऽवश्यमङ्गीकर्तव्यः । 'हठवित् परमं स्थानं याति ब्रह्म सनातनम्' इति हठयोगप्रपञ्चस्य श्रेष्ठत्वमुक्तम् । अतः सर्वदा अत्यन्तयत्नेन मोक्षकाङ्क्षिभिः योग एवाङ्गीकर्तव्य इति—

1. अयं आर्षप्रयोगः—टि.



एवं प्राप्ते भगवद्भिरिदमुच्यते—किं कापिल ! वृथा जल्पसि । प्राणायामप्रत्याहाराद्यष्टाङ्गयोगैर्नमुक्तिमार्गगन्धः संभवति । किन्तु देहायासमात्रमेव फलम् । खेचरीमुद्राविज्ञानं विना मोक्षो नास्तीति भवदुक्तम्, तदत्यन्तमन्दतरम् । परिपूर्णस्य ब्रह्मणः सम्यग्ज्ञानं केवलमभ्यसनीयम् । तादृग्विधज्ञानस्य चित्तशुद्धिमूलत्वात् तस्याः सत्कर्माश्रितत्वात् वेदोक्तसत्कर्मैव सम्यगनुष्ठितं चित्तशुद्ध्यादि फलं जनयति । तेन नित्यानित्यवस्तुविवेके इहामुत्रार्थफलभोगविरागे शमदमादिसंपत्तौ शीतोष्णद्वन्द्वसहने मुमुक्षुत्वे च जाते मुक्तिरिसद्धैव साधनसंपन्नस्य श्रवणादिनेति । श्रवणं नाम गुरुमुखान्महावाक्योपदेशः 'तत्त्वमसि', [छा. उ. ६-८-७] 'अहं ब्रह्मास्मि', [बृ. उ. १-४-१०] 'अयमात्मा ब्रह्म', [बृ. उ. २-५-१९] प्रज्ञानं ब्रह्म [ऐ. उ. ३-१-३] (नेह नानास्ति किञ्चन', [बृ. उ. ४-४-१९]) इति । एवं वाक्यचतुष्टयस्योपदेशादेव[1] शिष्यस्य श्रवणसिद्धौ जातायां तद्वाक्यार्थविचार-

1. श्रीभगवत्पूज्यपादानां महावाक्यचतुष्टयस्यापि उपदेशं कृतवन्तः श्रीगोविन्दभगवत्पूज्यपादाः इति माधवीयशङ्करविजये [५-१०३] । [काशी-कलकत्तानगरयोः श्रीपञ्चाननतर्करत्नभट्टाचार्य-श्रीदुर्गाचरणसाङ्ख्यवेदान्ततीर्थमहोदयानां पञ्चदशाधिकमहामहोपाध्यायानां अन्येषां पण्डितानां च निर्णये अयं विषयः प्रपञ्चितः] । इदमेव विश्वेश्वरस्मृत्यादियतिधर्मप्रबन्धसंमतम् । स्वाराज्यसिद्धौ हरिमीडेस्तुतिरामतीर्थीये च 'स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः' [तै. उ. २-८] इति इदमपि वाक्यं महावाक्यतया निर्दिष्टम् । स्ववेदगतशाखान्तरमात्राध्ययनस्य निषिद्धत्वात्, कृष्णयजुर्वेदिनां 'अहं ब्रह्मास्मि' [बृ उ. १-४-१०] इति शुक्लयजुर्वेदान्तर्गतमहावाक्यस्थाने इदं महावाक्यत्वेन निर्दिष्टं स्यात् । अयमेवार्थः संक्षेपशारीरकाचार्यैः 'स्वाध्यायधर्मपठितं निजवेदशाखावेदान्तभूमिगतमादरपालितं च, संन्यासिना परदृशा गुरुणोपदिष्टं साक्षान्महावचनमेव विमुक्तिहेतुः' [सं. शा. ३-२९५] इति श्लोके निजवेदशाखाशब्देन सूचितः । शतशः महावाक्यानि सन्ति इति भगवत्पादैः सूचितं विवेकचूडामणौ [२४९] । पञ्चीकरणग्रन्थे भगवत्पादैः महावाक्यत्रयं निर्दिश्य 'इत्यादिवाक्येभ्यः' इति 'आदि' शब्दोपरि 'वाक्येभ्य' इति बहुवचनं प्रयुञ्जानैः महावाक्यचतुष्ट्वनियमनाभावः सूचितः । वेदान्तनामसहस्रे ग्रन्थे श्रीपरमशिवेन्द्रसरस्वतीश्रीचरणैः प्रणवस्य महावाक्यत्वं विस्तरेण निरूपितम् । तथैव तत्त्वानुसन्धानग्रन्थेऽपि । रामतापिन्युपनिषदि जीवब्रह्मैक्यनिरूपणप्रकरणे 'अहमेवेति संभाव्यः ओं तत् सत् यत् परं ब्रह्म' इति वर्तते । तच्छब्दः ब्रह्मवाचकः, सच्छब्दः तज्ज्ञातृजीववाचकः । 'अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुरिति' इति हि श्रुतिः; ''तत्त्वं तत्त्वविदेकात्मा'' इति विष्णुनामसाहस्रम्, ''सर्वो हि आत्मास्तित्वं प्रत्येति, न नाहमस्मीति'' इति भगवत्पादभाष्यम् । 'अस्ति' इति सत्; 'अस्मि' इत्यपि सत् । 'ओं तत् सत् उपदेशवाक्' इति काचित्कानुशासनेऽपि 'ओं' इत्यस्य पृथङ्महावाक्यत्वं, 'तत् सत्' इत्यस्य पृथङ्महावाक्यत्वं निर्दिष्टम् । अथ वा 'ओं तत् सत्' इति वाक्यस्य प्रणवात्मकः तत्पदार्थः ज्ञातृसत्पदार्थाभिन्नः इति एकमहावाक्यत्वं वा स्फुरति । सर्वथा महावाक्यचतुष्ट्वनियमनाभाव एव इति ध्येयम् ।

रूपं मननमिति, वाक्यार्थनिष्ठं स्वस्वरूपध्यानमेव निदिध्यासनमिति च उच्यते। तदनुसर्वात्मकब्रह्मसाक्षात्कारे एव मोक्ष इति निरवद्यम्। किञ्च, रहस्यवेदे महादेवः किल शुकस्योपदेशं कृतवानित्युक्तम्। तदुपदेशप्रकारोऽपि महावाक्यचतुष्टयरूप एव, तथाविधोपदेशेन शुकस्य सर्वात्मकब्रह्मसाक्षात्कारसिद्धिः।

कठप्रश्ने—

आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः।

[क. उ. २-७]

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिरत्र नास्ति अणीयाँ ह्यतर्क्यमणुप्रमाणात्॥ [क. उ. २-८]

इति गुरुशिष्याभ्यां प्रयत्नात् ज्ञातव्यस्य सर्वात्मकस्य ब्रह्मणः स्वरूपं केन वेत्तुं शक्यमिति उक्ते, तत्रैवोक्तम्—'मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन' [क. उ. ४-११] इति।

एवकारेण मनोव्यतिरिक्तसाधनान्तराभावः उच्यते। अतः शुद्धमनोवेद्यं ब्रह्मेति प्राप्ते—'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' [तै. उ. २-४, ५] इति श्रुतिर्विरुध्यते। तथाप्येतद्दूषणमपक्वमनसो ज्ञातव्यम्। पक्वमनसः तावत् कारणशरीरस्य मनोन्मन्यवस्था यदा प्राप्यते तदा सदसदात्मके अङ्गुष्ठमात्रपुरुषे (लीनं मनो भवति, तस्यैव ज्ञानरूपत्वात्) जलमालिन्यं कतकरे(णुवादि) [णात्रिव] [लीनं मनो भवति, तस्यैव ज्ञानरूपत्वं] इत्यूहनीयम्। इच्छाकल्पितपरिच्छिन्नरूपाङ्गुष्ठमात्रपरमात्मनि मनोलये जाते मनःकल्पितसर्वप्रपञ्चोपशमान्मुक्तिरिति दिक्। चतुर्विंशतितत्त्वात्मकस्थूलशरीरस्य सूक्ष्मे सप्तदशात्मके लयं कृत्वा तदपि कारणे मनोमात्रे लयप्रयत्नं कुर्वतः शुद्धमनसोऽपि परब्रह्मणि च लयं चिकीर्षोः पुरुषस्य जीवन्मुक्तस्य दग्धपटन्यायेन प्रपञ्चा[न]न्तःपातिनः किमु साङ्ख्ययोगाभ्यां प्रयोजनं विद्यते। ब्रह्मस्वरूपानभिज्ञस्य सद्गुरुसदुपदेशलेशादपि दूरगतस्य मर्त्यस्य मूलाधारा[1]दिचक्रैः रक्तमांसमयैः किं मुक्तिरस्ति। तस्मान्मूढबुद्धिं परित्यज्य निरस्तयोगतृष्णः शुद्धाद्वैतविद्यमाश्रित्य सर्वपरिपूर्णं ब्रह्म सच्चि-

1. रा. ०रादिशल्यमांसमयैः



दानन्दलक्षणं ज्ञात्वा मुक्तो भव इत्युक्तः कापिलः परमगुरुचरणारविन्दद्वन्द्वासक्तशिराः तदुपदेशेन शुद्धाद्वैतविद्याश्रितः शिष्यश्रेष्ठोऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ योगमतनिबर्हणं नाम प्रकरणं एकचत्वारिंशम् ॥

॥ ४२ ॥

## ॥ पीलुमतनिबर्हणम् ॥

ततः किल पीलुवादिनः धीरशि[1]वभट्टशिवगङ्गानाथादयः परमगुरुं नत्वेदमूचुः—स्वामिन् अस्मदीयमतं शृणु, साङ्ख्ययोगमतनिराकरणमिव न सुलभं [अस्मन्मतनिराकरणम्]। न्यायशास्त्रे किलेश्वरवादः[2] प्रसिद्धः। परमेश्वरः साक्षाज्जगत्कर्ता। स एव सृष्टौ भूम्याद्यणुसंयोगं लये वियोगञ्च करोति, भूम्याद्यणूनां नित्यत्वात्। एवं भूम्यबग्निवायुप्रपञ्चे जाते तैरेव अतलादिसृष्टिं विधाय तत्तल्लोकावासयोग्यान् प्राणिनः सृष्ट्वा स्वयं सर्वसाक्षी सर्वं पश्यन्नास्ते सर्वपरिपूर्णश्चाकाशवदिति प्राप्ते, परमगुरुः पठति—

भो धीरशिवादयः! शृणुध्वम्। भवन्मतमसमञ्जसम्। कुतः? श्रुतिविरोधात्। आत्मन आकाशस्संभूतः' [तै. उ. २-१-१] इत्यादिना भूतानां जन्यत्वादनित्यत्वे प्राप्ते कथं नित्यताऽस्ति? यज्जन्यं तदनित्यमिति न्यायात्। 'अत्ता चराचरग्रहणात्' [ब्र. सू. १-२-९] इति सूत्राच्च [3]सर्वात्तृत्वे जगदीश्वरस्य प्रोच्यमाने किमवशिष्टं विद्यते। अतः पृथिव्यादिषु न हि नित्यत्वकल्पना युक्ता। परमेश्वर एक एव नित्यः, तद्व्यतिरिक्तं जगदनित्यमिति सिद्धान्तः। त्वन्मतदूषणञ्च प्रतिपादितम्—"अधीत्य गौतमीं विद्यां[4] गार्दभीं योनिमाविशेत्" इति।

प्रत्यक्षादिप्रमाणसिद्धभूतानां सत्त्वकल्पनां परित्यज्य शुद्धबुद्धस्वरूपं सत्यं [ज्ञान]मनन्तं ब्रह्म गुरूपदेशात् ज्ञात्वा शुद्धाद्वैतविद्यामाश्रित्य मुक्ता भवत इत्युक्ताः पीलुवादिनः तदुपदेशवशात्तच्छिष्या बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ पीलुमतनिबर्हणं नाम द्विचत्वारिंशं प्रकरणम् ॥

1. रा. ०वलिङ्गना० 2. रा. ०दसिद्धिः परः
3. रा. सर्वात्मकत्वे ज० म2. सर्वात्मत्वे ज० 4. म2. ०द्यां सार्गाकी यो०

॥४३॥

## ॥ कर्ममतनिबर्हणम् ॥

प्रातः स्नात्वा त्रिवेण्यां हि गुरुः शिष्यसमन्वितः ।
प्राङ्मार्गात्प्राप पक्षार्धात् काशीं काशीशसंयुताम् ॥

तदानीं बन्दिकृतस्तुतिभिः शिष्यकृतकरतालैः शङ्खढक्कानिनदैश्चित्रमासीत् । तत्र स्थिते त्रिमासकालं परमगुरौ केचित् कर्मवादिनः समागत्य स्वामिनमिदमूचुः—शृणु मतं [अस्]मदीयम् । अखिलकारणं कर्मैव । जगदुत्पत्तिविपत्तिसंपत्तयः कर्मणैव भवन्ति । तथाविधप्रमाणस्य विद्यमानत्वात्, 'तद्धेदं तर्ह्यव्याकृतमासीत्' [बृ. उ. १-४-७] इति श्रुतेः । इदं जगदव्याकृतमासीत् । केन ? कर्मणैव । तस्य स्वतन्त्रत्वात् कर्मैव कारणम् । 'अथाऽतो धर्मजिज्ञासा' [जैमिनिसूत्रम्. १-१-१] इत्यादिसूत्रैः जैमिनिना सिद्धान्तितत्वाच्च । तदेव [1]स्वनिष्ठान् जीवान् सृजति, लये संहरति, तदन्तरे पालयति । (सत्यमेवं) [सत्येवं] तेषां सुकृतकर्मवतां जीवानां सुकृतयोनिप्राप्तिः । पापकर्मवतां पापयोनिप्राप्तिरित्यपि श्रुत्या दर्शिता—

'तद्य इह रमणीयचरणाभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं वा, क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणाः अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा [छा. उ. ५-१०-७] इति । चरणं आचरण[2]म् कर्मैव पुण्यपापयोनिषु जननकारणमिति कृत्वा कर्मैव सर्वैर्मुमुक्षुभिः कार्यमिति । जीवस्य सुखप्राप्तिरेव मोक्षः । अतः कर्मैव [संसिद्धि] (निमित्त) कारणम् । 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः [भ. गी. ३-२०] इत्युक्तिः [3]गीतादौ । लोकदृष्टान्तोऽपि — कृष्यादिकर्मणः फलप्राप्तिदर्शनात् । तस्माद्भवद्भिरपि (अङ्गी) कर्तव्यं कर्मैव मुमुक्षुभिरिति प्राप्ते—

परमगुरुः पठति — भवन्मतनर्हम् । कुतः ? निगमादि[4]वाक्यप्रपञ्चविरोधात् । तथा हि—'यस्य वैतत्कर्म स वै वेदितव्य' इति एतत् भगवत्कर्मैव,

1. रा. स्वनिष्ठाञ्जीवान् सृजति, लये, 2. म2. णं तदेव प्रवृत्तिनिवृत्तिकारणम् । अतः कर्मणैव हि० 3: म2. रा. पुराणे 4. म2. वाक्यविरोधात्



तस्य जगदुत्पत्त्यादिकारणत्वात् । अथर्वशिखायां 'कारणं तु ध्येय' इत्युपक्रम्य 'शम्भुराकाशमध्यगः' [अ. शि. ३] इत्युपसंहृतम् । अतः सर्वकारणं ब्रह्मास्तीति सिद्धमेव । श्रुत्यन्तरं च—'ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत, ततो रात्रिरजायत, ततः समुद्रोऽर्णवः, समुद्रादर्णवादधिसंवत्सरोऽजायत, अहोरात्राणि विदधद्विश्वस्य मिषतो वशी, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, दिवं च पृथिवीं चान्तरिक्षमथो सुवः' [तै. आ. १०-१-१३] इति । अर्थस्तु एवं अस्याः वक्तव्यः—'अभीद्धात्तपसः' मायाशबलाद्ब्रह्मणः, 'ऋतं' सूक्ष्मं महत्तत्त्वादि, 'सत्यं च' स्थूलं विराडादि(प्रपञ्चं), अध्यजायत । तदा सूर्यादिग्रहाभावात् रात्रिरेव प्रथममजायत । ततः 'समुद्रः' लवणादिसप्तरूपः, 'अर्णवः' गङ्गादितटिनीरूपः, समुद्रादुक्तादर्णवाच्च अधिकृत्य संवत्सरः कालः अजायत । सम्यगस्मिन्नयनमासपक्षदिनाऽहोरात्रयामघटिकाविघटिकामुखसूक्ष्मकालाः यु[1]गमन्वन्तरकल्पादिस्थूलकालाश्च वसन्तीति संवत्सरः स एव प्रथममजायत इत्यविरोधः । ततः सूर्यादिग्रहोत्पत्त्यनन्तरं 'अहोरात्राणि विदधत्' । बहुवचनेन प्रतिविषयभिन्नानि अहोरात्राणीति निरवद्यम् । 'मिषतो विश्वस्य', 'वशी' ब्रह्मा 'सूर्याचन्द्रमसौ', 'यथापूर्वं' पूर्वकल्पानुरोधेन, 'अकल्पयत्', सूर्येण विना अहोरात्र्युत्पत्त्यभावात् सूर्याद्युत्पत्त्यनन्तरमेवाहोरात्र्याद्युत्पत्तिर्वक्तव्या । अत्रार्थक्रम एव अङ्गीकर्तव्यः, [2]पाठक्रमविरोधात् । "अग्निहोत्रं जुहोति', 'यवागूं पचति', इत्यत्र अग्निहोत्रहोमानन्तरं यवागुपाको व्यर्थः स्यात् । तस्मादर्थक्रमो यथाङ्गीकर्तव्यस्तथैवात्राप्यङ्गीकर्तव्यः, इत्यलमतिप्रसङ्गेन । 'दिवं' द्युलोकं, पृथिवीं भूमिष्ठातलादिसप्तलोकान्, 'अन्तरिक्षं' सूर्यादिग्रहलोकं ध्रुवलोकपर्यन्तं, 'स्वः' स्वर्गलोको [3]परिस्थितमहर्जनस्तपःसत्यलोकांश्च, एवं 'अकल्पयत्' । तस्मादीश्वरः सर्वकारणम् । कर्मणो जडस्य न हि जगज्जन्मादिकारणत्वं मन्दा अप्यङ्गीकुर्वन्ति,

1. म2. गकल्पादिस्थूल. 2. रा. पाठतः अविरोधात् ।
3. रा. ०पलक्षितमह०

यत् कृतं कुडयरचनादिकं कर्म तदेव फलदमिति वक्तुं न हि रमणीयम्। इदं कुडयरचनादिकं कर्म कुर्वित्या[1]ज्ञापकः फलदः स्यात्, तस्य चेतनत्वात्। अतो ब्रह्मैव जगदुपादानकारणमिति सम्यगुक्ताः कर्मवादिनः कनकगिरितुङ्ग-नाथादयः परमगुरूपदेशेन शुद्धाद्वैतविद्याश्रिताः कृतार्था बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ कर्ममतनिबर्हणं नाम त्रिचत्वारिंशं प्रकरणम् ॥

॥ ४४ ॥

## ॥ चन्द्रमतनिबर्हणम् ॥

तदनन्तरं शिवाभरणाख्यः स्वशिष्यैस्सह समागत्य स्वामिनमिदमुवाच— मदीयमतममृतमिव सर्वलोकोपादेयं चन्द्रदैवत्यम्, सावधानेन शृणु। भगवान् चन्द्रः किल षोडशकला[2]परिपूर्णः सर्वदा सर्वप्राणिपोषणपरः स्वाष्टा[3]दशसहस्र-योजनविस्तीर्णमण्डलेन ब्रह्माण्डं द्योतयन् विभुरेकोऽद्वितीयः [4]परोऽमृतरूपः (स एव) वर्तते।

'पुष्णामि चौषधीस्सर्वाः सोमो भूत्वा रसात्मकः' [भ. गी. १५-१३] इति स्मृतेः सर्वदेवत्मिकरश्च। तथा हि—स्वगात्रनिष्ठामृतं देवेभ्यो दत्त्वा तान् परिपालयति। तथा 'प्रथमां पिबते वन्हिर्द्वितीयां पिबते रविः' इत्या(दि)[देः] सोमादुत्पत्तिप्रपञ्चनात्। अतः पूर्णिमादिपुण्यकालेषु चन्द्रोपासनया प्राप्ता-मृतपानेन मुक्तिरिति प्राप्ते परमगुरुः पठति—

1. रा. ०त्याज्ञप्तिः फलदा स्यात्। 2. रा. ०कापतिः पूर्णः सर्व०
3. रा. ०ष्टाशीतिसह० 4. रा, ०परोऽपरामृत०



भो, शिवाभरण! भवन्मत[1]मनर्हम्, प्रमाणाभावात्। चन्द्रोपासनया मुक्तिरित्युक्तं, त(द)[त्रा]पि न मानम्। अनित्योपासनया[2]नित्यमुक्तिप्राप्तिरस्तीति न [3]हि सम्यक्। उचितमिव तव रोचते। मोक्षमार्गोऽप्येतद्द्वारो न विद्यते। किन्तु इष्टापूर्तादिकर्मकृतां चन्द्रप्राप्तिः, पुनर्मर्त्यलोकप्राप्तिरिति। अनुज्ञामात्रेण मुक्तिः किं वर्तते?

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिः योगी प्राप्य निवर्तते॥ [भ. गी.८-१५]

इति भगवदुक्तेः। 'एष देवानामन्नम्' इति श्रुतेश्च। देवान्नरूपस्य चन्द्रस्य ज्ञानेन न हि मोक्ष[4]लेशः सम्भवति, [परन्तु] तल्लोकप्राप्तिः [संभवति] इति वयमपि शुश्रुमः। मूढतम! शुद्धाद्वैतविद्यामाश्रित्य त्वं कृतार्थो भव इत्युक्तः शिवाभरणः सद्गुरूपदेशं लब्ध्वा शुद्धाद्वैतविद्याश्रितोऽभवत्।

॥ इत्यनन्तानन्दगिरिकृतौ चन्द्रमतनिबर्हणं नाम प्रकरणं चतुश्चत्वारिंशम् ॥

॥ ४५ ॥

## ॥ भौमादिग्रहपञ्चकमतस्य राहुमतस्य च निबर्हणम् ॥

एवमेतस्मिन् परिहृते पुनरन्ये भौमादिग्रहोपासकाः प्रत्यवतिष्ठन्ते, ते किल अनृणः, सुविद्यः, कृतविद्यः, शर्मिष्ठः, कल्माषः, क्रूरवदनः इत्याख्याः स्वामिनं

1. म$_{2}$. रा. ०मसमञ्जसम्।
2. रा. ०या अचिन्त्यमुक्तिरिति।
3. रा. हि सम्यगुचितमिवरोचते। म$_{2}$. ह्यनुचितमेव तव रोचते।
4. रा. ०क्षः सम्भ०

नत्वेदमूचुः—शृणु ! अस्मदीयमतानि परमसुलभानि तावत् । भौमस्य अग्निमूर्धत्वं, दिगिलापतित्वं च श्रुतिसिद्धम् । आगमेषु चाङ्गारकप्रसिद्धिर्वर्तते ऋणमोचनाङ्गारकस्तवेषु—

कुमारो रक्तवर्णश्च वन्हिमूर्धा द्युदिक्पतिः ।
भूयःकीर्तिर्महीतत्त्वगात्रो भौमः स पातु माम् ।
भोगमोक्षौ ददात्वस्मत्कार्यं सफलमादरात् ॥ इति ।

श्रुतिश्च—'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति' [तै. सं. १-५-५] इति । [1]तस्मादिहामुत्रफलेप्सुभिः भौमोपासनं कर्तव्यमिति प्राप्तम् । तद्वद्बुधोपासनमपि । तस्य सर्वविद्याप्रदत्वात् ज्ञानहेतुत्वाच्च । ज्ञानमेव मोक्षदम् । अतो मोक्षकारणस्य बुधोपासनस्य श्रुत्यादिमूलकत्वात् तदेवाङ्गीकर्तव्यम् । गुरूपासनं [च] कर्तव्यम् ; तस्य वेदमूलकत्वात् देवगुरुत्वाच्च । अतो गुरोः सर्वज्ञत्वादिगुणविशिष्टत्वाच्च गुरूपासनमवश्यं कर्तव्यम् । भृगूपासनमपि तद्वदेव । तस्य महर्षित्वादनादिगुरुत्वं सर्वज्ञत्वं सर्वद्विजपूज्यत्वं च प्रसिद्धम् । तत्प्रसिद्धिः यजुः काण्डेऽभिहिता—

'भृगूणां त्वाङ्गिरसां व्रतपते व्रतेनाददामीति भृग्वङ्गिरसामादध्यात्' [तै. ब्रा. १-१-४] इति । तस्य वरुणपुत्रत्वेन तदुपदेशबलात् सर्वज्ञस्य भृगोरुपासनया ज्ञानसिद्धिः । तस्माद्भृगुपासनमावश्यकमिति तावत्प्राप्तम् । मन्दस्य दुःखकरत्वेन तदुपासनया दुःखनिवृत्तौ जातायां सुखप्राप्तिरेव मोक्षप्राप्तिरिति तदुपासनस्यापि मोक्षकारणत्वेन ग्राह्यत्वं प्राप्तम् । राहूपासनं कर्तव्यम् । विष्णुवरबलात् रविचन्द्रग्रहणसमर्थस्य [3]पट्टबलिनः परमोपासनया ग्रहमार्गातीतवृत्तेः [4]लक्ष्यमाणत्वात् तदुपासनमावश्यकमिति प्राप्ते तेषां भौमादीनां स्वतन्त्रत्वात्

1. रा, हेतुकत्वाच्च 2. रा. महादेव ऋषि० 3. रा. बहुबलिनः
4. रा, लभ्यमानत्वात् ।



पृथगुपासनैर्धर्मार्थकाममोक्षपुरुषार्थसिद्धिर्भविष्यति । अतो निस्सन्देहं भवन्तोऽपि मुक्तिकाङ्क्षिणः प्रपञ्चकारणानां ग्रहाणामुपासनं कुरुध्वम् । तेन कालातीतवृत्त्याश्रिता [1]मुक्ता भवतेति प्राप्ते श्रीमद्भगवानाचार्यः पठति — यूयमनृणादयः शृणुध्वम् । भवन्मतानि नाङ्गीकर्तव्यानि । कुतः ? प्रमाणाभावात् । वेद एव प्रमाणमिति यद्युच्येत, तर्हि सर्वस्यापि वेदमूलकत्वमस्त्येव । न हि सर्वस्योपासनं युक्तम्, यच्चैतन्यं जगदुपादानकारणं, 'सदेव सौम्येदमग्र आसीत्' [छा. उ. ६-२-१] इत्यादिजगत्कारणवाक्यप्रपञ्चवेद्यं तदेकमेवाद्वितीयं ब्रह्म सर्वैर्मुमुक्षुभिरुपासनीयम् । तदुपासकानां तत्प्राप्तिरेव मोक्षः । [2]विना विज्ञानं शरीरिणां ग्रहाणामुपासनेन मुक्तिरिति जडाऽपि न मन्यन्ते । लोकानां विरुद्धग्रहपीडादिशान्तये तत्तद्ग्रहोपासनं कर्तव्यमिति वेदमूलकत्वेन आवश्यकं, लौकिकोपयोगिकं च । एवंवृत्तिमतां[3] ज्ञानदातृत्वमनुचितम् । तस्मात् [4]जडांशां परित्यज्य शुद्धाद्वैतविद्याश्रिता भवत इति गुरुणोपदिष्टे—

श्रुत्वैतदनृणाद्यास्तु नत्वा गुरुपदद्वयम् ।
शिष्या बभूवुस्तद्बोधे जीवन्मुक्तास्तदाऽभवन् ॥
शिष्योऽपि गुरुरेवासीद्गुरुः शिष्योऽभवत्तदा ।
मनोन्मनी मनस्येव लीने ब्रह्म परं गतः ॥
स एव सर्वसाक्षी स्यादिति वेदा वदन्ति हि ।

॥ इत्यनन्तानन्दगिरिकृतौ भौमादिग्रहपञ्चक[मत]स्य (अर्थात्) राहुमत [स्य च] निबर्हणं नाम प्रकरणं पञ्चचत्वारिंशम् ॥

1. म2. मुक्ता भविष्यन्तीति प्राप्ते.
2. रा. तिथिदिनादिविहितानां तदन्तशरीराणां गृहाणां
3. रा. ०तां स्यानहेतुत्वम०
4. रा. जडांशं

## ॥ ४६ ॥

## ॥ क्षपणकमतनिबर्हणम् ॥

ततः क्षपणकः परमगुरुं नत्वा इदमाह — स्वामिन्! भवदाश्रमस्थेन मया षण्मासकालोऽनुभूतः[1]। इतः परं मन्मतपरीक्षां कुरु, द्रुतमहं यास्यामि, इत्युक्तः शङ्करगुरुरपि तन्मतपरिशीलनार्थमिदमब्रवीत् — भवत्करधृतयन्त्रद्वयस्य लक्षणमुक्त्वा शीघ्रं गच्छेति। स तु क्षपणकः पुनः परमगुरुं नत्वा सावधानेन श्रूयतामिति विज्ञाप्याह — इदं किल गोलयन्त्रम्। तदन्तर्वर्तिनो भूपिण्डस्य नित्यमधःपतनशीलस्यानुकूलवृत्त्या सर्वग्रहर्क्षमण्डलोपेतं (समान्तरं) [सांवत्सरं कालचक्रं] अनुगच्छति। तन्मध्यस्थग्रहास्तु चक्रवेगात् प्रागुदयं प्रत्यगस्तमयं यान्ति। केचिन्मन्दधियः कश्चिच्छिशुमारनामा भगवान् स्वकरादिप्रदेशेषु ग्रहर्क्षगणं बिभर्तीति वदन्ति। तदत्यन्तमसत्यम्, एकस्थस्य शरीरविकृतरूपस्य शिशुमारस्य करादिस्थाः ग्रहा इति। तेषां भूम्यधोभ्रमणहेत्वभावात्। तस्मात् कालचक्राश्रिताः ग्रहाः [2]सर्वे, तस्योपरि कक्षाबद्धाश्चन्द्राद्याः शन्यन्ताः कालरूपानुवृत्तिमाश्रिताः, [3]कालेन नित्यभ्रमणशीला इति च। अतः पूर्वापरयाम्योत्तरवृत्तद्वयसंयोगस्थान[4]दत्तपलांशं खण्डद्वयाग्रनि[5]बद्धं क्रान्तिवृत्तं स्यात्। तस्मिन् किल राशिस्थानेषु [6]सञ्चारं कुर्वन् ग्रहराट् सूर्यो वर्तते। सर्वखेचरमण्डलाश्रित ग्रहगोलं स्वोर्ध्वस्थखगोलान्तर्वर्तमानमध्यचिन्हमार्गविद्धम्, खमध्यस्थग्रहर्क्षदर्शनादिकालस्वरूपज्ञानान्मुक्तिरिति। काल एव ब्रह्म; अतः कालविद्ब्रह्मविदिति

1. 'भवत्परीक्षाकाले आगते भवन्तं पृच्छामि' [प्रकरणम् सप्तविंशम्] इति स्थापितः अयं क्षपणकः इति स्मर्तव्यम्।
2. रा. सर्वैः स्वस्योपरिकक्षा०
3. म2. कालभवेन नित्य०
4. रा, वृत्तकपालोशं
5. रा. ०बद्धा क्रान्तवृत्तिः स्यात्।
6. रा. संभारं



निरवद्यम्। 'दिक्कालौ नेश्वरादतिरिच्येते', मानाभावात्। न च [1]परत्वोन्नायकत्वेन तत्सिद्धिः; आत्मनस्तदुन्नयनात्, इत्यादितर्कराद्धान्तवच[2]नादपि कालस्य ब्रह्मत्वप्राप्तिरित्येवं[3] पूर्वपक्षे प्राप्ते —

श्रीपरमगुरुः पठति — भो क्षपणक! कालस्य ब्रह्मत्वं तावत् प्रतिपादितं किल। तदत्यन्ताग्राह्यम्। कथम्? तस्य जन्यत्वदर्शनात् [14]सावयवत्वात्। तथाहि यजुरारण्यके —

'नदीव प्रभवात्काचित्। अक्षय्यात्स्यन्दते यथा। तान्नद्योभिसमायन्ति। सोरुस्सती न निवर्तते। एवं नाना समुत्थानाः कालास्संवत्सरꣳ श्रिताः। अणुशश्च महशश्च' [तै. आ. १-२] इति। अक्षय्यादविनाशिस्थानात् काचित् नदीव प्रवहति। तां तदन्या अल्पनद्योऽधिकनद्यश्च समायान्ति। सा ताभिः गुरुरूपा अधिकरूपा च सती न निवर्तते। एवमेव नानासमुत्थानाः कालाः अणुशो महशश्च संवत्सरादणवोऽयनादयः महशश्च युगादयः ते सर्वेऽपि संवत्सरं कालमाश्रिताः। स तु संवत्सरः कालः केनापि न निवार्य इत्यर्थः। श्रुत्यन्तरे "संवत्सरोऽजायत" इति। एवं जन्यस्य कालस्य कथं ब्रह्मत्वं युज्यते। (वैशेषिकास्तु) [कापिलास्तु] कालमनवेक्ष्य अन्यान्येव पञ्चविंशतितत्त्वानि विविच्येदमब्रुवन्—'नानाविधशक्तिमयी सा जनयति कालतत्त्वम् [हि]', एवमेव 'आविर्भवद्भूतचयं कलयति, जगदेव कालोऽत' इति। अतः कालतत्त्वस्य जन्यत्वात् ब्रह्मत्वमयुक्तम्, इति सिद्धान्तः। गोलान्तस्था पृथिवी नित्यमधःपततीत्युक्ते तत्रापि न मानम्। भूमेरधःपतनहेतुप्रमाणाभात्। 'मध्ये समन्तादण्डस्य

1. म2. परत्वापरत्वोन्ना०
2. रा. ०नात् परकाल०
3. क, म2, रा. ०वं तत्तुरीयांशो लघुमार्गस्तुरीयंत्रे मण्डलचतुर्भाग इत्यर्थः। तस्मिन् यंत्रोपरि किल द्वयं सन्धिं कृत्वा तन्मध्यदृष्ट्या रविज्ञानेन कालज्ञानं जायते। अत्र तु यन्त्रे त्रिंशज्जीवकल्पना कर्तव्या। ताभ्यो नवत्यंशकल्पना तदधः पञ्चघटिकादिकल्पना च। एतद्वित् सर्वविद्भवति। सम्यगुपपादितमिति पूर्व०
4. रा. साम्यसावयवजन्यत्वदर्शनात्।

भूगोलो व्योम्नि तिष्ठति' इति सूर्यसिद्धान्तवचनाच्च। किञ्च, भूमिष्ठपुरुषेण गगनमत्युत्क्षिप्तं पाषाणादिवस्तु भूम्युपर्येव क्षिप्रं निपतति। तद्दृष्ट्वापि किमुच्चरितं भवता मन्दधिया। तस्माद्भूम्यधःपतनं निरालम्बमासीत्। अतः स्थिरस्य भूमिपिण्डस्यान्तर्गतयाम्योत्तरं किल सुमेरु। [तस्य]शृङ्गत्रयं वर्तते। तत्र पश्चिमदिक्स्थशृङ्गे रुद्रपट्टणं, मध्ये ब्रह्मपुरं, प्राक्छिखरे विष्णुपुरं च वर्तते। तदधस्ताच्चाष्टदिक्पालपत्तनानि क्रमात् सन्ति। मेरोः परितः विष्कम्भशैलाः मन्दरसुगन्धविपुलसुपार्श्वाख्याः। तच्छिखरेषु कदंबजंबूप्लक्षपिप्पलाख्याः तरवश्च वर्तन्ते। जंबूवृक्षपक्कफलानां रसेन रसनदी जंबुनदीति प्रसिद्धा। तद्वशादेवेदं जम्बूद्वीपमिति प्रसिद्धम्। भूम्यर्धमुदकस्थं नवखण्डवर्षाख्यम्। अर्धम[1]न्यत् सप्तसमुद्रैः षड्द्वीपैरन्वितमिति ज्योतिःशास्त्रप्रसिद्धम्। भूमध्ये तु लङ्कापत्तनं, तत्प्राक् तुर्यां[2]शान्तरेण यवकोटिपत्तनम्, तत्प्रत्यक्सीमान्तरे रोमकपत्तनम्, तदधस्तदूर्ध्वसीमान्तरे सिद्धपुरम्, एवं पत्तनचतुष्टयस्य उदयमध्यान्हास्तमयार्धरात्रकालान् पञ्चदशघटिकान्तरेण पूरयति भानुः। एवं सति यदा लङ्कायामुदयः, तदा सिद्धपुरस्यास्तमयः; यवकोट्यां मध्याह्नम्, रोमकस्यार्धरात्रम्। उक्तं च सिद्धान्ते—

उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे।
मध्याह्नो यवकोट्यां रोमकविषयेऽर्धरात्रश्च॥ इति।

तच्चतुःपत्तनोपर्येव कालचक्रं सप्तविंशतिनक्षत्रात्मकम्, तदन्तस्थ(लनीच)ग्रहकक्षाश्रितं प्रवाहानिलजवात् भ्रमणशीलं ब्रह्मणा किल सृष्ट्यादौ सृष्टम्, तल्लङ्कायां समम्। तदन्यविषये कालचक्रादि दिग्विदिङ्मण्डलसंपर्कवशात् स्वस्तिकचतुष्टयमुत्पद्यते। लङ्काख्यात् स्वस्तिकात् स्वस्वस्वस्तिकपर्यन्तं अक्षांशाः प्राप्ताः। अथ स्वस्तिका — तदग्रात् स्वखण्डस्वस्वस्तिकाद्याम्ये एतन्नितान्ते निबद्धं वृत्तं क्रान्तिमण्डलम्। सूर्यः तत्र किल राशीननुभवति। लङ्कात उदक्

---

1. रा. ०मन्यद्याम्यं समुद्रे षड्विधं रचितमिति ज्योतिःशास्त्रे प्रसिद्धम्।
2. म2. रा. ०शान्तरे यव०



(प्राक्) याम्ये च त्रीणि त्रीणि अहोरा[1]त्रवृत्तानि कलयति। उदगर्केषु मेषादिषट्कमनुभवति क्रमोत्क्रममार्गमाश्रित्य। तदर्धान्मिथुनान्ते याम्यायनारम्भः सिद्ध एव। याम्ये धनुरन्ते उदङ्मार्गानुकूलवृत्ते उदगयनं प्रसिद्धमिति संप्रदायः। तेषां चक्रवशात् प्रत्यग्गतिरेवेत्युक्तं, तदनर्हम्, ग्रहाणां प्राग्गतेः प्रत्यक्षदृष्टत्वात्। तथा हि — अश्विनीनक्षत्रे खमध्यङ्गते तदपेक्षया भरणी किल प्रागेव वर्तते, तत्प्राक् कृत्तिकादि। तथैवाश्विनीस्थग्रहो भरणीमेवयाति तत्रस्थः कृत्तिकामित्यादि प्राग्गतिः प्रत्यक्षदृष्टा; तस्मात् ग्रहाणां प्राग्गतिः, चक्रस्य प्रत्यग्गतिः इति। आदौ भगवता सृष्टे चक्रे अश्विन्यादि घटिकायां भानुवासरे प्रतिपदि चैत्रमासे शुक्लपक्षे प्रभवसंवत्सरे कुपिण्डोपरि वायुद्वयोपरि वर्तमाने प्रवहवायौ चन्द्रबुधशुक्ररविकुजगुरुशनयो निवेशिताः। स्वस्वोपरिकक्षास्थाः चक्रान्तर्वर्तिनोऽपि चक्रान्तस्था इव भान्ति, तद्वशादेव प्रागुदयः, पश्चादस्तमयश्च। तेषां ऋक्षानुभवः कथमित्युक्ते कालचक्रस्थप्रतिपदन्तसूत्राणि चन्द्रकक्षानिर्गतानि किल प्रतिग्रहकक्षाग्रहणमाचरन्ति। तद्वशात् घटीमयस्वस्वकक्षासु प्राक्तनगत्या कुलालचक्रविपरीतगतिः कीट इव प्रतिदिनं[2] पादोनभूधृतिभूमितः योजनप्रमाणमार्गश्चरतां स्वस्वकक्षामागतानां बृहल्लघु[3]लिप्तानुभवोगतिरिति सम्यगुपपद्यते। सा सर्वेषां समाप्तिर्भिन्नेव प्रतिफलति[4], लिङ्गलिङ्गालयकृत प्रदक्षिणपुरुषगतिरिव, एवं चन्द्रशन्योर्योजनीयम्। उक्तञ्च सिद्धान्ते —

मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः।
परिभ्रमन्त्यधोधःस्थाः सिद्धा विद्याधरा घनाः॥ इति।

खचक्राःसर्वा अपि दिविषदां [5]चक्रलिप्ताङ्किताश्ता
वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः।

---

1. म2. ०त्राणि वृत्तानि कल्प्यानि।
2 म2. रा. ०नं पादोनभोश्चधृतिः भू०  3. रा. ०घुलुप्तानुभवोगति०
4. रा. ०ति अङ्गलिङ्गालयकृत०
5. रा. चक्रादीप्ताङ्कितां तावदुलङ्घयोल्लघ्वानि महान्त्यस्तन्महत्यीश्च लिप्ताः। स्वस्मा०

तस्मादेते शशिशशिजसितादित्यभौमेज्यमन्दा
मन्दाक्रान्ता इव शशिधराद्भान्ति यान्तः क्रमेण ॥

ग्रहगतिरपि षोढा — पूर्वापरा, उदग्याम्या, ऊर्ध्वाधरा चेति । [1]कश्चिद्विशेषोऽत्रावगन्तव्यः । सूर्यः किल कालजनकः, तद्वशात् सृष्ट्यादिकाला जाताः; शश्वत् प्राग्दिशश्चरतोः सूर्यचन्द्रयोर्दर्शान्ते सङ्गमस्सम्भवति । तस्मात् शीघ्रगत्या पुरोगते चन्द्रे भानौ पृष्ठस्थे द्वादशांशमितं यदा भवति तावत् प्रतिपदुत्पद्यते । चतुर्विंशत्यंशान्तरे द्वितीया इत्याद्युत्पत्तिरिति । एवमन्यासां तिथीनां ज्ञातव्यम् । तयोर्योगाद्योगसिद्धिः । [तिथ्यर्धं] करणम् एवं पञ्चाङ्गोपपत्तिः । ग्रहादि चलनादेव लोकान्धकारनिवृत्त्यर्थं (भगवति) केचित् शिंशुमारे ग्रहस्थानं वदन्ति । तदनर्हमिति भवदुक्तम्; तदेव ग्राह्यं भवति । कुतः ? पुराणप्रमाणस्य विद्यमानत्वात् । सर्वज्ञैः व्यासैः किमन्यथा प्रतिपादितम् ? । शिंशुमारः किल उदक्स्थितमध्यकीलं वदनेन गृहीत्वा निजाङ्गेन ब्रह्माण्डमाक्रम्य कालचक्रं स्वपृष्ठाधारेण भ्रामयन् तदन्यमुखेन याम्यध्रुवकीलं गृह्णाति । मुखाभ्यामष्टाक्षरतेजोरूपेणोन्मिषन् तद्बलादधःप्रवेशाधारं महाकूर्मरूपेण धृत्वा वर्तत इति । कालभयेन ग्रहा भ्रमन्तीत्युक्तम्, न तथा वक्तव्यम्, श्रुतिविरोधात् । तथा हि —

"भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च, मृत्युर्धावति पञ्चम इति" [तै. उ. २-७] इत्युपक्रम्य जगदुपादा नकारण विवक्षितम्, 'स एको ब्रह्मण आनन्दः' [तै. उ. २-८] इत्यन्तेन ग्रन्थेन । अतः 'अस्मात्' ब्रह्मण एव, 'भीषा' भयेन, 'वातः पवते', 'भीषा' एव सूर्योऽभ्युदेति । 'अग्निः' सर्वलोकेषु बहिरन्तर्व्यापकत्वेन वर्तते । 'इन्द्रः' त्रिलोकाधिपत्यं करोति । मृत्युरपि सर्वप्राणिहिंसाव्याजेन 'धावति' इति । तस्मात् क्षपणक ! कालो ब्रह्मेति मूढबुद्धिं परित्यज्य शुद्धाद्वैतवृत्तिमाश्रय, तया

1. रा. श्चन्द्रविशे०



जाग्रदाद्यवस्थात्रितयातीतमनोन्मनीं गुरुमुखाज्ज्ञात्वा मुक्तो भविष्यसीति नियमितो क्षपणकः परमगुरुं नत्वा शुद्धाद्वैतविद्याश्रितोऽभवत् ॥

॥ इत्यनन्तानन्दगिरिकृतौ क्षपणकमतनिबर्हणं नाम प्रकरणं षट्चत्वारिंशम् ॥

॥ ४७ ॥

## ॥ पितृमतनिबर्हणम् ॥

ततः पितृपासकाः सत्यशर्मकृत[1]वर्मादयः समागत्य परमगुरुं नत्वेदमूचुः— स्वामिन् । अस्मन्मतं सावधानेन शृणु । [2]पितुपासनमेव नियतं[3] कर्तव्यम् । ते पितरः प्राचीनाः अग्निष्वात्तादयः चन्द्रमण्डलोपरि स्वर्गे नित्यमुक्ताः सन्तो वसन्ति । विचार्यमाणे ते सप्त । तेषां मध्ये अमूर्तास्त्रयः, मूर्ताः चत्वारः । तदुपासनमत्यन्तफलदम् । तदन्येषामपि तदाधारत्वेन तत्तृप्तिद्वारा (तेषामपि)[4] तृप्तिदर्शनात्, [5]प्रतिवर्षमखिलपितृदिनेषु षण्णवत्यादिषु तदुपासनमेवास्माभिरादरात् कृतम् । 'श्राद्धकृत सत्यवादी च गृहस्थोऽपि विमुच्यते' इति मोक्षहेतुत्व[स्मरणा]च्च । पितृमानेन चान्द्रमासस्य दिनरूपत्वात् मध्याह्नममावास्या भवति । अर्धादर्धरात्रं पूर्णिमा । शुक्लपक्षाष्टम्यां अस्तमयः; कृष्णपक्षार्धे सूर्योदयश्च । तस्मात् सर्वेऽपि गृहस्थाः श्राद्धकर्म अमायां कुर्वन्त्येव । [6]तत्तृप्तिद्वारा तेषां मुक्तिरिति, सुस्थमेतैरेव मुक्तिः [इति] ।

1. म2 ०त्तशर्मा०    2. क. पितृयजनमेव
3. म2 ०तं कृतम् ।    4. म2 ०पितृप्तिः । प्रति०
5. 'प्रतिवर्षं' इत्यत आरभ्य 'एह्यग्न इह होता' इति पर्यन्तोऽयं भागः नास्ति म2 मातृकायाम्
6. क. त-तृप्ते तेषां

परमगुरुः पठति — भो! सत्यशर्मकृतवर्मादयः शृणुध्वम्। भवन्मतमनर्हम्। कुतः? प्रमाणाभावात्। श्राद्धकर्म कुर्वीतेति वचनमेव प्रमाणमिति यद्युच्येत तर्हि तेन कर्मणा मुक्तिरिति कथमुक्तम् 'न कर्मणा' [म. ना. ८-१४] इति निषेधदर्शनात्। किं 'ब्रह्मविदाप्नोति परम् [तै. उ. २-१-१] इत्यादिवाक्यानि भवद्भिर्नाधीतानि। किं पितृकर्मणि अभिश्रवणसूक्तं न वर्तते। 'नासदासीत्' [ऋ.सं.८-७-१७-१] इत्यादि। तदेव विचारयध्वम्। कर्माङ्गसूक्तेनैव कर्मनिवृत्तिर्भवति; पितृसूक्तानां ब्रह्मपरत्वात्। अतः ये कर्मविहितामन्त्राः वर्तन्ते, तेषां त्रिविधरूपता कल्पनीया। विध्यर्थवादमन्त्रभेदात्। 'अहरहस्सन्ध्यामुपासीत,' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'न कलञ्जम्भक्षयेत्' 'न परदारान् गच्छेत्' इत्यादिवाक्यानि विधिपराणि एतदवश्यं कर्तव्यमेतदर्तव्यमिति बोधकरूपाणि। केचिदर्थवादा वर्तन्ते—

हरिश्चन्द्रो ह वैधसः ऐक्ष्वाको राजाऽपुत्र आस' [ऐ. ब्रा. ३३-१]

'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे, तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुः, तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव,'' [बृ.उ. ३-१-१] "भृगुर्वै वारुणिः, वरुणं पितरमुपससार, अधीहि भगवो ब्रह्मेति' [तै. उ. ३-१-१] इत्यादि। अत्रेदं (चिन्त्यते) [चिन्तितम्]। एतदर्थवादरूपाख्यनानि अनादर्तव्यानि। प्रयोजनाभावात्। विधिमन्त्राभ्यामेव सर्वप्रयोजनसिद्धिः; अत आह अधिकरणरत्नमालायाम्—

पारिप्लवार्थमाख्यानं किं वा विद्यास्तुतिःस्तुतेः।
ज्यायोऽनुष्टानशेषत्वं तेन पारिप्लवार्थताः॥ [३-४-४-२३]

अस्यार्थस्तु—

अध्वरे महावेद्यां रात्रिषु राजानं सकूटमुपनिविश्य तदग्रत एव वैदिकान्युपाख्यानानि अध्वर्युणा पठितव्यानि। तदिदमाख्यानं कर्म पारिप्लवमित्याचक्षते। न तु विद्यास्तुतिमात्रमाख्यानम्। प्रातःसायङ्कालयोरुचितहविर्होमानन्तरकालपूरणं किलाख्यानेन भविष्यतीति कृत्वा अनुष्ठानशेषत्वं ज्यायः श्रेष्ठं भवतीत्यर्थः। अतोऽनुष्ठानोपयोगित्वेनार्थवादाः ग्राह्या भवन्ति। मन्त्रास्तु गायत्र्यादयः—



'तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्'॥ [तै. आ. १०-१],
'नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्'॥ [तै. आ. १०-१],

'एह्यग्न इह होता निषीद अदब्धः सु पुर एता भवा नः।
अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसाय देवान्'॥
[ऋ. सं. १-७६-२]

इत्यादयः। यस्मिन् कर्मणि यो मन्त्रो विधिदर्शितः स तस्मिन्नेव सदाऽङ्गीकर्तव्य इत्यर्थे पर्यवसिते आर्यैः अखण्डं निर्गुणं नित्यशुद्धबुद्धमुक्तस्वरूपं सर्वमन्त्रावाच्यमुन्नेयम्। श्रवणादीनां कर्मणां गहनत्वाद्वेदानां सगुणत्वाच्च। उक्तञ्च भगवद्गीतासु—

'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' [भ. गी. २-४५] इति। अतो मुमुक्षुणा निस्त्रैगुण्येन भवितव्यम्। तस्माद्भवन्तोऽपि पवित्रादिधारणेन पितृकर्मप्रपञ्चवृत्तिं गताऽनेकजन्मार्जितां परित्यज्य सद्गुरुमुखोन्मिषन्महावाक्यश्रवणादिना मुक्ता भवत, 'नान्यः पन्था विद्यतेऽयनाय' [श्वे. उ. ३-८; ६-१५] इति निषेधदर्शनादित्युपदिष्टास्ते परमगुरुं नत्वा तदुपदेशबलात् कृतार्था अभवन्॥

॥ इत्यनन्तानन्तगिरिकृतौ पितृमतनिबर्हणं नाम सप्तचत्वारिंशं प्रकरणम्॥

## ॥ ४८ ॥

## ॥ शेषगरुडमतनिबर्हणम् ॥

ततः शेषोपासकाः गरुडोपासकाश्च शङ्ख[1]पादकुब्जलीढादयः समागत्य स्वामिनमिदमूचुः—भो गुरो! [अस्]मदीयं मतद्वयमतिविचित्रं शृणु । शेषः किल भूभर्ता; भगवतो नारायणस्य तल्परूपेणान्तरङ्गभक्तः किल । तस्मात् तदाकारितफणाधारणमात्रेण मुक्ता वयमिति । गरुडः किल सर्वलोककुक्षिप्रदेशं भगवन्तं [2]स्वोपर्यारोप्य सञ्चरतीत्युत्कर्षेण तदुपासकाश्च नित्यमुक्ताः वयं भगवद्भक्ताग्रगण्या इति । प्राप्ते चैवं पूर्वपक्षे परमगुरुः पठति—भोः शङ्खपाद! कुब्जलीढ! भवदविवेकः किमु वक्तव्यः । नारायणस्य तल्पवाहनोपासनेन मुक्तिरित्युक्तम्; तदत्यन्तदुर्ग्राह्यम् । तर्हि नारायणोपासनमेव कुरुतम्; तस्य सर्वात्मकत्वात् [3]ब्रह्मांशत्वाच्च । परंपरया चित्तशुद्ध्यनन्तरं परमगुरूपदिष्टमार्गेण मुक्ता भवतम् इत्येवमुक्तौ तौ श्रीमदाचार्यं नत्वा शुद्धाद्वैतविद्याश्रि[4]तौ शिष्यौ बभूवतुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ शेषगरुडमतनिबर्हणं नाम प्रकरणं अष्टचत्वारिंशम् ॥

## ॥ ४९ ॥

## ॥ सिद्धमतनिबर्हणम् ॥

ततः सिद्धोपासकाः [5]चिरकीर्ति[6]नित्यानन्दपरार्जुनादयः समागत्य स्वामिनमिदमूचुः—भो स्वामिन्! अस्मदीयमतमतीव विचित्रतरं किल; अस्मदुपास्यानां सिद्धानां विचित्रत्वात् । अतः [7]सिद्धोपदेशपरिलब्धसकलमन्त्र-

1. म$_2$, रा. ङ्खपालकु०    2. क. स्वोपर्यारुह्य
3. रा. ब्रह्माण्डत्वाच्च    4. म$_2$. ०तौ बभू०
5. म$_2$. ‘ चिरकीर्ति ’ रिति अतः आरभ्य ‘ सिद्धोपदेश ’ इति पर्यन्तो भागः नास्ति ।
6. क. जनितानन्दप०    7. म$_2$, चिरकालपरिलब्धसकलमन्त्रबुद्ध्या वयं कृतार्थाः ।



सिद्ध्या वयं कृतार्थाः [1]नित्यमुक्ताश्च । तस्माद्भवन्तोऽपि सिद्धमतावलम्बिनो भवत । श्रीशैलादिभगवदाविर्भावस्थलेषु मन्त्रौषधविशेषान् प्राप्य [2]सत्यनाथादिसिद्धाः कृतार्थाश्चिरञ्जीविनश्च बभूवुः । तदुपदेशेन तथाविधाः वयम् । अस्माभिः सर्वप्रपञ्चो विदितः किल । तत्कथमित्युक्ते — निधिनिक्षेपाञ्जनदर्शनाकर्षणोच्चाटनमारण-मोहन-स्तम्भनवश्यादि (जलाग्न्याकाशगमन) विद्याविशेषैः, अत्याहारानाहार-पृथिवीजय-सलिलजय-वन्हिजय-वायुजय-शब्दजयादि-विद्याविशेषैः [3]विषपानपारदपानतैलपानप्रभृतिभिश्च, अपमृत्य्वकालमृत्युहरप्रवृत्तिभिर्योगविशेषैः, अकालवर्ष-अकालाशनिपात-वृश्चिकवर्ष-सर्पवन्हिवर्षशिलावर्ष-दारुवर्ष-नक्षत्रवर्ष-ग्रहवर्ष प्रभृतिभिः क्रियाविशेषैः, सलिलवर्ष-क्षीरवर्ष-दधिवर्ष-मध्वाज्यवर्ष-सुरावर्ष-अमृतवर्ष कनकवर्षप्रभृतिभिः शक्तिविशेषैः, कुसुमवर्षान्नवर्षधान्यवर्षादिभिः यक्षिणी-[विद्या] विशेषैः, जनवर्ष-पशुवर्ष-युवतिवर्षप्रभृतिभिः मोहिनी [विद्या] विशेषैः, भूम्युत्क्षेपण-सलिलोत्क्षेपण-वन्ह्युत्क्षेपण-वायूत्क्षेपण-तरूत्क्षेपणरिपूत्क्षेपणाद्युद्देश्यकविद्यारूपमन्त्रविशेषैः, गृहदाह-ग्रामदाह-पुरदाहारण्यदाहादिविद्यामन्त्रविशेषैः, स्त्रीपुरुषाकृतिकरण-शत्रुजय-सेनाजय-स्त्रीजयादिकक्ष्यपुटीविद्याप्रभेदैः, अयः-करणताम्रकरणरजतकरणहेमकरणादिधातुविद्याप्रभेदैः, दृष्टिबन्धनसिंहशरभव्याघ्रादिदुष्टमृगबन्धनादिभिः इन्द्रजालमहेन्द्रजालादिमन्त्रमूलिकाकज्जलविशेषैः, एतदाद्यनेकविशेषैः वयं सर्वज्ञा [4]एव । तस्मादनन्यभेद्यमस्मन्मतमिति प्राप्ते भगवानाचार्यः पठति—

भो चिरकीर्तिनित्यानन्दपरार्जुनादयः शृणुध्वम् । अनित्यफलेप्सुभिर्भवद्भिः संभाषणमपि नार्हम् । किं विचित्रवर्षैः प्रयोजनं विद्यते । निधिनिक्षेपाद्यञ्जनादिभिः परद्रव्यापहरणदोषप्राप्तिमात्रमेव फलम् । चिरजीवित्वादिः न मुक्त्युपायस्सम्भवति । देहस्य दुःखालयत्वात् तत्परित्यागेन ब्रह्मप्राप्त्युपायः बुद्धिमद्भिः

1. म$_2$. ‘ नित्यामुक्ताश्च ’ इत्यत आरभ्य ‘ सत्यनाथादिसिद्धाः कृतार्थाः ’ इति पर्यन्तोऽयं भागः नास्ति ।    2. रा. नित्यनाथादि
3. म$_2$. रसपानपा० ;    क. विशेषेण पार०    4. क. एव अध्यास्महे । तस्माद्०

संपादनीयः। तस्य गुर्वधीनत्वात्तन्मुखपद्मविगलिताद्वयामृतपानपरायणाः नित्यमुक्ताः सुखिनो भवन्ति। तदन्ये पुनः दुःखालयमशाश्वतं संसारं नित्यं यान्ति। चिरजीविनां सुखमिति यद्युच्येत, तर्हि युगान्तरे मन्वन्तरे वा सर्वलोकजरामृत्युकाले विलयोऽस्त्येव; तत्रापि पुनर्दुःखप्राप्तिरेव स्यात्। तस्मान्मुक्तानां यत्सुखं नित्यानन्दरूपं वर्तते न तदन्येषाम्, तल्लेशाभावात्। मुक्त्युपाय एव सुखेप्सुभिरनुदिनं चिन्तनीय इत्युक्ताः ते परमगुरुमाचार्यस्वामिनं नत्वा तदुपदेशबला[1]न्मनोन्मन्यां मनोलयं कृत्वा दिव्यतेजः[2]कूटस्थरूपब्रह्मानुसन्धानं कुर्वन्तः शिष्य[3]वरा बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ सिद्धमतनिबर्हणं नाम
प्रकरणं एकोनपञ्चाशम्॥

॥ ५० ॥

॥ गन्धर्वमतनिबर्हणम्॥

ततः परं गानशीलाः विश्वावसुनामकगन्ध(र्वकन्यादि) [र्वा]धिपत्युपासकाः पद्मोक्तिमिथिलाङ्ग[4]गरुडगूढधरनागादयः परमगुरुं नत्वेदमूचुः—स्वामिन्! वयं किल कृतार्थाः अस्मदीयं [5]मतमखिलानन्ददम्, विश्वावसूपासनेन विदितगानकरणनादोपासनपरिलब्धवर्णातीत[6]बिन्दुकलाः तद्ध्यानसंभूतकलानुभव एव ब्रह्मानुभव इति कृत्वा नित्यमुक्ता एव। तस्माद्भवन्तोऽपि मुक्त्यभिलाषिणः सदा गन्धर्वविद्यापरिश्रमं कुरुध्वमिति प्राप्ते भगवान् पठति—ननु नादज्ञानेन ब्रह्मावाप्ति-

1. म2. ०न्मनोलयं कृत्वा
2. क. कूटरूपब्र. रा. कूटब्रह्मा०　　3. क. रा. ०लश ब०.
4. म2. ०ङ्गगुंडगानादयः पर०　क. ०ङ्गगरुडगानादय०
5. म2. मतं सर्वप्राणिनामानन्दकरम्, विश्वा०; रा. मतमखिलप्राण्यानन्ददम्।
6. म2., रा, बिन्दुप्रभावा:



रित्युक्तं, तदयुक्तम्। श्रुतिविरोधात्, ब्रह्मणः शब्दाद्यतीतत्वात्, बिन्दुकलयोरपि सगुणत्वात्। 'नादबिन्दुकलातीतं यस्तं वेद स वेदवित्' इति स्मृतेः।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते॥
[क. उ. ३-१५]

इति कठश्रुतेः॥

तस्मान्नादबिन्दुकलाती(तं)[त]परमाद्व(यं)[य]नित्यशुद्धबुद्धमुक्तस्वरु(पं)[प] शुद्धब्रह्मोपासनं निजैक्यकरणदक्षं सदा भजध्वम्। तद्द्वारेण मुक्ता भवत इत्युपदेशमङ्गीकृत्य शिष्यास्ते बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ गन्धर्वमतनिबर्हणं नाम
प्रकरणं पञ्चाशम्॥

॥ ५१ ॥

॥ भूतवेतालमतनिबर्हणम्॥

ततः केचित् चितिभस्मव्याप्तसर्वाङ्गाः शल्यविशेषभूषितमणिबद्धगलाः भूतराडुपासकाः[1] कज्जलादिधारिणो वेतालोपासकाश्च (स्वामिनं) परमगुरुं नत्वेदमूचुः—स्वामिन्! अस्मन् मतं शृणु, भूत[2] राजाः [3]सर्वलोकाध्यक्षा इव तालप्रमाणदेहिनो वर्तन्ते। [4]गणकर्ता वेतालः, उपासकानां प्रत्यक्षं तदुपासनेन शत्रुजयादिफलमस्तीति च तदुपासकानामस्माकं सर्वलोकवशंकरं रूपं फलमस्तीति च प्राप्ते भगवद्भिरेवमुक्तम्—भो वेतालोपासकाः। भवन्मतमनर्हमेव भवति। ब्राह्मणानां

1. क. काः स्वामिनं नत्वा
2. म2. ०तराजेन सर्वलोकाध्यक्षा इव ताल०
3. म2. सप्तलोका इव　　4. क. पुस्तकस्थपाठोऽयम्।

नित्यकर्मादि परित्यज्य भूतादेरुपासनानर्हत्वात् । अवेदमूलत्वाच्च तदुपासनमनर्हमेव ।

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति वचनाच्च ब्राह्मकर्मप्रतिबन्धकभूतार्चनं ब्राह्मणानामयुक्तम् । तदन्येषां रागद्वेषादिरज्जुबद्धानां अन्योन्यहानिमभीप्सूनां तद्विद्यावैशद्यप्राप्त्यासक्तिरिति सिद्धान्तः । यूयं ब्रह्मकुलजाताः एवमयुक्ताचारं परित्यज्य शुद्धाद्वैतविद्याश्रिताः वर्णोचितकर्मशीला भवत । स्वकर्मभ्रष्टानां नास्ति गतिः इहामुत्र फलदेति श्रीगोविन्दभगवत्पूज्यपादशिष्यैः अभिहितमस्माभिरित्युक्ताः क्रोधचण्डविद्वेषरागादयः स्वामिनं नत्वा तदुपदेशविदिततत्तत्कर्मशीलाः शुद्धाद्वैतविद्यानिरताः पञ्चपूजापरायणाः शिष्याः बभूवुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ भूतवेतालमतनिबर्हणं नाम प्रकरणमेकपञ्चाशम् ॥

## ॥ ५२ ॥

## ॥ व्यासदर्शनम् ॥

एवमशेषमतनिबर्हणं कृत्वा दिनमणौ दिनमध्यंगते मणिकर्णिकातीरे निदिध्यासनलालसे परमगुरौ भगवान् व्यासः किल स्थविरब्राह्मण इव समागत्य षट्सहस्रशिष्यसमेतं प्रमथावृतमीशमिव देवावृतमिन्द्रमिव ऋष्यावृतं ब्रह्माणमिव दृष्ट्वा कोऽयमित्याक्षिपत् । शिष्यास्तं मायावेषधारिणमिदमूचुः—

शृणु, वृद्ध ! परानन्दगुरुश्शङ्करनामकः ।
सेतुप्रभृतिदेशेषु मतध्वंसनमाचरन् ॥



भाष्यं कृत्वा ब्रह्मसूत्रतात्पर्यार्थविनिर्णयम् ।
अद्वैतार्थावबोधेन शिष्यान् कृत्वा विवेकिनः ।
जयत्येव हि गङ्गायास्तीराविर्भूतरूद्रवत् ॥

एवमुक्तः स्थविरोऽपि शिष्यसङ्घमतीत्य कम्पत्पलितशिराः शङ्कराचार्यमिदमाह—यते ! भवताऽधिकृतः किमु ब्रह्मसूत्रपरिश्रमः । परमगुरुः आचार्यस्तं समीक्ष्य इदमवादीत्—भो विप्र ! कुत्र भवतः प्रवेशः तत्रैव वच्मीति । वृद्धः पुनराह—

'तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्' [ब्र. सू. ३-१-१] इति सूत्रस्य को वाऽर्थो भवताऽधिगतः पुनर्जगाद परमगुरुः—भूतसूक्ष्मैः सम्परिष्वक्त एव 'तदन्तरप्रतिपत्तौ' देहान्तरप्रतिपत्तौ 'रंहति' गच्छति, जीवो लिङ्गशरीरबद्धः परलोकम् ।

वृद्धोऽप्येवमाह—भूतानां सर्वदेशसमत्वात् कर्मानुकूलगात्रग्रहणं तत्रैव करोतु, यत्र देह आरब्धव्य इति । पुनः परमगुरुराह—वृद्ध मूढतर ! तत्त्वमविदितं भवता । शृणु । तथा हि—देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो रंहति गच्छतीत्यवगन्तव्यम् । कुतः ? प्रश्ननिरूपणाभ्यम् । तथा हि प्रश्नः—'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' [छा. उ. ५-३-३] इति । निरूपणं च प्रतिवचनम्—

द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्टयन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' [छा. उ. ५-३-९] इति । तस्मादद्भिः परिवेष्टितो जीवो व्रजतीति गम्यते ।

भो यते ! अन्या श्रुतिःजलूकावत् पूर्वदेहं न मुञ्चति, यावद्देहान्तरं नाक्रामतीति [दर्शयति] ।

भो वृद्ध ! तत्राप्यप्परिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं जलूकया उपमीयत इति ।

पुनर्वृद्धः इदमाह—व्यापिनां करणानां आत्मनश्च देहान्तरप्रतिपत्तौ कर्मवशात् वृत्तिलाभस्तत्र भवति। इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थाने उत्पद्यन्ते। मन एव वा केवलं भोगस्थानं अभिप्रतिष्ठते। जीव एव वा उत्प्लुत्य देहात् देहान्तरं प्रतिपद्यते, शुकैव वृक्षात् वृक्षान्तरं इति।

यतिः पठति—भवन्मतमनर्हम्। श्रुतिविरोधात्।

उदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहतीति प्राप्नोति। अप्शब्दश्रवणसामर्थ्यात्। तत्र कथं सामान्येन प्रतिज्ञायते सर्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीति यद्युच्येत, तत्रेदमुत्तरं सूत्रमेव "त्र्यात्मकत्वात्तुभूयस्त्वात्" [ब्र. सू. ३-१-२] इति। तु-शब्देन चोदितामाशङ्कामुच्छिनत्ति। त्र्यात्मिका ह्यापः। त्रिवृत्करणश्रुतेः। तास्वारंभिकास्वभ्युपगतासु इतरदपि भूतद्वयमवश्यमभ्युपगन्तव्यं भवतीति। त्र्यात्मकश्च देहः। त्रयाणां तेजोऽबन्नानां तस्मिन् कार्योपलब्धेः। पुनश्च त्र्यात्मकः त्रिधातुत्वात्, त्रिभिर्वातपित्तश्लेष्मभिः। न स भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्मात् भूयस्त्वापेक्षोऽयं 'आपः पुरुषवचसः' इति प्रश्नप्रतिवचनयोरप्शब्दः, न कैवल्यापेक्षः। सर्वदेहेषु हि रसलोहितादिद्रवद्रव्यभूयस्त्वं दृश्यते।

पार्थिवो धातुर्भूयिष्ठो देहेषु उपलक्ष्यत इति यद्युच्येत, नैष दोषः। इतरापेक्षयाप्यपां बाहुल्यं भविष्यति। दृश्यते च शुक्रशोणितलक्षणेऽपि देहबीजे द्रवबाहुल्यम्। कर्म च निमित्तकारणं देहान्तरारम्भे। कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि। कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येऽग्नौ हूयन्ते इति वक्ष्यति। तस्मादप्यपां बाहुल्यप्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्। 'प्राणगतेश्च' [ब्र. सू. ३-१-३] । प्राणानाञ्च देहान्तरप्रतिपत्तौ गतिः श्राव्यते। 'तमुत्क्रान्तं प्राणोऽनूत्क्रामति,' [बृ. उ. ४-४-२] 'प्राणमनूत्क्रामन्तं सर्वे प्राणाः अनूत्क्रामन्ति' [बृ. उ. ४-४-२] इत्यादिश्रुतिभिः। सा च



प्राणानां गतिराश्रयमन्तरेण न भवति इत्यतः प्राणगतिप्रयुक्ता तदाश्रयभूतानां अपामपि भूतान्तरोपसृष्टानां गतिरर्थादवगम्यते। न हि निराश्रयाः प्राणाः क्वचित्तिष्ठन्ति गच्छन्ति वा जीवतो दर्शनादित्याग्रहेण जल्पन् वृद्धस्य कपोलताडनमाचकार। परं च पद्मपादं निजशिष्यमिदमाह, "एनं परपक्षश्रेष्ठं वृद्धं अधोमुखं पातयित्वा पादाग्रावलम्बनाद्दूरमुत्सृज" इति[1]। स तु गुरुभिः एवमुक्तोऽपि तूष्णीमास। वृद्धोऽपि यतिवाक्यश्रवणात् स्वयमेवाशु दूरमगमत्। ततः शिष्यः परमगुरुं नत्वेदमाह—

शङ्करः शङ्करस्साक्षात् व्यासो नारायणः स्वयम्।
तयोर्विवादे संप्राप्ते किङ्करः किं करोम्यहम्॥

इत्येवमुक्तः स्वामी इदमाह—

स एष व्यासश्चेदनुपममतिः सागसमपि मां
अवतु अद्वैतार्थानुभवबहिरस्तस्मृतिमतिम्।
यथा भानुः मेध्यादिषु समकरः, सर्वभुगपि
प्रपूज्यो वन्हिश्च प्रहरणजदुःखं त्यजतु सः॥
यद्यद्वैतार्थसिद्धान्तः स्वसूत्रेणोपबृंहितः।
आयातु स्वयमेवाद्य व्यासश्शिष्यजनप्रियः॥
अद्वैतभाष्यकर्तारं पातु मां बादरायणः।
स एव परमार्थश्चेद्भिदा मिथ्या भवेद्यदि॥
व्यासं संयमिनां श्रेष्ठं शरणं यामि सर्वदा।
स एवाद्य प्रसन्नात्मा हरत्वखिलतामसम्॥

शङ्कराचार्यैरेवं स्तुतो व्यासः सर्वसम इव सर्वज्ञ इव समक्षं आविरासीत्। गुरुः स्वामिनस्तस्य द्वादशप्रदक्षिणादि वन्दनानि कृत्वा त्वदंशस्त्वच्छिष्योऽहमिति विज्ञाप्य ब्रह्मसूत्रभाष्यं निजकृतं अवदत्। स तु भाष्यं सम्यगवलोक्य परमगुरुमालिङ्ग्य इदमाह—

1. वितण्डावादिनां अयं पूर्वकालिकः निश्चयः कपोलताडननमस्काराभ्यात्—टि.

सूत्राणां तु परार्थैकतात्पर्यं विदितं त्वया ।
मदाशयस्तु दुर्ज्ञेयो ह्याचार्यस्त्वं जगत्पतिः ॥

शिव इव शिष्यजनौघैरुर्व्यामीश्वर भाष्यमुपदिशन्नाशु ।
भृत्यान् शुद्धाद्वैतविदः कुरु लोकानन्य[1]मार्गगा यथा न स्युः ॥

॥ इत्यनन्तानन्दगिरिकृतौ व्यासदर्शनं नाम प्रकरणं द्विपञ्चाशम् ॥

॥ ५३ ॥

॥ ब्रह्मदेववरप्रदानम् ॥

एवमुक्त्वा तु यास्यामीत्युच्चरन्तं मुनीश्वरम् ।
नत्वेदमाह सर्वज्ञ मदन्तोऽद्य भविष्यति ॥

प्राणोत्क्रमणमीक्ष्याद्य यास्यसि त्वं दयानिधे ।
त्वत्पादसन्निधेर्योगान्मुक्त एवाहमद्वयः ॥

इत्युक्तः शङ्कराचार्यमिदमाह घृणान्वितः ।
कथं [2]प्रवृत्तिर्भाष्यस्य गते त्वयि जगत्यलम् ॥

तस्माद्द्वैतबोधाय स्थिरो भव परात्परे ।
आज्ञप्तोऽप्येवमाचार्यः पुनराह मुनीश्वरम् ॥

षोडशेषु शरत्स्वेव मदायुस्थितिरित्यतः ।
व्यासस्त्वाकर्षयामास ब्रह्माणं सृष्टिकारणम् ॥

ब्रह्माप्यवादीदेवं हि स्वतन्त्रः शङ्करः प्रभुः ॥
दुष्टाचारविनाशाय प्रादुर्भूतो महीतले ।

1. ०मार्गानन्यान् .    2. क. प्रसिद्धं भाष्यं स्यात् गते.



स एव शङ्कराचार्यः साक्षात् कैलासनायकः ॥
यावदिच्छाब्दमुर्व्यां हि स्थित्वा पश्चाद्गमिष्यति ॥

॥ इत्यनन्तानन्दगिरिकृतौ ब्रह्मदेववरप्रदानं नाम त्रिपञ्चाशं प्रकरणम् ॥

॥ ५४ ॥

॥ व्यासदत्तायुःप्रपञ्चनम् ॥

इति ब्रह्मवचः श्रुत्वा व्यासः काशीकृतालयः ।
करेणानीय गङ्गांबु जीव त्वं शरदां शतम् ॥

इत्युक्त्वा प्रोक्षयामास शङ्कराचार्यमुत्तमम् ।
व्यासदत्तायुः उत्कृष्टतेजःपूर्णकलेबरः ॥

बभौ श्रीशङ्कराचार्यो ब्रह्मव्यासयुतस्तदा ।
विष्णुवाणीशसंयुक्तमहादेववदद्भुतम् ॥

स तु नत्वा मुनिश्रेष्ठं ब्रह्माणं परमास्तिकः ।
कृतार्थोऽस्मि भवत्पाददर्शनादित्यभाषत ।

शृण्वाचार्य भिदा मिथ्याप्यद्वैतं पारमार्थिकम् ।
उपदेशं नृणामेवं कुरु यत्नेन सर्वतः ।
इत्युक्त्वान्तर्दधे ब्रह्मा व्यासश्च भगवान् मुनिः ॥

॥ इत्यनन्तानन्दगिरिकृतौ व्यासदत्तायुःप्रपञ्चनं नाम प्रकरणं चतुःपञ्चाशम् ॥

## ॥ ५५ ॥

## ॥ भट्टदर्शनम् ॥

[1]तस्मादुदङ्मार्गमवलम्ब्य योगविद्याप्राप्तवियत्पथसञ्चारः कैलासमधिगम्य पार्वतीसमेतं परमेश्वरं प्रणम्य स्वात्मतयानुसन्धानशीलस्य परमगुरोरग्रतः परमेश्वरः पञ्च स्फाटिकलिङ्गानि प्रकाशयामास। जगदनुग्रहाय अंबिकास्तवसारेण सह तान्यादाय पुनः अवनीतलमासाद्य केदारक्षेत्रे एकं मुक्तिलिङ्गाख्यं[2] प्रतिष्ठाप्य तत्क्षेत्रपूजकान् पूजार्थं नियोजयामास। ततः कुरुक्षेत्रमार्गात् बदरीनारायणदर्शनं कृत्वा तत्र[3] हिमवत्सान्निध्यात् शीतोदकस्नानस्यातिदुःसहत्वात् भगवन्तमिदमुवाच—भो, नारायण! मह्यमुष्णोदकं स्नानार्थं देहीति। स तु नारायणः स्वपीठाधःप्रदेशादुष्ण[4]जलसरितमुत्पादयामास। सर्वे स्नात्वा श्रीशङ्कराचार्यं तुष्टुवुः। तस्मात् द्वारकादिदिव्यस्थलविलोकनवशात् प्रादक्षिण्येन नीलकण्ठक्षेत्रं प्राप्य नीलकण्ठेश्वरं नत्वा तत्र शिष्यैः पूज्यमानः परमगुरुः वरनामकं लिङ्गं प्रतिष्ठाप्य तत्रस्थान् पूजार्थं नियुज्य ततः क्रमादयोध्यामवाप।

---

1. तस्मादुदङ्मार्गमवलम्ब्य अमरलिङ्गं दृष्ट्वा कुरुक्षेत्रमार्गात् बदरीनारायणदर्शनं कृत्वा तत्र हिमवत्सान्निध्यात् शीतोदकस्नानस्य अतिदुस्सहत्वात् भगवन्तमिदमुवाच—भो नारायण! मह्यं स्नानार्थं उष्णोदकं देहीति। स तु नारायणः स्वपीठाधःप्रदेशात् उष्णतीर्थसरितमुत्पादयामास। तस्मात् द्वारकादिदिव्यस्थलविलोकनात् प्रादक्षिण्येन अयोध्यां प्राप्य तस्मात् पुरात् गयायामीशानादि—इति पाठः म$_2$ मातृकायाम्। अत्र आदृतपाठः म$_1$, रा, मैसूर मातृकासु वर्तते : तञ्जावूर मातृकायां प्रथमप्रकरणे 'कैलासगमनं भट्टदर्शनम्' इति निर्दिष्टो वर्तते। भगवत्पादकृतपञ्चलिङ्गाहरणेतिह्यं मार्कण्डेयसंहिता-शिवरहस्यादि-ग्रन्थोपोद्बलितं अनुसृत्य पाठोऽयमादृतः अत्र।
2. रा. ०ख्यं तत्र प्रति०
3. रा. ०त्र. शीतोदकस्ना०
4. म$_2$. ०णतीर्थसरित



तस्मात् पुरात् गयायामीशानादिदर्शनं कृत्वा [1](गङ्गासहस्रनामसकलस्नानमाचरन्) जगन्नाथमार्गात् श्रीशैलपर्वतं प्राप। तत्र महादेवं मल्लिकार्जुननामानं तच्छक्तिमद्वैतार्थरूपिणीं भ्रमराम्बां नत्वा तत्र मासं स्थिते परमगुरौ रुद्राख्यपुरात ब्राह्मणाः समागम्य परमगुरुमिदमूचुः—

स्वामिन्! भट्टाचार्याख्यो द्विजवरः कश्चित् उदग्देशात् समागत्य दुष्टमतावलम्बिनो बौद्धान् जैनान् असङ्ख्यान अनेकविद्याप्रसङ्गप्रभेदैर्निर्जित्य तेषां शीर्षाणि [2]परशुभिः छित्वा बहुषु उलूखलेषु निक्षिप्य कटभ्रमणैश्चूर्णीकृत्य, इत्येवं दुष्टमतध्वंसनमाचरन् निर्भयो[3] वर्तत इति।

> श्रुत्वैतदद्भुतं कर्म गुरुश्शिष्यसमन्वितः।
> प्राप्तो रुद्राख्यनगरं जयशब्दविजृम्भितम् ॥

तत्र दिनदशकात् पूर्वकाले भट्टाचार्यः किल सर्वविपक्षध्वंसं कृत्वा जैनगुरुमुखात् कश्चिद्विद्यालेशोऽधिगत इति गुरुवधप्रायश्चित्तं विचार्याष्टोत्तरशत[4]हस्त लिकाप्रमाणोपत्यकाकरीषोपरि होमाग्निना परितःक्रमादग्धेन वसितव्यमिति निश्चित्य विजनप्रदेशे तथा कारयित्वा तत्र कृतप्रायश्चित्तदीक्षः करीषपर्वताग्रवासी समवर्तत। तदानीं परमगुरुः भट्टाचार्यमीक्ष्येदमाह—

> अज्ञानेन कथं प्राप्ता ह्यवस्था भवता द्विज।
> ईदृशान् मूढ गूढार्थान् न वेत्सि [5]निगमान् यतः ॥
> हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।
> उभौ तौ न विजानीतः नायं हन्ति न हन्यते ॥
> [क. उ. २-१९] इति श्रुतेः।

इत्युक्तो जानुमात्रदग्धोऽपि भट्टाचार्यः परमगुरुमिदमुवाच — "जाग्रत्कालेऽनागतो (नूतनो) बौद्धतरः कस्मादिहागत्य तापयसि"— इति। परम-

---

1. रा. गङ्गासहस्रकलमाचरन्
2. रा. पत्रैभिः छित्वा सूलाङ्कुलेषु निक्षिप्य कटकभ्रम०
3. रा. ०यो भवन्त इति
4. क. कारिकाप्रमा०
5. रा. निगमान्ततः

गुरुराह—नाहं बौद्धः, किन्तु शङ्कराचार्यः शुद्धाद्वैतमार्गदाता प्रसङ्गार्थमिहागतोऽस्मि इति । इदं वचनं निशम्य पुनः भट्टाचार्यः प्राह—'तथा चेदुदग्देशेषु मङ्गगिनीभर्ता मण्डनमिश्रः सर्वज्ञ इव सकलविद्यासु पितामह इव वर्तते । तेन साकं भवद्वादकण्डूतिनिवृत्तिपर्यन्तं प्रसङ्गं कुरु । अहं कर्मविपाकधर्मसूत्रबद्धः ईदृगवस्थया परलोकं यामि । मे भवद्दर्शनमतिफलदमासीत्' इत्युक्त्वा निमीलिताक्षः सर्वात्मकब्रह्मारूढबुद्धिरासीत् । ततः परमगुरुरपि सर्वजनस्तूयमानविभवः पुनः पत्तनं प्राप्य रुद्राख्यपुरवासिनः सर्वानद्वैतमार्गाश्रितान् चकार ।

॥ इत्यनन्तानन्दगिरिकृतौ भट्टदर्शनं नाम पञ्चपञ्चाशं प्रकरणम् ॥

॥ ५६ ॥

॥ मण्डनमिश्रजयः ॥

ढक्काशङ्खतालध्वनिभिर्जयशब्दैः बन्दिमागधसूतकृतस्तवैः [1]पद्मपादादिशिष्यकृतकरतालैः दिक्करिकर्णकोटरबाधां संपादयन्तः श्रीपरमगुरुमुखाः कुबेरदिङ्मार्गमवलम्ब्य हस्तिनापुरादाग्नेयभागस्थलं विद्यालयमिति प्रसिद्धं [तद्देशवासिनस्तु बिजिलबिन्दुरिति वदन्ति] तत्पुरं प्रापुः । तत्पुरान्तराले चतुर्योजनविस्तारे प्रत्यग्दिशि क्रोशमात्रविस्तारचतुरस्रे भूमिभागे तालतरुमात्रोच्छ्रितां शालां निर्माय तन्मुखे शतहस्तप्रमाणं परस्पराभिमुखं वेदिकाद्वितयं तदुपरि ओतप्रोतदारुपञ्जरबद्धशुकपञ्जराणि अनेकानि कल्पयित्वा तत्र पञ्चशतमितशिष्यान् एकैकशास्त्र[2] पारीणान् मण्डनमिश्रः चतुर्मुखेभ्यो ब्रह्मेव, सहस्रवदनेभ्योऽहिराज इव, पञ्चास्येभ्यो रुद्र इव, षड्दर्शनपाठ[3]पराक्रमितान् आनन्दसमुद्रे प्लवमानान् शिष्यान् अखिलाशाजयसमर्थान् आचकार । तच्छालान्तरे सेवकैः दासदासीजनैः

1. पद्मपादसुरेश्वरादिशिष्य० इति पाठः म1, रा. मातृकयोः । पाठोऽयं महामहोपाध्याय कुप्पुस्वामिशास्त्रिभिः ब्रह्मसिद्धिग्रन्थोपोद्घाते निरूपितं मण्डनमिश्रसुरेश्वराचार्ययोः व्यक्तिपार्थक्यं उपोद्बलयति—टि.

2. रा. ०स्त्रपरिणाम्नः मण्ड०   3. रा. ०ठपरान् मुक्त इव आन०



कूप[1]तडागादि निर्माय तद्वारिपरिवृद्धसकलसस्यारामादिभिः प्राप्तान्नशाकादिभिरेव प्रत्यहमखिलशिष्यैः सह षड्रसोपेतान्नभक्षणपरितृप्ततनुः निवसन् अर्थात् प्राप्ते पैतृकदिने (निमन्त्रित) ब्राह्मण(अर्थं) [निमित्तं] पितृस्थानाय व्यासं मन्त्रशक्तिबलादागतं निमन्त्रयामास । विश्वेदेवस्थानाय तत्समब्राह्मणाभावात् लक्ष्मीनारायणरूपं शालग्रामं निमन्त्र्य, कृतसकलपाकया निजयुवत्या 'पितृसमर्चनं कुरु, पाको जात' इति गृहीतवचनः शुचिः प्रसन्नहृदयो मण्डनमिश्रः पवित्रभूषित[2]करः सङ्कल्प्य क्षणं देवार्थं शालग्रामे दत्वा पित्रर्थं व्यासकरे दत्वा गृहाङ्गणे चतुरश्रवर्तुलमण्डलद्वयं कृत्वा तत् पूजां विधिवत् कृत्वा स्वयं प्रत्यङ्मुखो भूत्वा देवस्थाने क्षणं शालग्रामं दर्भोपरि सन्निवेश्य विश्वेदेवध्यानमाचरन्नास । तदानीं किल परमगुरुः सर्वशिष्यान् तत्पुरपूर्वभागोपवनेषु सन्निवेशयित्वा स्वयं पुरं प्रविवेश । भानौ स्वमध्यस्वस्तिकारूढे पुरः प्रत्यग्भागे मार्गे किल दासीकदम्बकमीक्ष्य मण्डनमिश्रालयः कुत्रास्तीति (अब्रवीत्) [अपृच्छत्] । पृष्टास्ताः परमगुरुं प्रत्यूचुः —

प्रत्यक्षशब्दान्तमितिप्रभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

जीवेश्वरैक्येन भिदाप्रभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

शब्दान्तसत्प्रत्ययधातुवादैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

स्नानादिविप्रोचितकर्मकृत्यां शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

मन्त्रादि[3]वाचां तु तनुप्रभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

1. रा. ०पतटादीन् नि०   2. क. ०तकरकमण्डलुकूर्चाधरः   3. क. ०धिराजस्य विधानभेदैः

* प्रधानवादैः किल सांख्यभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

चार्वाकवैतालिकबौद्धभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥ *

जैनोक्तिभिः कालविदुक्तिभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

कापालिकैर्भैरवयक्षवादैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

भक्त्यादिभिः शैवमतप्रभेदैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

गणेशविष्ण्वर्कपरैः मतार्थैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

काव्यादिभिर्नाटकसिद्धवादैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

आकर्षणोच्चाटनसिद्धमन्त्रैः शुकाङ्गना यत्र गिरं वदन्ति ।
द्वारे तु नीडान्तरसन्निरुद्धाः अवेहि तं मण्डनमिश्रधाम ॥

इत्यादि बहुदासीवचनसन्दर्भसञ्जातश्लोकान् श्रुत्वा महदाश्चर्यसंमिश्रमनाः परमगुरुः युवतिसङ्घमतीत्य तालप्रमाणसालपरिवेष्टितं मण्डनमिश्रगृहं प्राप्य कवाटगुप्तं दुष्प्रवेक्ष्यमिति विचार्य प्राणायामबलात् गगनमार्गेणान्तःप्रविश्य मण्डनमिश्रकृतपूजाप्रसन्नविश्वेदेवमण्डले क्षणादवातिष्ठत् । तदानीं मण्डनमिश्रः विश्वेदेवान् सङ्कल्प्य शालग्राम स्वागतमिति दर्भाक्षतप्रक्षेपणकाले शङ्कराचार्यपादद्वयं मण्डलस्थं ददर्श । ततः सर्वाङ्गनिरीक्षणेन किल अयं सन्न्यासीति ज्ञात्वा

* . . * एतच्चिन्हान्तर्गतः पाठः नास्ति क. पुस्तके



कोपकोलाहलचित्तः कुतो मुण्डीत्यवदत्[1] । आगलान्मुण्डी । सुरा पीता वा । न हि नहि, सुरा श्वेता । किं मदः, तद्गृहस्थेषु । किं जडता, तद्भौतिकदेहे । किं निर्भाग्यः, यत्यर्चनानर्हः, त्वमेम निर्भाग्यः । किं दूषकता, तत्पातकवति । किं चोरवृत्तिराश्रिता, अरिषड्वर्गपीडितेनैव । अप्रार्थितनिमन्त्रितः अभ्यागतो विष्णुरहमित्यादि वाक्यानि व्यासः श्रुत्वा पाद्यं दीयतामिति मण्डनमिश्रमवदत् । पाद्यग्रहणकाले वादार्थमागतोऽस्मीति गुरुर्जगाद । मण्डनमिश्रः भोजनानन्तरं तथा करोमीत्यवदत् । यथाविधि पितृकर्म निर्वर्त्य वादार्थं पणमेवं आचक्रतुः । 'गृहस्थोऽहमपि यदि वादे पलायितः सन्न्यासी भवेयं, सन्न्यास्यहमपि यदि वादे पलायितः गृहस्थो भवामि' इति । उभयपक्षग्रहणसमर्थां मण्डनमिश्रपत्नीं कृत्वा सरसवाणीनाम्नीं प्रसङ्गोपक्रममाचक्रतुः । निगमादिसर्वविद्यासु प्रसङ्गे क्रियमाणे शतदिनात् परं प्रतिपक्षस्य स्खालित्यं श्रुत्वा महानसात् पतिसमीपं गत्वा सरसवाणी सर्वज्ञा किल इदमब्रवीत्—नाथ मण्डनमिश्र । एहि भिक्षायै इति । तां परमगुरुस्तुष्टाव । तदानीं मण्डनमिश्रः परमगुरुचरणारविन्दं नत्वा तदपदेशेन सन्न्यासी भूत्वा कुबेरदिशमव्रजत् ।

॥ इत्यनन्तानन्दगिरिकृतौ मण्डनमिश्रजयाभिधं नाम प्रकरणं षट्पञ्चाशम् ॥

॥ ५७ ॥

## ॥ सरसवाण्या सह यतिप्रसङ्गप्रपञ्चः ॥

पतियत्याश्रमग्रहणात् पूर्वक्षणे [2]महानसात् गवाक्षबिलात् गगनमवलम्ब्य ब्रह्मलोकं गच्छन्तीं सरसवाणीं दृष्ट्वा परमगुरुः वनदुर्गामन्त्रेण तद्दिग्बन्धनमाचकार । तदनन्तरं भो सरसवाणि! त्वं ब्रह्मशक्तिरसि, तदंशभूतस्य मण्डनमिश्रस्य

1. अत्र प्रथमं वाक्यं मण्डनमिश्रस्य, द्वितीयवाक्यं गुरोः, एवं सर्वत्र ज्ञातव्यम्—आनन्दगिरिवाक्यमिदम् ।

2. महानसादिति क. पुस्तकस्थपाठः ।

पत्नीव उपाधिना प्रतिफलसि। तस्मात् मया साकं प्रसङ्गं कृत्वा गन्तुमर्हसीति परमगुरुणा उक्ता प्रत्युवाच—पतिसंन्यासात् पूर्वमेव वैधव्यभयात् पृथिवी[1] कर्मफलसंपाद [2]नकरी [मया] मनसा त्यक्ता। तस्मात् पृथिवीं पुनरहं न स्पृशामि। हे यते! त्वं तु भूस्थः कथं प्रसङ्गाय एकविषयास्थिति[3]ः युज्यत इति। तां परमगुरुः एवं वदन्तीं प्रत्याह—मातः! तथाभूताऽपि भूम्युपर्याकाशे हस्तषट्कमात्रे(णा) अवतिष्ठ। मया सह साङ्गं सर्ववाक्प्रपञ्च[4]सञ्चारं कृत्वा गच्छसीति। [5]सा तथा भूत्वा तेन सह सर्वशास्त्रेषु वेदेतिहासपुराणेष्वपि समग्रं प्रसङ्गं कृत्वा यतितिरस्काराय तद्दुष्प्रवेशकामकलाशास्त्रे नायिकानायकभेदकलाप्रपञ्चे [6]कृतबुद्धिरासीत्। तदानीं यतिवरः तत्कलानभिज्ञः तूष्णीमास॥

॥ इत्यनन्तानन्दगिरिकृतौ सरसवाण्या सह यतिप्रसङ्गप्रपञ्चो नाम प्रकरणं सप्तपञ्चाशम्॥

॥ ५८ ॥

## ॥ देहान्तरसञ्चारविदितकामशास्त्रप्रपञ्चः ॥

ततः सरसवाणी किल यतिवरमिदमब्रवीत्—भवदविदितं शास्त्रान्तरमस्ति किल, तामहं जानामि। कालवित् परमगुरुः प्रत्युवाच—

मातस्त्वत्रैव षण्मासं तिष्ठ पश्चात् कथासु च।
सति [7]सर्वविभेदासु करोम्यर्थविनिर्णयम्॥

इत्युक्त्वा शपथपूर्वकं, भगवतीं तत्रैव गगनमण्डले संस्थाप्य सर्वशिष्यान् यथायतनं प्रेषयित्वा चतुर्भिः शिष्यवरैः हस्तामलक-पद्मपाद-[8]विद्यानिधि—

1. क. ०वी मयात्यक्ता 2. रा. ०नकातरमनुत्यक्ता
3. रा. ०तियुक्तो युज्यत इति 4. रा. ०ञ्चसंसारं 5. क, सादरा भूत्वा
6. रा. युक्तिङ्गाऽसीत् म$_2$. युक्तिरासीत्
7. रा. मर्मविभेदासु 8. म$_2$, क. विधिविद्दान०



आनन्दगिरिप्रवराभिधानैः संसेव्यमानः तस्मात् पुरात् वारुणाशामगमत्। तत्रान्यत्र च [1]नानानर्मविभेदं ज्ञात्वा अमृतपुरमिति प्रसिद्धं कञ्चित् पट्टणविशेषं प्राप्य तत्पतौ मृते तदीयदेहं चितिगतं ज्ञात्वा तत्पुरप्रान्ताद्रिकोटरे निजदेहं संस्थाप्य रक्ष्यतामिति शिष्यानुक्त्वा परकायप्रवेशविद्याप्रपञ्चेन लिङ्गशरीरमात्रेण च साभिमा[2]नी (जीवः) चितिगत नृपकलेवरनिष्ठब्रह्मरन्ध्रं प्राविशत्। ततः चालितपादहस्तादिकं नृपमीक्ष्य [3]पौराः सर्वेऽपि प्रफुल्लवदनाः चितेः निस्सार्य प्राप्तजीवं राजानं शैत्योपचारैः अनेकैः स्वस्थं कृत्वा चितिनिवेशदोषवादपरिहाराय कुक्कुटादिक्षुद्रजन्तून् तत्र निक्षिप्य वन्हिना संयोज्य शान्त्यर्थं बहुगोक्षीरधाराभिषेकं कृत्वा भूपति[4]ममरुकेति प्रसिद्धं शङ्खभेरीकोलाहलढक्कातालमर्दलप्रभृतिवाद्यविशेषैः वन्द्यादिस्तोत्रविशेषैः वाराङ्गनानाट्यविशेषैः, विप्रपठितशान्तिसूक्तविशेषैः, [5]पुरस्त्रीकदंबकृतनीराजनविशेषैः, हस्त्यश्वरथपदानुगचतुर्विधबलसमेताः परमाप्तपौराः प्रभुं सिंहासनारूढं आचक्रुः।

तत्र स्थित्वा क्षणं राजा ज्येष्ठभार्यागृहं गतः।
तदालिङ्गनसञ्जातसुखसुप्रतिकौशलात्॥

मुखं मुखेन संयोज्य वक्षो वक्षोजयोस्तथा।
नाभ्या नाभिश्च संकोच्य संकोचेन पदापदम्॥

एवमेकाङ्गवत् कृत्वा गाढालिङ्गनतत्परः।
कक्षास्थानेषु हस्ताभ्यां स्पृशन् प्रौढ इवाबभौ॥

तदालापविशेषज्ञा ज्येष्ठपत्नी कलादिवित्।
देहमात्रं हि भर्तुः स्यात् न जीवोऽयं हि सर्ववित्॥

इति ज्ञात्वा बलं दिक्षु प्रेषयमास सत्वरम्।
यत्र कुत्र शरीराणि जीवहीनानि भूमिषु॥

1. तत्रत्यानामिति शेषः 2. रा. ०मानिज्ञो जी. 3. म$_2$. दाराः सर्वेऽपि
4. म$_2$. ०ममृत इति प्र० 5. म$_2$. पुण्यस्त्रीक०

गुप्तानि शिष्यसङ्घैर्वा नदीदेवालयादिषु ।
गुहासु भूभृतां वाऽपि मध्ये त्वादशयोजनात् ॥

आलोक्य तानि सर्वाणि चित्वाऽयान्त्विति सादरात् ।
अवादीत्, तेऽपि तद्वाक्यादन्वेषणपराऽभवन् ॥

नृपः तदङ्गनासङ्गमहिमा पद्यवर्णनम् ।
अकरोत् शास्त्रम (मूगं) [मरुकं] शतसङ्ख्यासमीरि(तैः) [तम्] ॥

॥ इत्यनन्तानन्दगिरिकृतौ देहान्तरसञ्चारविदितकामशास्त्रप्रपञ्चो नाम प्रकरणं अष्टपञ्चाशम् ॥

॥ ५९ ॥

## ॥ शिष्यागमनम् ॥

ततः शङ्करगात्रज्ञाः चाराः शिष्योपसेवनात् ।
कृत्वा चितिं काष्ठशतैः तन्मध्ये स्थाप्य तत्तनुम् ॥

वन्हिना संयुतां (कुर्युः) [चक्रुः] शिष्याः तावत् पुरं गताः ।
कामलोलुपमत्याशाबद्धबुद्धिं नृपोत्तमम् ॥

आलोक्य नाटयं कुर्वन्ति बोधयन्तः परोक्तिभिः ।
यत्सत्यमुख्यशब्दार्थानुकूलं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥

न ह्येतत्त्वं विदितनृपभावं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
विश्वोत्पत्त्यादिविधिहेतुभूतं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥

सर्वदेवात्मकं सर्वमद्वैतं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
यस्तार्किकैरीश्वरः सर्वहेतुः तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥

यद्वेदान्तिभिः ब्रह्म सर्वस्थं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
यज्जैमिनिनोक्तमखिलं कर्म तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥



यत्पाणिनिः प्राह शब्दस्वरूपं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
यत्साङ्ख्यानां मतहेतुभूतं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
अष्टाङ्गयोगोक्तमनन्तरूपं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥

सत्यं ज्ञानमनन्तं ब्रह्म तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
न ह्येतत्त्वं दृश्यप्रपञ्चं तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ॥

यद्ब्रह्मणो ब्रह्मविष्णवीश्वराद्यभवन् तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
सर्वाधारं हि सर्वात्मकं यत् तत्त्वमसि तत्त्वमसि [तत्त्वमसि] राजन् ।
त्वद्रूपमेवास्माभिर्विदितं तव पूर्वयत्याश्रमस्थम् ॥

॥ इत्यनन्तानन्दगिरिकृतौ शिष्यागमनं नाम एकोनषष्टिप्रकरणम् ॥

॥ ६० ॥

## ॥ नृसिंहसाक्षात्कारः ॥

विप्रोद्बोधितो राजा मूर्च्छामवलम्ब्य सर्वेषां सदसि देहान्निर्गमि[1]तः नीडस्थपक्षिवत् सलिङ्गकः गिरिकोटरे निजा[2]ङ्गमप्राप्य चितिमध्यगं वीक्ष्य वन्हिज्वालाम[3]ध्ये कपालमध्यात् प्रविश्य अन्तस्तदवस्था[4]पनाय हि लक्ष्मीनृसिंहं तदा स्तौति—

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि-
सङ्घट्टिताङ्घ्रिकमलारुणकान्तिकान्त ।
लक्ष्मीलसत् कुचसरोरुहराजहंस-
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥

---

1. रा. मितोऽभूत् निडास्थानात् पक्षिरिव सप्तलिङ्गः गि०
2. क. ०ङ्ग न प्राप, अग्नेर्मध्यगतं
3. क. ०ध्यात्
4. क. स्थाहीनोऽयं लक्ष्मी०

[1]इत्या (ष्टष्ट) [दि] श्लोकैः। स्तुतः नृसिंहोऽपि लक्ष्मीसमेतः साक्षात् बभूव॥ ज्वालामालासहस्रपरिवेष्टितां चितिं समीक्ष्य दक्षिणकरावलम्बनमाचार्यस्य दत्वा उत्थाप्याग्निशिखाकृतत्रिकृतिं खड्गमृतपूरणेन सम्यग्विधाय सर्वलोकं जय इत्याशिषः कृत्वा स्वयं तिरोहितोऽभवत्॥

॥ इत्यनन्तानन्दगिरिकृतौ नृसिंहसाक्षात्कारो नाम प्रकरणं षष्टिकम्॥

॥ ६१ ॥

॥ सरस्वतीजयः ॥

आचार्यस्ततः शिष्यजनसेव्यमानः शीघ्रं मण्डनमिश्रपुरं प्राप्य गगनासनस्थां सरसवाणीं दृष्ट्वा परमतत्त्वरूपिणीं सर्वकलावतीं [प्राह] मातः! त्वत्कृतरतिशास्त्रप्रश्नानामुत्तरमद्यैव वक्ष्यामीति। [एवं] वाङ्मात्रेणैव सर्वज्ञा सरसवाणी सर्वज्ञस्त्वमिति स्वामिनं प्रस्तुवत्यासीत्। ततस्त्वाचार्योऽपि विदितसमस्तपदार्थः कृतार्थो बभौ॥

॥ इत्यनन्तानन्दगिरिकृतौ सरस्वतीजयो नाम प्रकरणं एकषष्टिकम्॥

॥ ६२ ॥

॥ द्विषष्टिप्रकरणम् ॥

ततः परं [आचार्यः] सरसवाणीं मन्त्रबद्धां कृत्वा गगनमार्गादेव शृङ्ग[2]गिरिसमीपे तुङ्गभद्रातीरे चक्रं निर्माय तदग्रे परदेवतां सरसवाणीं निधाय एवमाकल्पं स्थिरा भव मदा[3]श्रया, इत्याज्ञाप्य निजमठं कृत्वा तत्र विद्यापीठनिर्माणं कृत्वा भारतीसंप्रदायं निजशिष्येषु चकार। तदारभ्य शुद्धाद्वैतगुरवो भारतीसंप्रदायनिष्ठाः परमगुरोराचार्यस्वामिनः कटाक्षलब्धविद्यावैशद्या इति व्यवहारः

1. रा. इत्यष्टश्लोकैः  2. क. ०ङ्गपुरस०  3. म$_2$, रा. ०दाश्रम इति



यस्त्वद्वैतमते स्थित्वा भारतीपीठनिन्दकः।
स याति नरकं घोरं यावदाभूतसंप्लवम्॥
यश्शङ्कराचार्यगुरु[1]प्रवर्यं नित्यं स्मरत्युत्तमलोकवासी।
गुरुस्वरूपज्ञतया हि मुक्तः सत्यं परं ब्रह्म गुरुर्नचान्यत्॥
नारायणं पद्मभुवं वसिष्ठं शक्तिश्च तत्पुत्रपराशरञ्च।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्॥
श्रीशङ्कराचार्यमथास्य पद्मपादश्च हस्तामलकश्च शिष्यम्।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि॥

गुर्वभिमतः शुद्धाद्वैमतमवलम्ब्य श्रद्धाभक्तिसमेतवृत्त्या जाग्रदाद्यवस्थात्रयतीतं मनोन्मनीं[2]मङ्गुष्ठमात्रतनुं ध्यात्वा तद्वारा शुद्धं 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' [श्वे. उ. ६-१९] 'सत्यं ज्ञानमनन्तं ब्रह्म' [तै. उ. २-१-१] इत्यादि वाक्यसिद्धं परमात्मानं यो वा वेद सोऽविद्याकञ्चुकात् मुक्तो भवतीति शुद्धा दिक्॥

॥ इत्यनन्तानन्दगिरिकृतौ गुरोः सरसवाण्याश्च शृङ्गगिरिस्थाननिवासनं नाम द्विषष्टिप्रकरणम्॥

॥ ६३ ॥

॥ काञ्चीनगरनिर्माणम् ॥

तत्रैव परमगुरुः द्वादशाब्दकालं विद्यापीठे स्थित्वा बहुशिष्येभ्यः शुद्धाद्वैतविद्यायाः सम्यगुपदेशं कृत्वा तदनन्तरं पद्मपादाख्यं कञ्चिच्छिष्यं पीठाध्यक्षं

1. म$_2$ वरेण्यं
2. म$_2$. मातृकास्थपाठः। रा. मातृकायां 'नमङ्गुष्ठमात्रपुरुषं' इति वर्तते।
3 'पद्मपादाख्यं कञ्चिच्छिष्यं' इत्येव पाठः सर्वासु मातृकासु। म$_6$ मातृकायां परं 'कञ्चिच्छिष्यं' इत्येव वर्तते।

कृत्वा [1]भोगनामकं लिङ्गं तस्मिन् पीठे निक्षिप्य स्वयं निश्चक्राम। तस्मादहोबिलाख्यं नृसिंहाविर्भूतिस्थलं प्राप्य तत्र नृसिंहं स्तुत्वा तस्माद्वेङ्कटगिरिं प्राप्य श्रीवेङ्कटेशमखिलकारणं शुद्धाद्वैतरूपं नत्वा तत्रार्चकादीन् सर्वानपि अद्वैतवृत्तीन् कृत्वा तस्मात् काञ्चीनग[2]रं प्राविशत्। तत्र किल भगवान् महादेवः स्वकीयपृथिवीमूर्त्याविर्भूतलिङ्गरूपेण [3]एकाम्रेश इति प्रसिद्धो वर्तते। तस्मिन् स्थले मासमात्रं स्थित्वा शम्भुप्रतिष्ठापूर्वकं शिवकाञ्चीति पट्टणं निर्माय तत्प्राक् ब्रह्मयज्ञकुण्डाविर्भूतविष्णुं वरदराजनामानं समाश्रित्य तत्र विष्णुकाञ्चीति प्रसिद्धं प्रट्टणं निर्माय तत्सेवार्थं ब्राह्मणादीननेकसेवकभक्तजनान् संपाद्य तानपि शुद्धाद्वैतवृत्तिनः एव कृत्वा सर्ववेदान्ततात्पर्यैकनिष्ठः परमगुरुः सुखमास। ततः तद्देशवासिनः सर्वे ताम्रपर्णीत[4]टस्थाः [च] परमगुरुं नत्वेदमूचुः। स्वामिन्! सर्वदा भिदा सत्यमिव भाति। कथमभेदस्य सत्यत्वं वक्तुमुचितम्। देहभेदस्य जीवपरभेदस्य वर्णाश्रमभेदस्य प्रत्यक्षदृष्टत्वात्। तस्माद्भिदैव [5]परमार्थ इति ब्रूमः। परलोकेऽपि सुकृतादिवशात् केषाञ्चित् स्वर्गप्राप्तिः, (केषाञ्चित् नरकप्राप्तिः), केषाञ्चिदर्चिरादिमार्गद्वारा ब्रह्मलोकाप्राप्तिः, केषाञ्चिद्यक्षलोकप्राप्तिः, केषाञ्चित्पाशुपतानां रुद्रलोकप्राप्तिः, सौराणां तल्लोकप्राप्तिः, गाणपत्यानां तल्लोकप्राप्तिः, अविदुषां तावदन्धन्तमप्राप्तिः, एवमनेकधा अनेकलोकप्राप्तिरिति कृत्वा भेदस्यैव पारमार्थिकत्वं सम्भवतीति पूर्वपक्षे प्राप्ते परमगुरुरेवं पठति — भो द्विजवराः। किमु पारमार्थिकमविदितं भवद्भिः, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं जिघ्रेत् केन कं विजानीयात्' [बृ. उ. ४-५-१५] इति श्रुतिभिः सर्वस्यात्मरूपत्वेन ज्ञानाग्निदग्धपापपञ्जरस्य मर्त्यस्य न भिदा द्योतते तस्य, भेदाभावान्मुक्तिरिति समस्तवेदान्तेषु [6]निश्चितत्वात् न सन्देहगन्धः। "तत्सृष्ट्वा तदेवा-

1. 'भोगनामकं लिङ्गं तस्मिन् पीठे निदिप्य' इत्ययं भागः म1, रा. मातृकायोः उपलभ्यते। म2. मातृकायां, क. पुस्तके परं नास्ति।
2. म2. ०रप्रदेशं प्रा०  3. म2 एकाम्रनाथ इति।
4. रा. ०टादागत्य  5. म2 पारमार्थिक इ०  6. रा निश्चयपरत्वात्



-नु प्राविशत्' [तै. उ. २-६] इत्यादिशास्त्रतात्पर्येण जगत्कर्तुः ब्रह्मण एव जीवरूपेण जगदन्तःप्रवेशावगमात्। किञ्च, तत्तदुपासकानां तत्तल्लोकप्राप्तिरिति भवद्भिरुक्तं, यद्यस्ति जीवभेदः तदा भविष्यति। 'कति देवाः' [बृ. उ. ३-९-१] इत्युपक्रम्य 'त्रयश्च त्रीच शता, त्रयश्च त्रीच सहस्रा' [बृ. उ. ३-९-१] इति निरुच्य, 'कतमे ते' [बृ. उ. ३-९-१] इति पृच्छायां 'महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा' [बृ. उ. २-९-२] इति[1] निम्नुवती [बृहच्छ्रुतिः] (श्रुतिः) एकैकस्य देवतात्मनोऽनेकरूपतां दर्शयति। तथा त्रयस्त्रिंशतोऽपि षडाद्यन्तर्भावक्रमेण 'कतम एको देव इति, प्राणः' [बृ. उ. ३-९-९] इति प्राणैकरूपतां देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति।

तथा स्मृतिरपि—

आत्मनो वै शरीराणि बहूनि भरतर्षभ।
योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥
प्राप्नुयाद्विषयान्कैश्चित् कैश्चिदुग्रं तपश्चरेत्।
संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव॥'

इत्येवंजातीयका प्राप्ताणिमाद्यैश्वर्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति। किमु वक्तव्यमाजानसिद्धानां देवानाम्। अनेकरूपप्रतिपत्तिसंभवाच्चैकैका देवता [2]बहुभीरूपैरात्मानं प्रविभज्य बहुषु [3]यागेषु युगपदङ्गभावं गच्छति, परैश्च न दृश्यतेऽन्तर्धानादिशक्तियोगादित्युपपद्यते। विग्रहवतामपि कर्माङ्गभावचोदनास्वनेका प्रतिपत्तिर्दृश्यते। क्वचिदेकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं[4] न गच्छति, यथा बहुभिर्भोजयद्भिः नैको ब्राह्मणो युगपद्भोज्यते। क्वचिच्चैकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं[5] गच्छति, यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो

1. म2. ०ति बृहच्छ्रुतिः एकै०।  2. क, म2. बहुरूपैः
3 क, म2. योगेषु  4. म2. ०वं भजति  5. म2. ०वं भजति

युगपन्नमस्क्रियते। तद्वद्विहोद्देशपरित्यागात्मकत्वाद्यागस्य [1]विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यक्ष्यन्तीति विग्रहवत्त्वेऽपि देवानां न किञ्चित्कर्मणि विरुध्यते। तेष्वपि चैतन्यस्यैकरूपत्वात्, सर्वस्यापि देवगणस्य ब्रह्मरूपत्वाच्च। 'बहुस्यां प्रजायेय' [छा॰ उ. ६-२-३] इति श्रुतेः। तस्मात् सर्वज्ञं नित्यशुद्धबुद्धमुक्तस्वरूपं कारणं ब्रह्म मुमुक्षुभिरुपासनीयमिति सिद्धान्तः। तस्माद्भवन्तोऽपि जीवात्मभेदं सर्वं परित्यज्य शुद्धाद्वैतब्रह्मोपासनया मुक्ता भवत इति सम्यगुपदिष्टाः काञ्चीताम्रपर्णी[2]तीरदेशवासिनः शुद्धाद्वैतविद्याश्रिता बभूवुः।

॥ इत्यनन्तानन्दगिरिकृतौ काञ्चीनगरनिर्माणं नाम[3] प्रकरणम् त्रिषष्टिकम् ॥

॥ ६४ ॥

## ॥ श्रीकामाक्षीप्रपञ्चनम् ॥

तदनन्तरं श्रीकामाक्षीप्रपञ्चश्चिन्त्यते। सा तु साङ्ख्यायनस्य मुनेराविर्भूता किल उपासनायां भगव[4]ती चिद्रूपिणी ब्रह्मविद्या रुद्रशक्तिः। इदानीमपि गुहावासिनी भूत्वा वर्तते निजमहिमप्रकटनार्थं अनेकवैभवाननुभवती। तस्याः परमेश्वर्याः बिम्बप्रतिष्ठामष्टधा [5]कारयामीति धिया श्रीकामाक्षिप्रतिष्ठामाचकार। साप्युपासकानां फलदा कल्पवल्लीव समभवत्। अतो विद्यारूपया तया सह[6] युक्तः परमेश्वरो मोक्षद इति कृत्वा वेदवेदान्तसहस्र[7]वादः स्वरूपमभ(व)[ज]त्।

---

1. क. विग्रहपतिसेत्नावदेव तामु०  2. क. म$_2$. ०र्णीदेशवा०
3. रा. ०म उपसंहृतलदेशवासिनां नाम प्रक०
4. क. वती मरुद्रूपिणी  म$_2$. ०वती महद्रूपिणी
5. रा. अलङ्कारयामि  6. क. ०हापि यु०
7. क. ०स्रासिद्धमसवाद:।  म$_2$. ०स्रसिद्धमभवत्।  रा, ०स्रस्वरूपयमलत्।



उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥
[कै॰ उ. ७]

[इति] श्रुतिः अथर्वखण्डे। "बहुशोभमानाम् उमां हैमवतीं" [के. उ. ३-१२] इत्यादिवाक्यानां[1] विद्यामानत्वात् उमा ब्रह्मविद्या ज्ञानरूपिणीति फलितार्थः। सैव मुक्तिदा इति निरवद्यम्।

या देवी सर्वभूतेषु ज्ञानरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

इति मार्कण्डेयपुराणसद्भावाच्च। तस्मात् परा देवता कामाक्षीति तत्प्रप[2]ञ्चविभवः ॥

॥ इत्यनन्तानन्दगिरिकृतौ श्रीकामाक्षीप्रपञ्चनं नाम प्रकरणं चतुष्षष्टिकम् ॥

॥ ६५ ॥

## ॥ श्री चक्रप्रतिष्ठा - योगलिङ्गस्थापनम् ॥

एवमेतस्मिन्नर्थे निष्पन्ने परशक्तित्वस्याभिव्यञ्जकं श्रीचक्रनिर्माणं क्रियते भगवद्भिराचार्यैः। तत्र श्लोकोऽयम्—

बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वस्रनागदलसंयुतषोडशारम्।
वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रमेतदुदितं परदेवतायाः॥ इति।

अत्र तु नवचक्राणि [3]वर्तन्ते खलु। तेषां मध्ये केषाञ्चित्[4] शिवत्वम्, केषाञ्चित्[5] शक्तित्वम्। तथा हि —

---

1. क. ०नां विद्याफलमाह उमा विद्यां ज्ञा०  म$_2$. नां विद्यमानत्वात् उमा विद्याज्ञा०।
2. क. ०पञ्चोऽभवत्।  3. क. वर्ण्यन्ते खलु
4. क. म$_2$. ०त् शैवत्वम्  5. क. म$_2$. ०त् शाक्तत्वम्।

चतुर्भिश्शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥ इति।

तत्रापि [1]देवीशिवचक्र[2]विभागं दर्शयामि—

“त्रिकोणमष्टकोणञ्च दशकोणद्वयं तथा ।
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥
बिन्दुश्चाष्टदलं पद्मं तथा षोडशपत्रकम् ।
चतुरस्रं च चत्वारि शिवचक्रा[3]ण्यनुक्रमात् ॥
त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् ।
दशारयोः षोडशारं भूगृहं भुवनास्रके ॥
शैवानामपि शाक्तानां चक्राणाञ्च परस्परम् ।
अविनाभावसंबन्धः यो जानाति स चक्रवित् ॥
त्रिकोणरूपिणी शक्तिः बिन्दुरूपस्सदाशिवः ।
अविनाभावसंबन्धः तस्माद्बिन्दुत्रिकोणयोः ॥
एवं विभागमज्ञात्वा श्रीचक्रं यः समर्चयेत् ।
न तत्फलमवाप्नोति ललिताम्बा न तुष्यति ॥

इत्यादिवचनैः श्रीचक्रस्य शिवशक्त्यैक्यरूपत्वात् विद्यात्मैक्य मित्यभेदाध्यवसायः सिद्धः । [4]अतः सर्वेषां [दर्शनादेव] मोक्षफलप्राप्तये (दर्शनादेव) श्रीचक्रं प्रभवतीति भगवद्भिराचार्यैः तत्र निर्मितम् । तस्मात् मुक्तिकाङ्क्षिभिः सर्वैः श्रीचक्रपूजा

1. म2· देवीचक्रं विभावयामि ।
2. क. ०क्राविर्भावं तु० 3. क. ०क्राणि तुक्र०
4. ‘अतः सर्वेषां’ इत्यत आरभ्य ‘सुखमास’ इति पर्यन्तोऽयं भागः म1, श, मै मातृकासु उपलभ्यते । क. पुस्तके, म2 मातृकायां च अधोनिर्दिष्टपाठः वर्तते—तस्मात् मुक्तिकाङ्क्षिभिः सर्वैः श्री चक्रपूजाकर्तव्या इति त्रिक्। तस्मात् सर्वेषां मोक्षफलप्राप्तये दर्शनादेव श्रीचक्रं [प्रभवतीति] भगवद्भिराचार्यैः तत्र निर्मितमिति—इति



कर्तव्येति निश्चित्य तत्रैव निजावासयोग्यं मठमपि परिकल्प्य तत्र निजसिद्धान्तपद्धतिं अद्वैतं प्रकाशयितुमन्तेवासिनं सुरेश्वरमाहूय योगनामकं लिङ्गं पूजयेति तस्मै दत्वा त्वमत्र कामकोटिपीठमधिवसेति व्यवस्थाप्य शिष्यजनैः परिपूज्यमानः श्रीपरमगुरुः सुखमास ॥

॥ इत्यनन्तानन्दगिरिकृतौ [1]श्रीचक्रप्रतिष्ठा-योगलिङ्गस्थापनं नाम प्रकरणं पञ्चषष्टिकम् ॥

## ॥ ६६ ॥

## ॥ मोक्षमार्गप्रकाशनम् ॥

कदाचिच्छिष्याः अनन्तानन्दगिरिप्रमुखाः परमगुरुं नत्वा इदमूचुः—स्वामिन् ! मोक्ष[2]मार्गलक्षणं वद इति । परमगुरुः शिष्यैः प्रार्थितस्सन् मोक्षमार्गलक्षणं वक्तुमुपक्रममाचकार—

भगवद्गीतासु—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ [भ. गी. ८-२४]

इत्यग्न्यादिमार्गोऽयं अर्चिरादिमार्ग उच्यते । (अस्मिन्नर्थे भगवद्भिराचार्यैः सूत्रभाष्ये सम्यग्प्रतिपादितम्[3]) । ‘आतिवाहिकास्तल्लिङ्गात्’ [ब्र. सू. ४-३-४] इति सूत्रे तेष्वर्चिरादिषु संशयः। किमेतानि मार्गचिन्हानि, उत भोगभूमयः, अथ वा नेतारो गन्तॄणामिति । तत्र मार्गलक्षणभूता अर्चिरादय इति पूर्वपक्षः । अर्चिरादयश्चेतना नेतारः इति सिद्धान्तः । तथा हि—‘चन्द्रमसो विद्युतं तत्पुरु-

1. क. म2, श्रीचक्रनिर्माणं नाम प्र०; मा, श. मातृकयोः “श्रीचक्राप्रतिष्ठा-योगलिङ्गस्थापनं नाम प्रकरणम्” इति अयं पाठो वर्तते ॥
2. म2; रा मोक्षस्य मर्ग०. 3. आनन्दगिरिवाक्यमिदम्

षोऽमानवः स एनान् ब्रह्म गमयति' [छा॰ उ. ४-५-१५] इति [1]सिद्धवद्गमयितृत्वं दर्शयति।

[केचिदेवं वदन्ति]—'तस्य स्वस्थानमागतस्य मुक्तजीवस्य लिङ्गं प्रथममग्निना दह्यते। ततः सोऽप्यग्न्याकारो भवति। तदुपरि [2]निरञ्जनं ज्योतिः प्राप्य स्वयमपिज्योतिस्स्वरूपो भवति। तदूर्ध्वं अहः प्राप्य स्वयमहोरूपो भवति। अज्ञानरूपायाः रात्रेः तत्राभावात्। ततश्च शुक्लं प्राप्य स्वयं च शुक्लो भवति' 'यच्छुक्लं तद्ब्रह्म' इत्यादिना तदेव ब्रह्मप्राप्तिरिति (वदन्ति)। शुक्लगतस्य पुनरावृत्त्यभावात् नित्यानन्दं ब्रह्म भूत्वा विहरति' इति।

[तन्मतमनर्हम्। सूक्ष्मशरीरनाशानन्तरं स्थित्यभावात् किन्तु] अर्चिरादिमार्गेण कार्यब्रह्मस्थानं प्राप्य तदन्तपर्यन्तं तदग्रे स्थित्वा तेन सह मुक्ताः ब्रह्म सत्यज्ञानानन्दलक्षणं प्राप्नुवन्ति (इति तन्मतमनर्हम्। सूक्ष्मशरीरनाशानन्तरं स्थित्यभावात्) सर्वगतं ब्रह्मैव स्वयं भवन्तीति सिद्धान्तः।

धूमो रात्रिस्तथा कृष्णः षण्मसा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिः योगी प्राप्य निवर्तते॥ [भ. गी. ८-२५]

इति भेदफलं पुनरावृत्तिरेव, तस्य सर्वदाप्यसत्त्वात्। तथा हि—इदमस्माद्भिन्नमिति प्रतीयमानो भेदः धर्मिस्वरूपो वा स्यात् तद्धर्मो वा। न तावद्धर्मिस्वरूपमात्रम्। 'इदमस्माद्भिन्नं' 'घटः पटो न' इत्यादौ प्रकारतया भासमानस्य धर्मिस्वरूपत्वानुपपत्तेः। 'अयं घटः', 'घटः पटाद्भिन्नः' इति प्रतीत्योरविशेषप्रसङ्गाच्च। विषयवैचित्र्यव्यतिरेकेण प्रतीतिवैचित्र्यस्य वक्तुमशक्यत्वात्। ननु स्वामिन्! यथा कारणत्वादिकं स्वरूपमेवाङ्गीकृतं, अनन्यथासिद्धत्यादेः योग्यायोग्यघटितत्वेनाप्रत्यक्षत्वप्रसङ्गात्। क्वचिदपि प्रत्यक्षानङ्गीकारे अनुमानस्याप्यप्रवृत्तेः। एवञ्च एक एव दण्डः कदाचित् दण्डत्वेन

1. रा. सिद्धपथमतस्य सत्यत्वं दर्शयति. 2. रा. निरन्तरं



भासते दण्ड इति, कदाचित् अन्वयादि[1]साचिव्ये सति दण्डो घटकारणमिति। तत्र दण्ड इति प्रतीतेः न प्रतियोगिधीसापेक्षत्वं अन्वयाद्यपेक्षत्वं वा, [दण्डः कारणमिति प्रतीतेस्तु उभयापेक्षा]। दृष्टानुसारित्वात् [2]कल्पनायाः। विषयभेदाभावेऽपि प्रतीतिवैचित्र्यञ्चाङ्गीकृतम्। एवं प्रतियोग्यनुयोगि-विशेषणविशेष्याधाराधेयावच्छेद्यावच्छेदकभावादयोऽपि धर्मिस्वरूपा एव विलक्षणप्रतीतिनियामका इत्यङ्गीकृतम्। तथाऽत्रापि भेदस्य धर्मिस्वरूपत्वेऽपि विलक्षणप्रतीतिनियामकत्वं सप्रतियोगिकत्वं च न विरुद्धमिति, अत्रोच्यते—कारणत्वादयोऽपि विचारणीयाः। तेषामपि स्वरूपत्वे कथं विलक्षणप्रतीतिनियामकत्वम्? नह्येकमेव वस्तु सप्रतियोगिकं निष्प्रतियोगिकं च संभवति, विरोधात्। घटप्रतीतौ कारणत्वादिसन्देहो न स्यात्, अज्ञातांशलेशाभावात्। न च—समानप्रकारकनिश्चयस्य समानप्रकारकसंशयविरोधितया घट इति निश्चयात् घटो न वेति सन्देहो मा भूत्, घटः कारणं न वेति कारणत्वप्रकारकसंशये किं बाधकम् भिन्नप्रकारकत्वादिति वाच्यम्—घटत्वस्येव कारणत्वस्य घटधर्मत्वानङ्गीकारात्। घटत्वस्य घटापेक्षया भिन्नत्वात्, धर्मिस्वरूप[घट]ज्ञानेऽपि दोषवशात् घटत्वाज्ञाने घटो न वेति संशयः संभवति। कारणत्वन्तु घटस्वरूपमेवेति कथं घटज्ञाने सति कारणत्वसंशयः। न च कारणत्वस्य घटस्वरूपत्वेऽपि घट इति ज्ञाने घटस्याविशेषणत्वेन तत्स्वरूपस्यापि कारणत्वस्याप्रकारत्वात् न तत्प्रकारकसंशयदुर्भिक्षमिति वाच्यम्। घटे घटत्वमिति ज्ञाने सति कारणत्वसंशयो न स्यात्। उक्तज्ञाने घटस्य प्रकारतया तत्स्वरूपस्य कारणत्वस्यापि प्रकारत्वात्। न च घटस्य घटत्वेन रूपेण प्रकारत्वेऽपि कारणत्वेन रूपेण न प्रकारत्वमिति वाच्यम्। [त्वया] घटस्वरूपातिरिक्तकारणत्वानङ्गीकारात्। तस्मात् धर्मिस्वरूपभेदो न क्षोदक्षमः।

न द्वितीयः। स धर्मः किं भावरूपोऽभावरूपो वा? भावरूपत्वेऽपि पृथक्त्वं विभागो वा? न द्वयमपि संभवति; गुणादौ भेदाभावप्रसङ्गात्। विभागपक्षे

1. म2. सामीप्ये सति. 2. म2. अदृष्टकल्पनायाः

संयुक्तयोः भेदो न स्यात्। पृथक्त्वस्य प्रतीतिबलाद्गुणादिवृत्तित्वाङ्गीकारे, (पृथक्त्वस्य) [पृथक्त्वे] भेदो न स्यात्। पृथक्त्वे पृथक्त्वान्तरानङ्गीकारात्। अन्योन्याभावेनैव पृथक्त्वव्यवहारोपपत्तौ अतिरिक्तपृथक्त्वानङ्गीकाराच्च। 'न चान्यारादितर्ते' [पा. सू. २-३-२] इति सूत्रे अन्यशब्दस्यार्थपरत्वेन इदमस्मात् पृथक्, भिन्नमितिवत्, इदमस्मान्नेत्यपि प्रयोगपत्तिरिति वाच्यम्। विभक्त्यनुशासनस्य शब्दविशेषाधीनत्वस्य सर्वसंप्रतिपत्तेः। अन्यथा 'घटात् प्रमेय'मित्यपि प्रयोगापत्तेः प्रमेयादिशब्दानामपि पृथक्त्वार्थवत्त्वात्। न चासाधारण्येन-पृथक्त्वार्थकत्वं अभिमतमिति वाच्यम्। (कथ) [यत्कि] ञ्चिदर्थविवक्षायां अतिप्रसङ्गभयेन अर्थविशेषविवक्षायां नञ्भिन्नत्वेनापि शब्दविशेषणे बाधकाभावात् नञोप्यन्योन्यात्यन्ताभावसाधराणार्थकत्वेन असाधारण्येन तदर्थकत्वाभावाच्च। किञ्चिदिष्टसंग्रहार्थं अर्थपरत्वव्याख्यानस्य अभिमतमात्रसंग्राहकत्वाच्च। अत एव 'व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम्' [म. भा. १-१-१] 'अभिधानलक्षणाः कृत्तद्धितसमासाः' इत्यादि वैयाकरणानां प्रयोगशरणत्वोद्घोषः। तस्मात् विभागः पृथक्त्वं वा न भेदः। अभावरूपत्वेऽपि किमन्योन्याभावः, अत्यन्ताभावो वा। नाद्यः, प्रतियोग्यनिरूपणात्। न हि घटादिकमेव प्रतियोगीति वक्तुं शक्यम्। घटो नास्ति, घटो न भवतीति उभयत्रापि घटस्यैव प्रतियोगित्वेन अत्यन्तान्योभावयोः भेदो न स्यात्। उभयत्रापि घटत्वस्यैव अवच्छेदकत्वेन अवच्छेदकभेदस्याप्यभावाच्च। न च तद्भेदाभावेऽपि क्वचित्तादात्म्यारोपः, क्वचित्संसर्गारोप इति अरोप्यसंबन्धभेदाद्भेदः इति वाच्यम्। 'भूतले घटो नास्ति' 'भूतलं घटवन्नभवति' इत्यत्र उभयत्रापि संसर्गस्यैवारोप्यत्वेन भेदानापत्तेः। न चैकत्र संसर्गः संसर्गत्वेनारोप्यते, इतरत्र तादात्म्यत्वेनेति भेद इति वाच्यम्। संसर्गत्वतादात्म्यत्वयोर्भेदेन निर्वक्तुमशक्यत्वात्। नातो भेदः पारमार्थिक इत्युक्ताः शिष्याः पुनरूचुः—



"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥ [श्वे. उ. ४-६]
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम्।
अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥
[श्वे. उ. ८-४]

इत्यत्र जीवब्रह्मभेदस्य निश्चयात् कथं अभेदः सिद्धान्त इति वक्तुमुचितम्। तस्माद्भेद एव अङ्गीकर्तव्य इति प्राप्ते—

परमगुरुभिरेवमुच्यते—नेदं श्रुतिवाक्यद्वयं जीवपरभेदसमर्पणपरम्, किन्तु बुद्धिक्षेत्रज्ञभेदार्पणपरम्, तयोरेकस्थानाश्रितत्वात्। बुद्धिकोशे क्षेत्रज्ञस्य प्रतिफलनं जीव इति प्रसिद्ध्या जीवक्षेत्रज्ञयोः सर्वदाऽभेद एव। सजलघटेषु सूर्यप्रतिबिंबफलनमिव, दर्पणान्तःप्रतिबिम्बितमुखमिव भिदागन्धलेशरहिते जीवशब्दवाच्ये क्षेत्रज्ञे दर्पणमालिन्यान्मुखमालिन्यमिव जलमालि [न्यात् सूर्य] (न्यात बिम्ब) मालिन्यमिव कर्मफलान्यनुभवतः 'क्षेत्रज्ञस्य प्रतिबिम्बितस्य भिदा कल्पनीया॥ तेन बहुबुद्धिकोशे प्रतिफलनेन क्षेत्रज्ञबाहुल्यमुचितं वक्तुम्। घटदर्पणबाहुल्येऽपि सूर्यमुखयोरेकत्वं यथा, तद्वदभेद एव सिद्धान्तः। 'तत् सृष्ट्वा, तदेवानुप्राविशत्' [तै. उ. २-६] इत्यादिना प्रविष्टस्य ब्रह्मण एव क्षेत्रज्ञत्वात्। 'साक्षी नित्यः क्षेत्रज्ञः परमात्मा सत् ब्रह्म' इति ब्रह्मणि पर्यायशब्दाः॥ 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' [भ. गी. १३-३] इति भगवद्वचनाच्च। तस्मादद्वैतमेव सिद्धान्तः। द्वैतं तु मायाकल्पितं मोहकारणं जन्ममरणप्रवाहागाधजलप्रायमिति सिद्धान्तो [व्याससमतसिद्धः]। इष्टापूर्तादिकर्मशीलाः चन्द्रमसं धूममार्गद्वारा प्रविशन्ति। प्रथमं ते धूमस्थाने मेघोपरि तत्प्रदेशे धूमायिताः तदुपरि रात्रिं प्राप्य तदुपरि कृष्णवर्णा भूत्वा अयनं प्राप्नुवन्ति। तत्रापि कृष्णवर्णत्वात् तदुपरि देवोपभोगयोग्ये चन्द्रमसि स्थिताः ते [चन्द्रदेवात्मतां] (देवाः आत्मतां) प्राप्नुवन्ति। (किं वा) मण्डलैकदेशे इष्टादिकारिणो वसन्तीति यद्युच्येत तत्रेदमुच्यते—

'प्रथमां पिबते वन्हिः' इत्यादिना देवानां चन्द्रचन्द्रिकापानमात्रमेव। न तु (कृष्णवर्ण) चन्द्रबिंबानुभवः। अतो हेतोः तत्रस्थानां इष्टादिकारिणामपि (कृष्णवर्णत्वेन) देवोपभोग्यत्वं न संभवति। मण्डलाश्रयणमात्रमेव तेषाम्। तत्रानुभवस्तु देववत् अमृतपानरूपं न संभवति। किन्तु चन्द्रबिंबरूपममृतं दृष्ट्वा नित्यतृप्ता इव वर्तन्ते यावत्पुण्यम्। किञ्चिदवशिष्टे पुण्ये तत्र स्थातुमसमर्थाः पक्वफलगणा इव च्युताः (पञ्चाग्निविद्यामवलम्ब्य) पञ्चम्यामाहुतौ पुनः पुरुषाकारत्वं प्राप्य नित्यसंसारिण एव वर्तन्ते। तदन्ये तु यममार्गमवलम्ब्य स्वानि कर्माणि शोचन्तः सप्तविधनरकेषु पच्यन्ते यावत् कर्मफलम्। तस्मात् यूयं स्थूलशरीरस्य लयं सूक्ष्मे सम्यग्विधाय सूक्ष्मस्य च कारणे मनोमात्रे अन्तर्धानं कृत्वा मनसोऽपि विश्वकारणे अङ्गुष्ठमात्रपुरुषे विलीन [तां] संपाद्य तदुपर्यपरिच्छिन्नं ब्रह्म भूत्वा मुक्ता भवत। एवमुक्ताः सर्वेशिष्याः परमगुरुपादद्वयासक्तशीर्षा कृतार्थाः विदितब्रह्माणः जीवन्मुक्ता बभूवुः॥

॥ इत्यनन्तानन्दगिरिकृतौ मोक्षमार्गप्रकाशनं नाम प्रकरणं षट्षष्टिकम्॥

॥ ६७ ॥

## ॥ शैवमतस्थापनम् ॥

तदनु सर्वलोकैकसाक्षिचैतन्यानुभवविदितभूतभविष्यद्वर्तमानकालः परमगुरुः स्वतन्त्रपुरुषः शुद्धाद्वैतनिष्ठागरिष्ठान् सेतुहिमाचलमध्यदेशस्थान् अशेषान् ब्राह्मणादीन् कृत्वा तदीयसेवाङ्गीकारसमर्थां निजशिष्यपरम्परां आकल्पं [1]काञ्चीपीठादितत्तत्पट्टणस्थायिनीं कृत्वा तन्मूलादेव सकलशिष्येभ्यः मोक्षमार्गोपदेशं च कल्पयित्वा ततः कलावस्मिन् युगे नानापापविध्वस्तज्ञाना (विद्या) कुकुरेषु मर्त्येषु शुद्धाद्वैतविद्यायामनधिकारिषु वृत्तिः पुनरपि यथेच्छं विशृङ्खलं (भवति) [भविता] इति सम्यग्विचार्य लोकरक्षार्थं च वर्णाश्रमपरिपालनार्थं च मतकल्पनां जीवेशभेदास्पदां रचयितुमुपक्रम्य निजशिष्यं परमतकालानलं दृष्ट्वेदमाह—

1. म1, रा, मातृकयोः 'काञ्चीपीठादितत्तत्पट्टणस्थायिनीं कृत्वा इति अयं पाठः वर्तते। म2 मातृकायां तदनुसारिणीषु अन्यासु मातृकासु 'शृङ्गगिरिस्थानस्थां कृत्वा' इति वर्तते। तास्वेव मातृकासु भगवत्पादाः शृङ्गगिरिसमीपे तुङ्गभद्रातीरे चक्रं निर्माय तदग्रे परदेवतां सरसवाणीं निधाय ......काञ्चीनगरं प्राविशन् इति उक्तम् (६२-६३)। ततः पश्चात् काञ्चीनगरे श्रीकामाक्षीप्रतिष्ठां श्रीचक्रप्रतिष्ठां च कृत्वा तत्रैव वसतिं चक्रिरे इति उक्तम् (६५)। तदनु ६७ प्रकरणे 'निजशिष्यपरंपरां काञ्चीपीठादितत्तत्पट्टणस्थायिनीं कृत्वा' इत्युक्तिरेव आज्ञप्ती, न तु शृङ्गगिरिस्थानस्थामिति हेतोः पाठोऽयमत्र आदृतः



भो शिष्य! तव यत्प्रीतिः तद्वदस्व समासतः।
भाविकार्योचितवशात् तत्करोमि मतं तव॥

इत्युक्तः परमतकालानलः परमगुरुचरणारविन्दयुगं उत्तमाङ्गेन धृत्वा सर्वापराधं क्षमस्वेति कपोलताडनपुरस्सरं तिष्ठन् प्राञ्जलिरिदमब्रवीत्—भो स्वामिन्! परमगुरो! प्रत्यक्षतः शिवे जगत्कारणे चिरान्मम मतिः अतीव लग्ना। तथाहि—यदस्ति प्रपञ्चकारणं नित्यशुद्धबुद्धमुक्तस्वरूपमखिलमयं ब्रह्म सत्यं ज्ञानमनन्तं तदेव शिव इति बुद्धिस्थितं कृत्वा ध्वस्तसंशयोऽस्मि। अतः शिव एव ब्रह्म परिपूर्णं जगदुपादानकारणं इति निश्चयेन सर्वमपीदं परिदृश्यमानं जगत् शिवादनन्यवृत्त्या ध्यात्वा तदीयतेजःकणसञ्जातब्रह्मविष्णुरुद्रान् सृष्ट्यादि जगदवस्थाननिमित्तान् तत्तेजस्संभूतेन्द्रादिदिगधीशान् अर्कादिग्रहान् अश्विन्यादितारावलयीकृतकालचक्रं एतदन्तः सन्ततस्थगितभूम्यब्धिद्वीपगिरिप्रमुखान् अखिलं शिवांशमिति बहुधा युक्तियुक्तं विचार्य निरुपाधिकः परमेश्वर एव भवदुपदेशवशात् परमात्मा, स एवाहमिति समाहितेन मनसा वर्तमानस्यापि मे मतिरित्थं निश्चिनोति — वन्हिकाष्ठसंयोगजाताः विस्फुलिङ्गा इव परमशिवाज्जातमखिलं जगत् देवमनुष्यतिर्यग्जीवव्याप्तमिति। तस्मादीशांशाः किल जीवा इत्युक्त्या परमेश्वरः सर्वैरुपासनीयः इत्यागममतोऽस्मदभीष्टः पक्षः शैवः।

शिवध्यानपरा ये तु शिवभक्तावतन्द्रिताः।
लोकं यान्ति शिवस्यैव सर्वदेवनमस्कृताः॥

इति भारतवचनात् । ब्रह्मचर्यादिभिः शिवस्यैवोपासनं अत्यन्तपुण्यदं भोगमोक्षास्पदम् । अतः इदमेवाङ्गीकरणीयमिति सम्यग्विज्ञापितः परमगुरुः एवमेको मार्गोऽस्तु नाम, [ब्रह्म] अविदुषां अद्वैतमार्गसमारोहणासमर्थानां इति । प्राप्ते कलियुगे यूयमेतद्देवतानिरता भवत इत्येकेभ्यो मुनिभ्यो दत्तं गायत्रीशापं च प्राप्तमिदं विचार्य दिग्विजयाधिकारिणं निजशिष्यं ज्ञात्वा बहुकालं शैवमतं स्वावान्तरषड्भेदान्वितं लोकोपकाररूपं कल्पय इति तमवादीत् । स तु पुनः परमगुरुं प्रणम्य षड्विधभेदात्मकं शैवमतं रचयित्वा सेतुहिमाचलमध्यदेशवासिनो ब्राह्मणादीन् तन्मतावलंबिनः कर्तुं प्रतिपक्षजयार्थं च दिग्विजयमारभमाणः परमतकालानलः काञ्चीनगरात् प्रागादिदिङ्मार्गक्रमेण परमगुर्वनुज्ञया यात्रामारभमाणः भगवतः शङ्करस्य त्रिशूलांशजातोऽयं परमतकालानलः संन्यस्तसर्वकर्मापि धृतैकदण्डः हस्तकृतशूलकमण्डलुडमरुगः पश्यतां आविर्भूतशङ्कर इव समवर्तत ।

तमीक्ष्य केचिदद्भुतं गहनं शङ्करोदितम् ॥
गुरुणा तेन संप्रोक्तं शैवं रुचिकरं हि नः ।
शिक्षिता गुरुणा तेन वयं कैलासभागिनः ।
भवाम इति तच्छिष्या बभूवुः शैवमार्गगाः ॥

एवमशेषदिग्विजयं कृत्वा तत्तद्देशस्थान् कांश्चित् पञ्चाक्षरमहामन्त्रराजोपदेशमुखेन शैवानाचकार यतिः परमतकालानलः श्रीशङ्कराचार्यशिष्यः ॥

॥ इत्यनन्तानन्दगिरिकृतौ शैवमतस्थापनं नाम सप्तषष्टिप्रकरणम् ॥

॥ ६८ ॥

## ॥ वैष्णवमतस्थापनम् ॥

ततः परमगुरुः (त्रैगुण्यान्) [त्रैगुण्यविषयान्] कलियुगमनुजान् दृष्ट्वा शैवानन्तरं वैष्णवं मतं कल्पनीयमिति विचार्य (तत्संबद्धशेष [वासुकि] (सर्प) (वाय्वंश) जातौ) लक्ष्मणहस्तामलकौ स्वान्तरङ्गशिष्यौ विलोक्येदमाह—युवयोराशयं वदतमिति । तौ परमगुरुचरणारविन्दयुगलं सद्भक्त्या उत्तमाङ्गेन नत्वा कृताञ्जली इदमूचतुः—स्वामिन् ! भवदुपदेशात् अचिन्त्यमव्यक्तमनन्तरूपं सत्यं ज्ञानमनन्तं ब्रह्म सर्वकारणं तदेवाहमिति ज्ञानसिद्धावपि [अस] मदीयं चेतः सर्वदा नारायणचरणाब्जयाप्तमेव वर्तते । स एव ब्रह्मेति सहस्रप्रमाणसञ्जातः सिद्धान्तः अस्मदीयः । एवं शिष्यवचनं निशम्य पुनरवादीत् परमगुरुः — समीचीनं लक्ष्मण ! हस्तामलक ! युवां ब्रह्मचारिणौ किल । मतकल्पनाय संन्यासमद्य स्वीकुरुतं इति । तौ अत्यन्तसन्तुष्टचित्तौ तदानीमेव परमगुरूपदेशवशात् संन्यासिनौ अभवताम् । ताभ्यां वन्दितपादः परमगुरुः दयाम्बुधिः इदमाह — विष्णुमतं षड्विधभेदविराजितं सकलमनुज मोदकारणम्, (द्वि पञ्चमुद्रालिङ्गं) नारायणाष्टाक्षरमन्त्रोपदेशमूलं दृष्टादृष्टदोषविवर्जितं कल्पयतम् । एवं षड्विधं ज्ञानकर्मविभेदेन वैष्णवमतं कृत्वा दिग्विजयं कुरुतम्, पुनरागतयोः भवतोः सख्यमिव तद्भविष्यतीति । एवमाज्ञप्तौ मतकारणात् आचार्यौ लक्ष्मणहस्तामलकौ काञ्चीनगरात् क्रमेण पूर्वापराशाद्वयं अवलम्ब्य परमगुरुमनुदिनं स्मरन्तौ दिग्विजयं चक्राते । महीपूर्वभागे लक्ष्मणाचार्यः किल दिग्विजयं (कृत्वा कांश्चिद्ब्राह्मणादीन् सच्छिद्रोर्ध्वपुण्ड्रधारण शङ्खचक्राङ्कभासुरभुजयुगलान् कृत्वा बहुशिष्यसमेतः पुनरागत्य परमगुरुचरणं नत्वा तदनुज्ञावशात् मतविजृम्भणहेतुकं भाष्यादि ग्रन्थचयं)[1] अकरोत् । हस्तामलकस्तु भूमध्यात् पश्चिमखण्डदिग्विजयं कृत्वा (पञ्चमुद्राङ्कविराजितान्

1. शेषावतारभूतः लक्ष्मणार्यापरनामा विशिष्टाद्वैतभाष्यकर्ता गार्हस्थ्यात् संन्यासं प्राप्तः इति विशिष्टाद्वैतगुरुपरम्परा ग्रन्थे वर्तते । अत्र ब्रह्मचर्यात् संन्यस्तत्वेन उल्लिखितः न शेषावतारः नापि भाष्यकर्ता भवितुमर्हति ।

भगवदष्टाक्षरमन्त्रजपासक्तान् कांश्चिद्ब्राह्मणादीन् कृत्वा रजतपीठादिस्थलेषु कृष्णादिदेवप्रतिष्ठां कृत्वा)[1] स्वकृतं विज्ञापयितुं पुनः परमगुरुं प्राप। दृष्ट्वा तदानीं काञ्च्यां श्रीपरमगुरुं शङ्कराचार्यं नत्वा तत्पादयुगले स्वकृतं विज्ञापयामास।[2]

॥ इत्यनन्तानन्दगिरिकृतौ वैष्णवमतस्थापनं नाम प्रकरणं अष्टषष्टिकम् ॥

---

1. अतीतेषु प्रकरणेषु 'को वा प्रह्लादस्य चक्राङ्कनं कारयामास' इत्यत आरभ्य 'परं मोक्षमवाप्स्यासि' इति पर्यन्तभागेन (पृ. ६१) तप्तमुद्राङ्कनस्य बहुभिनिवेशेन खण्डितत्वात् अत्र तस्य प्रचारणोक्तिः पूर्वापरविरुद्धा। अतः अयं भागः तान्त्रिकवैष्णवाभिमानिभिः कैश्चित् प्रक्षिप्तः स्यात् इति भाति। अतीतयोः प्रकरणयोः (४-५) शैवमतनिराकरणावसरे तप्तमुद्राङ्कधारणं वेदविरोधात् निराकृतं, शैवमतस्थापनावसरे (६७) तप्तमुद्राङ्कधारणस्य प्रचारणोक्तिः नास्ति इति द्रष्टव्यम्।

2. इदमत्रावधेयम्—श्रुतिविरुद्धागमोक्तप्रकारेण शैव-शाक्त-गाणपत-वैष्णव-सौर-कापालिकमतप्रवक्तारः क्रमेण परमतकालानल (प्र. ५)–त्रिपुराकुमार (प्र. १५) - गिरिजापुत्र (प्र. १५) - विष्णुशर्म [शार्ङ्गपाणि - माधव-व्यासदास-नामतीर्थ] (प्र. ६,७,८,९,१०)- दिवाकर (प्र. १३) - वटुकनाथादयः (प्र. २३)। श्रुतिविरुद्धत्वात् हेतोः एतेषु मतेषु भगवत्पादैः निराकृतेषु ते सर्वे श्रुतिविरुद्धाचारं परित्यज्य नित्यकर्म कुर्वन्तः श्रीभगवत्पादानां शिष्या अभवन् इति उक्तं अतीतेषु प्रकरणेषु। श्रुत्यविरुद्धतया उपरिनिर्दिष्टमतस्थापनकाले परमतकालानल-त्रिपुराकुमार - गिरिजापुत्र - दिवाकर - वटुकनाथादयः एव क्रमेण शैव-शाक्त - गाणपत - सौर - कापालिकमतानि स्थापयितुं नियुक्ताः [प्र. ६७, ७०, ७१, ६९, ७२]। एतेन ये ये श्रुतिविरुद्धागमोक्तिमनुसृत्य शैवादिमतप्रवक्तारः आसन् त एव श्रुत्यविरुद्धशैवादिमतस्थापनार्थं नियुक्ता इति गम्यते। परन्तु श्रुत्यविरोधेन वैष्णवमतप्रचारणे नियुक्तौ [प्र. ६८] तु श्रुतिविरुद्धवैष्णवमप्रवर्तकाभ्यां भिन्नौ निर्दिश्येते। माधव - विष्णुशर्म - व्यासदासादयः एव श्रुतिविरुद्धागमोक्तिमनुसृत्य वैष्णवमतप्रवक्तारः आसन्। खण्डितमताः ते श्रीभगवत्पादशिष्या अभूवन्। त एव श्रुत्यविरोधेन वैष्णवमतप्रचारणाय नियोजनमर्हन्ति, शैवादिमतप्रचारणाय परमतकालानलादय इव। अत्र निर्दिष्टौ लक्ष्मणहस्तामलकौ पूर्वं वैष्णवमतप्रवर्तकत्वेन न निर्दिष्टौ, तेन तन्मतप्रचारणार्थं नियोज्यौ भवितुं नार्हतः। माधव - विष्णुशर्म - व्यासदासादीनां एव वैष्णवमत प्रचारणाय नियोजनमुचितं इति भाति ग्रन्थस्वरसात्। परन्तु लक्ष्मणः हस्तामलकः इति च नामविशिष्टौ ब्रह्मचर्यात् संन्यस्तौ द्वौ भगवत्पादशिष्यौ आस्तां इति परं पूर्वापरपर्यालोचनया सिद्ध्यति।

॥ ६९ ॥

॥ सौरमतस्थापनम् ॥

ततः परं सूर्यशक्तिगणपतिशिवनारायणानां ब्राह्मणोपासनयोग्यदेवतात्वात् तेषां समष्ट्युपासनया मुक्तेः [प्रमाण] सिद्धत्वात्, तत्र अनधिकारिभिः व्यष्ट्युपासनं वा कर्तव्यमिति कृत्वा शिवकेशवमतद्वयं प्रतिपादितम्। इदानीं सूर्याष्टाक्षरीमूलं सौरमतं षड्विधभेदविजृम्भितं स्थापयितुं परमगुरुः निजशिष्यं सर्वविद्याप्रवीणं दिवाकरनामानं समीक्ष्य इदमाह — भो दिवाकर! त्वं ब्रह्मचर्याश्रमव्रतं समाप्य परिव्राट् भव, सौरमतं रचयितुं इदानीं उचलितकालोऽयमागत इति तद्वाक्यं शिरसा परिगृह्य दिवाकरः तदानीमेव परमगुरूपदेशबलाद्धृतपरमहंसाश्रमः सौरमत(दर्शन)लक्षणं गुरुमुखात् श्रुत्वा तदनुज्ञावशात् आसेतुहिमाचलपर्यन्तं दिग्विजयमारभमाणः काञ्चीनगरात्प्रागादि प्रदक्षिणमार्गमवलम्ब्य किञ्चिद्दूरं गत्वा तत्र तत्र कांश्चिद्विप्रान् सौरमतप्रवर्तकानाचकार। एवमशेषदेशसञ्चारं कृत्वा तत्तद्विषयेषु सौरमतमुज्जृम्भयन् पुनः काञ्चीनगरं प्राप्य परमगुरुं नत्वेदमाह — स्वामिन्। तव कृपया सर्वदेशेषु सौरमतस्थापनं विधाय तत्प्रतिपक्षान् सर्वान् जित्वा भवद्दर्शनाय आगतोऽस्मीति। परमगुरुः तुष्टान्तरङ्गः समीचीनं भवता कृतमिति तमब्रवीत्।

॥ इत्यनन्तानन्दगिरिकृतौ सौरमतस्थापनं नाम प्रकरणं एकोनसप्ततिकम् ॥

॥ ७० ॥

॥ शक्तिमतस्थापनम् ॥

ततः परं परमगुरुः शक्तिमतं स्थापयितुं निजशिष्यवरं त्रिपुराकुमारं विलोक्येदमब्रवीत्—भो शिष्य! तव कुत्र मते विश्वासः तद्वद, इत्युक्तः त्रिपुराकुमारः

प्रणम्येदमब्रवीत्, — स्वामिन् परमगुरो! भवदुपदेशेन भगवानात्मा सर्वकारणम्, स एवाहमिति निश्चलज्ञानवतोऽपि ममान्तःकरणे विमर्श एव विश्वकारणं रोचते। तत्र भगवतो निमित्तकारणत्वमेव दृश्यते। ततः प्रकृतिरेव (बहिरावरण) शक्तिः अखिलकारणं, अस्मदादिपरिदृश्यमानजगति तथा दर्शनात्। शक्त्यभावे पुरुषस्याकिञ्चित्करत्वमेव भवति। अतश्च सोपाधिक एव भगवान् जगत्कारणम्। भवन्मतेऽपि न हि निरुपाधिकचैतन्यं जगत्कारणक्षमम्। तस्मात् प्रकृत्यभावे ईश्वरस्याप्यभावो वक्तुमुचित इव प्रतिभाति। किञ्च उभयमपि जगत्कारणं वेदितव्यम्। ईश्वराभावे प्रकृत्यभावे च लोकसृष्टिर्न स्यात्, पितृमातृभ्यामिव मनुष्यः। तत्रापि पित्रपेक्षया शिशुधारणनिर्गमनप्रयासस्य मातृनिष्ठत्वात् प्रथमं प्रकृतिः जगदुपादानकारणम्, पुरुषः पश्चादिति सिद्धान्तः। मदधिकारः एवं भगवत्कृपाबलात् प्रतिलब्ध इति सम्यग्विज्ञापितः परमगुरुः शिष्यवरं पुनःप्राह—

मतं भवदाशयरूपं कल्पयितुं संन्यासमथैव स्वीकुरुष्व इति। तदाज्ञां शिरसा परिगृह्य तदुपदेशवशात् संन्यासं पारमहंस्याख्यं प्राप्य दण्डकमण्डलुभ्यां विराजितकरः काषायवस्त्रशोभिततनुः शिष्यवरः त्रिपुराकुमारः परमगुरुचरणयुगलं अत्यन्तभक्त्या मुहुर्मुहुः प्रणम्य दिग्विजयार्थं काञ्चीनगरात् प्रागाद्याशामवलम्ब्य आविर्भूतत्रिपुरहर इव परमगुर्वनुज्ञया आसेतुहिमाचलमध्यभूमिस्थप्रौढविद्वज्जनान् निजशक्तिदर्शनात् जित्वा कांश्चिद्भक्तान् स्वदर्शनासक्तान् श्रीविद्यानिरतान् कृतार्थान् कृत्वा आशु काञ्चीनगरस्थं गुरुं अभिवाद्य स्वकृतमशेषं (प्रयोजनं) विज्ञाप्य शैववैष्णवसौरमताध्यक्षयतिस्थानगोऽभवत् ॥

॥ इत्यनन्तानन्दगिरिकृतौ शक्तिमतस्थापनं नाम प्रकरणं सप्ततितमम् ॥

॥ ७१ ॥

## ॥ गाणपत्यमतस्थापनम् ॥

एवं स्थापितेषु शैववैष्णवसौरशाक्तेषु गिरिजाकुमार इति प्रसिद्धः सर्वशास्त्रपारगः समागत्य परमगुरुचरणारविन्दयुगलं नत्वा विनयादिदमाह — स्वामिन्! ब्रह्मादिगणानां पतिः स्वामी गणपतिः सर्वलोककर्ता, 'अहमेक एव गणपतिः स्मानि,' 'गणानां त्वा गणपतिं हवामहे' इ(ति श्रुतेः) [त्यादि श्रुतिभ्यः]। किञ्च तस्य सर्वदेवपूज्यत्वं वर्तते। त्रिपुरसंहारकाले महादेवेन पूजितः। रावणासुर संहरणार्थं समुद्रमध्ये सेतुरचनाकाले रामेण पूजितः। क्षीराब्धिमथनकाले देवासुरैः पूजितः। सृष्ट्यादौ ब्रह्मणा पूजितः। एवं शिवकेशवब्रह्मादिभिरुपास्यः परमपुरुषः किल महागणपतिः। तस्य निर्गुणत्वं सगुणत्वं च सिद्धमेव। महदादितत्त्वकारणं निर्गुणम्। व्योमादिभूतकारणं सगुणम्। एवं सकललोकव्यापकचैतन्य (स्य) [रूपत्वात्] गणपतेः विष्णुनाम, बृहत्वात् ब्रह्मनाम, स्वच्छवर्णत्वात् लयकर्तृत्वाच्च रुद्रनाम च सिद्धं भवति। एवञ्च आकारत्रयेण सृष्ट्यादि स एव करोति इति दिक्।

शुक्लाम्बरधरं विष्णु शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

इति तस्यैव कर्मादौ पूज्यत्वस्य सिद्धत्वात् सर्वविद्यामयत्वाच्च। तस्मिन् ज्ञाते सर्वमिदं ज्ञातं भवति इति नित्यशुद्धबुद्धमुक्तस्वरूपं ब्रह्म गणपतिरेक एव। तस्मादस्मन्मतं अत्यन्तश्रेष्ठतरमिति कृत्वा तदेव सर्वैरङ्गीकर्तव्यमिति विज्ञापितम्। इतः परं सर्वज्ञैर्भवद्भिः परमगुरुभिः यदाज्ञापितं [भवति] तदेव करोमीति ब्रुवन्तं गिरिजापुत्रं शिष्यवरमीक्ष्य भगवान् परमगुरुरिदमब्रवीत्—भो शिष्यवर! गणपतौ आस्तिक्यबुद्धिरस्ति चेत् तन्मतं रचय। तदर्थं संन्यासी भव इत्येवमुक्तः शिष्योऽपि तदुपदेशवशात् परमहंसाश्रमी भूत्वा दिग्विजयार्थं काञ्चीनगरात्

प्राङ्मार्गमनुसृत्य सेतुहिमाचलमध्यभूमिषु स्वमतं प्रकाशयित्वा बहुगाणपत्यशिष्यसमेतः पुनः परमगुरुं नत्वा शिष्यस्थानमाप ।

॥ इत्यनन्तानन्दगिरिकृतौ गाणपत्यमतस्थापनं नाम प्रकरणं एकसप्ततिकम् ॥

॥ ७२ ॥

## ॥ कापालिकमतस्थापनम् ॥

एवं ब्राह्मणोपा[1]सनयो[2]ग्यपञ्चमतेषु स्थापितेषु कापालिको वटुकनाथ इति प्रसिद्धः समागत्य परमगुरुं बहुधा नत्वा विनयात् कृताञ्जलिरिदमाह—स्वामिन्! [3]मन्मतेन साकं अशेषमतभेदं कृत्वा शुद्धाद्वैतवृत्तिं हिमवत्सेतुमध्यभूमिषु आपूर्य सर्वान् ब्राह्मणादीन् अद्वैतदर्शनपरान् कृत्वा मर्त्यलोकेऽस्मिन् शुद्धाद्वैतवृत्त्याश्रितशैवादिपञ्चमतस्थापन[4]परोऽसि । मन्मतस्य[5] कश्चिदवकाशं चिन्तय, सर्वमतगुरु[6]र्वर्यस्त्वं इति दण्डवत् प्रणम्य कृताञ्जलिपुटं वटुकनाथमालोक्य परमगुरुर्भगवानिदमाह—भो शिष्य[7]! वेदसिद्धानामेषां शैववैष्णवसौरशाक्तगाणपत्यानां पूर्वपक्षवृत्त्या भवन्मतं रचय । तदभावे तेषां[8] सिद्धान्तता न घटत इत्युपदिष्टः स तु शिष्यो वटुकनाथः तथा करोमीति पुनरपि लोकगुरुपादारविन्दयुगलं नत्वा काञ्चीनगरात् [9]प्रागादिदिङ्मार्गमवलम्ब्य सेतुहिमाचलमध्यभूमिषु तत्र तत्र कांश्चिद्ब्राह्मणादीन् भैरवमतप्रवर्तकान् कृत्वा पुनः शीघ्रमागत्य

1, क. ०पासनार्थं पञ्चसु मतेषु स्था०
2. म₂. ०योग्येषु पञ्च०
3. क. मम मतेन समरेषु मतभेदं कृ०
4. क, म₂ ०न प्रद्रोऽसि
5. क. ०स्यतिविविरसावकाशं चिन्तय
6. क. ०रुः गतिस्त्वं
7. ०ष्य देवसिद्धा० रा. ष्य सिद्धा०
8. म₂. ०षां तवासनं जाघटीति इत्यु०
9. रा. प्राग्मार्गादिदिङ्०



रहसि यतिधर्माश्रितं परमगुरुं नत्वा स्वामिन्! भवत्कृपया कापालिकमतं मया केषुचिद्देशेषु प्रतिदेशं विजृम्भितमिति विज्ञाप्य मुख्यशिष्यपञ्चयतिसमीपे तद्दास इव समवर्तत[1] ।

॥ इत्यनन्तानन्दगिरिकृतौ कापालिकमतस्थापनं नाम प्रकरणं द्विसप्ततिकम् ॥

1. इदमत्रावधेयम्—भगवत्पूज्यपादाः अद्वैतस्थापनाचार्याः इति, तथा षण्मतस्थापनाचार्याः इति च प्रसिद्धाः । उपासनार्थं ब्राह्मणानुसरणीयत्वेन अत्र आनन्दगिरीयशङ्करविजये पञ्चमतानि उपदिष्टानि [*vide*: 'एवं ब्राह्मणोपासनयोग्यपञ्चमतेषु स्थापितेषु' प्र. ७२]. वैदिकानां गृहेषु अद्यापि पञ्चायतनपूजाक्रमः पारम्पर्येण प्रचलति । ब्राह्मणानुसरणीयं षष्ठं मतं वाचनिकतया नोक्तं आनन्दगिरीयशङ्करविजये । पराशरमाधवीये प्रसिद्धस्मृतिनिबन्धने आर्षवाक्यमनुसृत्य षण्मतानि परिगणितानि । कौमारमतेन षट्त्वसंख्यापूरणं दृश्यते [*vide*: दर्शनभेदश्च पुराणसारे वर्णितः—

शैवञ्च वैष्णवं शाक्तं सौरं वैनायकं तथा ।
स्कान्दं च भक्तिमार्गस्य दर्शनानि षडेव हि ॥

(Government Central Book Depot, Bombay, 1893) Vol. I, p.365] आनन्दगिरीयशङ्करविजये तु स्कन्दोपासनं भगवत्पादसंमतमित्यत्र किञ्चिद् दृश्यते । तथा हि—"स्नात्वा कुमारधारायां नद्यां शिष्यसमन्वितः । भक्त्या संपूजयामास षण्मुखं शेषरूपिणम्" इत्युक्तं ११ प्रकरणे । तथा च ब्राह्मणोपास्यत्वेन भगवत्पादसंमतानि स्कान्दमनन्तर्भाव्य षण्मतानि इति निष्कर्ष्टुं शक्यते । कापालिकमतं तु पूर्वपक्षरीत्यैव अनुमतम् । द्राविडदेशे द्रविडभाषायां शैवगेयप्रबन्धनिर्मातृषु मान्यः प्रधानः वागीशनामा प्राचीन शैवसमयप्रवर्तकः, तथा वैष्णवगेयप्रबन्धनिर्माता मान्यः शठकोपनामा विष्णुभक्तिप्रवर्तकाग्रगण्यश्च स्वप्रबन्धयोः षट्समयान् (அறுசமயம்) इति निर्दिष्टवतः । तथा तिरुमन्दिर (திருமந்திரம்) प्रबन्धकारः तिरुमूलयोग्यपि । ते षडपि समयाः ताभ्यां तिरुमूलरेण च आदरपूर्वकं अविरोधेन अनुसरणीयत्वेन निर्दिष्टाः । द्रविडनिघण्टुषु अन्यत्र च शैवसिद्धान्तव्याख्यानग्रन्थेषु तथा वैष्णवप्रबन्धव्याख्यानग्रन्थेषु च आर्हतबौद्धादिसमयानन्तर्भाव्य समयषट्कप्रतिपादनं दृश्यते । परन्तु पूर्वोक्तशैववैष्णवसमयप्रबन्धकारैः न तादृशं समयषट्कं उद्दिष्टं स्यात् । द्रविडशैववैष्णवप्रबन्धेषु आर्हतबौद्धादिसमयानां तीव्रनिन्दाखण्डनादिकं दृश्यते । विरोधभावं विना (*vide*: பிணக்கற அறுவகைச் சமயமும் நெறி உள்ளிஉரைத்த கணக்கறு நலத்தனன், அந்தமிலாதியம் பகவன், तथा அறுசமயத்து அவரவரை தேற்றும் தகையன तथा च ஒன்றது பேரூர் வழி ஆறு அதற்குள என்றதுபோல இருமுச்சமயமும்) प्राचीनशैववैष्णवप्रबन्धकारैः समादरणीयत्वेन निर्दिष्टं समयषट्कं एकाखण्डसच्चिदानन्दपरमात्मप्रापकत्वेन भगवत्पादाभिमतसमयषट्कमेव स्यात् इति स्वरसतया भाति ॥

॥ ७३ ॥

## ॥ गुरुस्तोत्रम् ॥

तदानीं सर्वे शिष्याः गुरुस्तुतिमेवं चक्रुः—तावत् पद्मपाद एवमब्रवीत्—

अद्वैतार्णवपूर्वदिग्भवविधुं विद्याप्रदं प्राणिनां
स्त्रियद्वागमृतानन्नं कृतधियां सन्देहशङ्कापहम् ।
भिद्यद्वैरिजनोक्तिपङ्क्तिमखिलाकल्पोक्तिसङ्घोद्गल-
न्माधुर्यामृतपानतृप्तमनिशं नौमि प्रसिद्धं गुरुम् ॥

यत्पादपङ्कजध्यानाल्लक्ष्मणाद्या मतेश्वराः ।
बभूवुः तादृशं वन्दे शङ्करं षण्मतेश्वरम् ॥

श्रीशङ्कराचार्यकल्पतरुः शुद्धाद्वैतमूलः, षण्मतशाखः, ज्ञानफलः, सन्ततं लोके विराजति ।

ततः परमतकालानलादयः यतयः इदमूचुः—

यः कर्ताऽद्वैतविद्यायाः ब्रह्मैवेदमिति तेः ।
आसीद्गुरुः स एवाद्य ह्यस्माकं द्वैतवादिनाम् ॥

त्वत्कटाक्षेण वयमप्युमेशादिमतानि हि ।
विरच्य लोकरक्षार्थं अभवाम कृतास्पदाः ॥

मदर्थमाभाति गुरुः परात्मा स एव चाहं विदिते तु तत्त्वे ।
अज्ञानतस्त्वं गुरुः अल्पबुद्धिः शिष्योऽहं एतत् खलु भेदजातम् ॥

अजा परेशस्य जगद्विमोहिनी विवेकिनामप्यपहन्ति संविदम् ।
तथाप्यभेदो न हि भाति सिद्धवद्विधिप्रभीतासुभृतां भिदेक्षया ॥

अपारमार्थिको भेदोऽप्यघौघग्रस्तचेतसाम् ।
कल्पितानि मतान्यद्य तत्तारणकृपावशात् ॥



तदभावेऽन्धमार्गेण चरन्त्येते विसंविदः ।
गुरो ! भवत्कटाक्षेण मार्गगा स्युः पुनः पुनः ॥

सर्वज्ञ युष्मद्गुणसङ्घमत्र शेषोऽपि नालं खलु वर्णनाय ।
किं युष्मदङ्घ्रयब्जनिषेवणाप्तज्ञानास्तथा त्वत्कृपयात्तवेषाः ॥

गुरो ! गरीयसी कीर्तिः तव लोके भवेत् सदा ।
षण्मताचार्यगुरुरिति अस्माभिः शिरसा धृता ॥

श्रीशङ्कराचार्यगुरुं परात्परं भजामहे सन्ततमिष्टसिद्धिदम् ।
इतीरयन्तः प्रणिपत्य सादरं तादात्म्यगाः [ते] (स्युः)
विगतद्विधाभयाः ॥

तदन्ये भानुमरीच्यादयः परमगुरुमाचार्यस्वामिनं नत्वेदमूचुः—

जीवेशयोर्भिदा मिथ्या ह्यद्वैतं सत्यमुत्तमम् ।
तद्दर्शनगुरुर्लोकगुरुः कु[गुरवः] परे ॥

अतो लोकगुरुं त्वां तु शुद्धाद्वैतं परात्परम् ।
नमामः सच्चिदानन्दं नित्यमव्ययमीश्वरम् ॥

अस्माकं यद्विज्ञानं अज्ञानेन प्रवर्धितम् ।
तन्नाशनं कुरु गुरो मोक्षदो भव सन्ततम् ॥

इत्युक्त्वा परमगुरुचरणारविन्दयुगलं नत्वा ढकातालवीणादिकराः कालातिक्रमविनोदं एवं चक्रुः । सद्गुरोः शङ्कराचार्यस्वामिनः कटाक्षवीक्षणलेशेनैव वयं कृतार्था नित्यमुक्ता भवाम इति निश्चिक्युः च ।

तं वन्दे गुरुमव्यक्तेशं व्यक्तजगत्कारण (मद्वयमिति) [मद्वैतम्]
नित्यं सत्यं ज्ञानमनन्तं शान्तमजं ध्रुवमक्षररूपम् ॥

तद्विज्ञानादिह सुज्ञानं प्राप्तमभूदचिरादस्माभिः ।
ये मूढा जीवे परभेदं जल्पन्तीह भवाब्धौ मग्नाः ।
नाना योनिषु जाताः पुनरपि मातुस्तनरसपानात् मत्ताः ।
बाल्यं पुनरपि कौमारं ते यौवनमुग्रत्स्थविरत्वं च ॥

संप्राप्यानन्तरकालागतमृत्युवशात् परलोकानुभवात् ।
सानुशयाः पञ्चमवन्ह्याहुति वारिमया [याः] पुरुषाका [राः] ॥
पुनरपि तद्गर्भावस्था [प्रा] पिततनुविवशाः पापात् [ते] ।
सुखफलमिच्छन्तस्तत्कारणमज्ञानान्नहि कुर्वन्तोऽपि ॥
दुःखप्राप्तिविधि[1]स्सा नित्यं भेदधियाङ्गीकृतसंसाराः ।
शुद्धाद्वयविज्ञानमरुच्यं तेषां घृतमिव रोगयुतानाम् ॥
[2]ये नष्टानेकजनिप्रारब्धाः तेषां [एव] अद्वैतमतिः [स्यात्] ।
परमव्ययमद्वैतं ब्रह्मैवाहं न तु किञ्चिज्ज्ञो जीवः ॥
न हि मे देहेन्द्रियसंयोगः मिथ्याभूतजनिप्रमुखः किम् ।
इह परलोकद्वयमपि न हि मे तत्त्वं पूर्णं संप्राप्तश्च ॥
स्थूलकलेवरमेतत् पञ्चीकृतभूतोत्थं लिङ्गान्तस्थम् ।
कृत्वा कारणदेहे तदपि च प्राणमतीत्य स विन्दुस्थाने ॥
अङ्गुष्ठे परमात्मनि लीनं प्रविधायान्तः परिपूर्णमजम् ।
[3]भूत्वा परमानन्दाकारः शुद्धाद्वैतफलानुभव द्वि ॥

एवं वर्तितुरिह परभीतिः न हि मे परमगुरोरुपदेशात् ।

[4]संसारस्यौषधं नित्यं यो न वेत्ति विमूढधीः ।
सगुणं निर्गुणं वाऽपि कोऽन्यस्तस्मादचेतनः ॥
अथ वा सर्वदेहेषु समवस्थितमीश्वरम् ।
यो न जानाति मूढात्मा कोऽन्यस्तस्मादचेतनः ॥
ब्राह्मण्यं प्राप्य लोकेऽस्मिन् मूको वा बधिरोऽपि वा ।
नापक्रामति संसारात् आत्महन्ता भवेत् स तु ॥
ब्राह्मण्यं प्राप्य दुर्बु(द्धे)[द्धिः] संसारे संभ्र(मं) [मेत्तु](त्यज)[यः] ।
तत्रापि न विरक्तः(स्त्वं) [सः] अधःपतनमृच्छ(सि)[ति] ॥

1. क, म2 विधिस्स्था । 2. क, ये किल नष्टाखिलपाप्मानः तेषामिति मेकरनिशं भाति ।
3. क. भूत्वाभयमान० 4. 'संसारस्यौषधं' इत्यत आरभ्य 'विमूढात्मा कोऽन्यस्तस्माद्०चेतनः' इति पर्यन्तोऽयं भागः क. पुस्तके वर्तते ।



ब्राह्मण्यं प्राप्य लोकेऽस्मिन् भेदज्ञानविमोहितः ।
आत्मानं न हि जानाति आत्महन्ता भवेन्नरः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् [1]न पिबेद्ब्रह्मसद्रसम् ।
तृष्णाशान्तिस्तस्य नास्ति बहुमातृस्तनोद्रसैः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् सद्गुरोरुपदेशतः ।
न जानाति परं ब्रह्म विना तं पतितस्तु कः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् मूलाधारादिचक्रगम् ।
ब्रह्ममार्गं न जानाति तं विना पतितस्तु कः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् [रोगा] (शूला) (ङ्गादिलयं) [ङ्गविकलं] न चेत् ।
नाङ्गुष्ठमीश्वरं वेत्ति तं विना पतितस्तु कः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् पूर्णमद्वैतलक्षणम् ।
न जानाति परं ब्रह्म तं विना पतितस्तु कः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् शुद्धाद्वैताश्रितो न चेत् ।
स याति मातृकोटीनां गर्भशय्यां विनष्टधीः ॥

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् शङ्कराचार्यमुत्तमम् ।
अद्वैतगुरुमीशानं न ध्यायेत् स तु पातकी ॥

1. क, म2, मातृकयोः, ०न पिबेत् ब्रह्मसद्रसं' इत्यनन्तरं
ब्राह्मण्यं प्राप्य लोकेऽस्मिन् न ध्यायेत् परमेश्वरम् ।
तस्य जन्म वृथा पश्चात् चण्डालो भवति ध्रुवम् ॥
कर्मज्ञानद्वयं लोके प्रमाणं वर्तते खलु ।
कर्मणोऽप्यधिकं ज्ञानं तद्वयात् पतितः च्युतः ॥ इति वर्तते ।

अद्वैतेन विना मोक्षो न जीवस्येति निश्चयः ।
तस्मादद्वैतमीशानं गुरुं वन्दामहे वयम् ॥

इति अनेकधा गुरुं स्तुत्वा प्राप्ततादात्म्यवैभवाः तूष्णीमासुः ॥

॥ इत्यनन्तानन्दगिरिकृतौ गुरुस्तोत्रं नाम प्रकरणं त्रिसप्ततिकम् ॥

॥ ७४ ॥

## ॥ सच्चिदानन्दैक्यम् ॥

ततः परं सर्वलोकगुरुः आचार्यः स्वशिष्यान् परमतकालानलादियतीन् तदन्यांश्च तत्र तत्र विषयेषु प्रेषयित्वा [1]तदनन्तरं समीपस्थं इन्द्रसंप्रदायानुवर्तिनं सुरेश्वराचार्यमाहूय भो शिष्य ! इदं मोक्षलिङ्गं चिदम्बरस्थ(ले)[लं प्रति] प्रेषय इत्युक्त्वा स्वयं स्वलोकं गन्तुमिच्छुः काञ्चीनगरे मुक्तिस्थले कदाचिदुपविश्य स्थूलशरीरं सूक्ष्मेऽन्तर्धा[प]य तद्रूपो भूत्वा सूक्ष्मं कारणे विलीनं कृत्वा चिन्मात्रो भूत्वा अङ्गुष्ठमात्रपुरुषः तदुपरि पूर्णमखण्डमण्डलाकारं आनन्दं प्राप्य सर्वजगद्व्यापकरूपचैतन्यमभवत् ।[2]

सर्वव्यापकचैतन्यरूपेणाद्यापि तिष्ठति ।
स एव शङ्कराचार्यो गुरुर्मुक्तिप्रदस्सताम् ॥

1. 'तदनन्तरं' इत्यत आरभ्य 'इत्युक्त्वा' इति पर्यन्तो भागः क. पुस्तके, म$_2$ मातृकायां तदनुसारिणीषु अन्यासु मातृकासु नास्ति। मार्कण्डेयसंहितायामुक्तिमनुसृत्य पाठोऽयमाहृतः अत्र । म$_1$, श, मातृकयोः पाठोऽयमुपलभ्यते ।

2. क. पुस्तके अधोनिर्दिष्टपाठः उपलभ्यते—तत्रत्या ब्राह्मणाः सर्वे शिष्याः प्रशिष्याश्च उपनिषद्गीताब्रह्मसूत्राणि सम्यक् पठन्तः अत्यन्तशुचिस्थले गर्तं कृत्वा तत्र गन्धाक्षतबिल्वपत्रतुलसीप्रसूनादिभिः सम्पूज्य तच्छरीरं समाधिं चक्रुः । ततः प्रत्यहं क्षीरतर्पणक्षीरान्ननिवेदनादिभिः सर्वोपचारैर्विधिवदभ्यर्च्य ततो महापूजादिने तुरीयाणां ब्रह्मविदां ब्राह्मणानां कर्मज्ञाननिष्ठानाम् उत्तमानाञ्च श्रीमदद्वैतविद्याप्रकाशकश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करगुरुस्वामिनमुद्दिश्य परब्रह्मणो धिया स्वाद्वन्नमूलशाकसूपभक्ष्यघृतदध्यादिसमस्तव्यञ्जनयुक्तमन्नं वस्त्राभरणैः साकमीश्वरपूजामेवं चक्रुः । पूजां सर्वत्रैवं चक्रु ।



आकल्पमेतत्परमार्थबोधं श्रीशङ्कराचार्यगुरोः कथार्थम् ।
सच्छिष्यमुक्तिप्रदमस्तु लोके संसेवितं चार्यजनैरभेदम् ॥

अनन्तानन्दगिरिणा गुरोर्विजयमुत्तमम् ।
रचितं ये तु गृह्णन्ति ते मुक्ताः स्युः न संशयः ॥

अद्वैतार्थप्रदं लोकैरद्वैतार्थानुचिन्तकैः ।
गुरुकीर्तिप्रदं शास्त्रमुपास्यं भवति ध्रुवम् ॥

जयतु सकललोकैः सेव्यमानो गुरुर्मे
विदितसकलवे(द)[द्य]ः शङ्कराचार्यनामा ।
मतविदखिलकर्माण्यन्तरायाणि हत्वा
दिशतु परमतत्त्वः भोगमोक्षं स एव ॥

चतुस्सप्ततिसङ्ख्यैः प्रकरणैः परिशोभितम् ।
गुरुदिग्विजयं नाम शास्त्रं जयतु भूतले ॥

[1][श्रीशङ्कराचार्यगुरोरिमं स्तवं समस्तपापौघविनाशहेतुकम् ।
पुमान् प्रयत्नेन पठत्यतन्द्रितः स याति शीघ्रं गुरुधाम मुक्तिदम् ॥

श्री शङ्कराचार्यगुरोर्महज्जयं अनन्तनाम्ना लिखितं प्रयत्नात् ।
तद्ब्रह्मविद्भिः परिशोधनीयं विचारणीयं परमार्थसिद्ध्यै ॥]

॥ इत्यनन्तानन्दगिरिकृतौ सच्चिदानन्दैक्यं नाम प्रकरणं चतुःसप्ततिकम् ॥

1. श. मातृकास्थपाठः ।

श्रीमच्छङ्करदिग्विजयग्रन्थस्य धनपतिसूरिकृतडिण्डिमाख्यटीकायां
श्लोकरूपेण सङ्कलितः
प्राचीन [आनन्दगिरीय] शङ्करविजयसारः ॥

॥ १ ॥

[अथ शिष्यवरैर्युतः सहस्त्रैः अनुयातः स सुधन्वना च राज्ञा ।
ककुभो विजिगीषुः एष सर्वाः प्रथमं सेतुमुदारधीः प्रतस्थे ॥]

[श्रीमच्छङ्करदिग्विजये १५-१]

अथ दिग्विजयकौतुकं सपरिकरं निरुपयितुमुपक्रमते—अथ-अनन्तरं पद्मपादहस्तामलकसमित्पाणिचिद्विलासज्ञानकन्दविष्णुगुप्तशुद्धकीर्तिभानुमरीचिकृष्णदर्शनबुद्धिवृद्धिविरिञ्चिपादशुद्धानन्तानन्दगिरिप्रमुखैः सहस्रैः शिष्यवरैर्युतः सुधन्वना राज्ञा चानुयातः सर्वादिशो विजिगीषुः स एष उदारधीः श्रीशङ्कराचार्यः प्रथमं सेतुं प्रति प्रतस्थे ।

अत्र प्राचीनानुरोधेन मध्यार्जुनं प्राप्य ततः सर्वाः ककुभो विजिगीषुः प्रथमं सेतुं प्रति प्रतस्थ इति व्याख्येयम् ॥

तथाहि—" श्रीशङ्कराचार्यो मध्यार्जुनं नाम शिव विभूतिस्थलविशेषं प्राप ।

'मध्यार्जुनेशानमदृष्टपूर्वं विध्यादिभिः पूजितपादपद्मम् ।
बुद्ध्योपचारैरभजत्परेशं [1]निष्पापतां प्राप फलैकपात्रम् ॥'

तत्र किल भगवाञ्छ्रीशङ्कराचार्यः सदाशिवमेवमब्रवीत् स्वामिन् मध्यार्जुन सर्वोपनिषदर्थोऽसि सर्वज्ञोऽसि तस्मान्निगमादितात्पर्यगोचरो द्वैतमद्वैतं वा इति संशयस्य सर्वेषां पश्यतां निवृत्तिं कुर्विति प्रार्थितो मध्यार्जुनेशो लिङ्गाग्रात् सावयवरूपेण निष्क्रम्य मेघवत् गम्भीरया गिरा दक्षिणहस्तमुद्यम्य सत्यमद्वैतं सत्यमद्वैतं सत्यमद्वैतमिति निरुक्त्वा लिङ्गाग्रेऽन्तर्दधे ।

---

1. निष्पापतां मोक्षफलैकपात्रम् ।

पश्यतां नराणां महदद्भुतमासीत् । तद्भक्ताश्च तद्देशस्थिताः श्रीशङ्करमेव-सद्गुरुं कृत्वा उमागणपतीशार्काच्युतार्चापराः प्रातःस्नानादिविशुद्धाः पञ्चयज्ञपरा-यणाः श्रुतिसंचोदिताचारगाः शुद्धाद्वैतपरायणा बभूवुः । एवं तद्देशस्थानद्वैत-वादिनः कृत्वा प्रमथैः शङ्कर इव शिष्यसमेतो रामेश्वरं प्रति जगाम" इति ॥

[*Vide*: *SDV*, p. 529 and *ASV*. ch. 4.]

॥ २ ॥

" रामेश्वरं रामकृतप्रतिष्ठं कामेश्वरीभूषितवामभागम् ।
माहेन्द्रनीलोज्ज्वलदुतिकिरीटं भीमेश्वरं त्वामिह पूजयामि ॥
इति गङ्गाजलैः शुद्धैः अर्चयामास शङ्करः ।
सुबिल्वैः पङ्कजैः पुष्पैर्वन्यैर्वन्यफलैस्तथा ॥
तत्र मासद्वयं वासं कृतवत्यार्य आगताः ।
अद्वैतद्रोहिणः शैवाः लिङ्गाङ्कितभुजद्वयाः ॥
फाले शूलाङ्किता रौद्राः भक्ता लिङ्गेन चिन्हिताः ।
डमर्वङ्कधरा बाहुद्वये तु उग्रास्तथा हृदि ॥
शूलं शिरसिलिङ्गं च धारिणो जङ्गमास्तथा ।
ललाटे हृदये नाभौ बाह्वोः शूलेन चिह्निताः ॥
गुरुं पाशुपता नत्वा प्रोचुः कारणमीश्वरः ।
शिवोऽतश्चिह्नसंयुक्तैः सेवनीयः प्रयत्नतः ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥
(द्यौर्मू)[द्यां मू]र्धानं यस्य वेदा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे ।
दिशः श्रोत्रे वाग्विवृताश्च वेदाः तं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥
इत्यादिवचनैरुक्ते शिवे भक्तिमतां यते ।
तस्य लोके भवेद्दासः शिवचिह्नाङ्कितात्मनाम् ॥



किं च कारणचिन्तायां शंभुराकाशमध्यगः ।
प्रोक्तस्तथा सुरैः पृष्टः कस्त्वमित्याह शंकरः ॥
अहमेकः पुरा देवा आसं मत्तो न चापरः ।
इदानीमहमेवास्मि सद्वयो जगदीश्वरः ॥
इति तस्माच्छिवःकर्ता सामान्यैरप्युदीरितः ।
सद्ब्रह्मात्मादिकैः शब्दैः उपादानतया प्रभुः ॥
वासुदेवः पुरा ह्यासीन्न ब्रह्मा न च शंकरः ।
इत्यत्र वासुदेवाख्यो महादेव इतीरितः ॥
वसत्यस्मिन् जगत्सर्वे वासुस्तेन प्रकीर्तितः ।
स चासौ देव इत्युक्तो जगत्कर्ता महेश्वरः ॥
शं सुखं जीवनं योऽसौ करोत्यस्य स शंकरः ।
पालको विष्णुराख्यातः स नाऽऽसीत् प्राकृते लये ॥
पाल्यस्याभावतः, अस्त्यत्र प्रमाणं कृष्णभाषितम् ।
रुद्राणां शंकरश्चास्मि, इत्येवं शिवरहस्यके ॥
महादेवस्य वाक्यानि मुनिं दुर्वाससं प्रति ।
सावधानतया तानि श्रोतव्यानि यतीश्वर ॥
अहमेकाक्षरः कर्ता परात्परतरः शिवः ।
सदात्मा ब्रह्मविष्णवोश्च लोकानामादिकारणम् ॥
पुराणः पूर्वगः पूर्वज्येष्ठः श्रेष्ठोऽहमद्वयः ।
मदिच्छारूपिणी शक्तिर्जगत्संहारकारिणी ॥
लीना मय्येव सा सृष्टा पुनः सृष्टौ मयाऽनघ ।
सा महत्तत्त्वमुत्पाद्य त्रिगुणाङ्कुरकारणम् ॥
अहंकारं समुत्पाद्य त्रैगुण्यं पूर्वतत्ववत्ः ।
गुणत्रयात्मिकान् कृत्वा रुद्रानेकादशाव्ययान् ॥
राजसान् सृष्टिकर्मार्थे कारयामास सादरम् ।

सात्विकान् पालनपरान् तामसान् प्रलयेश्वरान् ॥
क्रमादवर्णात् संजाता उवर्णश्च मवर्णतः ।
तेषु मुख्यतया ब्रह्मविष्णुरुद्रा इति त्रिधा ॥
अन्ये तदनुवृत्तिस्था एवमेकादशेश्वराः ।
तेषां विभूतयः सर्वे देवा लोकाश्चराचराः ॥
पृथक्पृथङ्नामगताः तत्तत्कर्मानुसारतः ।
ते सर्वे प्रलये ब्रह्मतेजस्येव लयं गताः ॥
राजसे रक्तवर्णे च, स तु ब्रह्मा समस्तभृत् ।
कृष्णे नारायणस्यैव तेजस्यस्तोऽभवत्पुरा ॥
रुद्रस्य शुक्लवर्णे तु न्यस्तो नारायणः स्वयम् ।
स तु रुद्रः प्रकृत्यन्तर्गतः शुक्लेन तेजसा ॥
मदिच्छा शुक्लवर्णा सा मय्येव विलयं गता ।
अतोऽस्म्यनन्तः सर्वार्थवेदैरपि न गोचरः ॥
वेत्ति कश्चिन्न मन्मायां जन्मस्थितिलयावहाम् ।
अतो रुद्रार्चनपरा रुद्रसूक्तजपाश्रिताः ॥
पञ्चाक्षरीजपपरा रुद्राक्षाभरणैर्युताः ।
भूतिभूषितसर्वाङ्गाः सदाध्यानपरायणाः ॥
ईश्वरं रुद्रमव्यक्तं व्यक्तरूपं जगत्त्रये ।
येऽर्चयन्ति नरश्रेष्ठाः तेषां मुक्तिः करेस्थिता ॥
अतस्त्वं भूतिरुद्राक्षधारणं कुरु सर्वदा ।
कुरु नित्यं महादेवपूजनं भक्तिसंयुतः ।
दुर्वाससे मुनीन्द्राय ह्येवमुक्त्वा सदाशिवः ॥
अन्तर्दधे तदाचारसक्तोऽभून्मुनिसत्तमः ।
इत्यतः परमात्माऽसौ सेवनीयो मुमुक्षुभिः ॥



नारायणोऽकामयताद्वितीयः प्रजाः सृजामीति ततो महान्ति ।
भूतान्यजायन्त तथा विधाता प्रजापतिश्चापि जनिं प्रयातौ ॥
अत्रापि नारायणशब्दवाच्यो महेश एवास्ति यतस्तु नारम् ।
ब्रह्मेन्द्रविष्ण्वादिनृणां समूहः स्थानं तदस्याखिलबुद्धिगस्य ॥
अस्यैवांशा विश्वदेवाः प्रमाणं त्वस्मिन्नर्थे वेद एवास्ति योऽसौ ।
ये भूम्यादौ सन्ति रुद्रा नतिः तेभ्यः सर्वेभ्योऽस्त्वेवमाह अतियत्नात्॥
कारणत्वेन ज्येष्ठत्वं तथा प्राह कनिष्ठताम् ।
कार्यात्मना यतो जातास्त्रिदेवा इति च श्रुतिः ॥
सत्यं ज्ञानमनन्तं यो गुहायां निहितं प्रभुम् ।
वेदेत्यादि श्रुतिप्रोक्तस्ततो देवो महेश्वरः ॥
निर्गुणोऽप्येष एवेशश्चिन्तयित्वाऽचिरं पुरा ।
सृजामीत्यात्मनस्तेजः सूर्याकारेण सृष्टवान् ॥
मनश्चन्द्रं तथा सत्वं भौमं सौम्यं तु वाङ्मयम् ।
गुरुं ज्ञानमयं देवं गुरुं शुक्लमयं सितम् ॥
क्लेशात्मकं शनिं चैव चकार परमेश्वरः ।
सूर्यादिमण्डलानीशतेजसा भान्ति न स्वतः ॥
न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥
इति श्रुतेस्ततो देवान्नारायणपदास्पदात् ।
ब्रह्मा प्रजायते विष्णुः प्रजापालनकृत्तथा ॥
आसीन्नारायणः पूर्वं नेशानो न विधिस्तथा ।
इति श्रुतौ विष्णुरुक्त ईशानो न महेश्वरः ॥

सर्वाभावेऽपि नाभावः परेशस्य कदाचन ।
जगत्कारणभूतस्य वेदवाक्यप्रमाणतः ॥
कर्मणा जायते लोकः कर्मणैव हि लीयते ।
इति वाक्याज्जगद्बीजं कर्मैवास्त्विति नोचितम् ॥
ईशं विना जडं कर्म फलदाने क्षमं न हि ।
ब्रह्माभावविदो निन्दा वेद उक्ता ततो न सः ॥
असन्नेव स भवति असद्ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥
इति तस्माज्जगत्कर्तुर्महेशस्य परात्मनः ।
उपासनं तथा तस्य चिह्नानां धारणं सुसत् ॥
इत्युक्त आचार्यवरो बभाषे
सृष्टिं स्थितिं नाशमथैक एव ।
ब्रह्मादिरूपेण करोति देवो
वेदार्थ एषोऽभिमतो ममापि ॥
मूलहीनं तु लिङ्गादेर्धारणं त्याज्यमेव हि ।
सर्वदेवालयस्यास्य तापः श्रेयस्करो न हि ॥
नाभेरूर्ध्वं सोमपास्तु नाभ्यधस्तादसोमपाः ।
देवास्तिष्ठन्ति विप्रेन्द्रे वेदवेदाङ्गपारगे ॥
शिखां शिरो ललाटं च कर्णौ घ्राणं कपोलकम् ।
जिह्वाग्रं च तथा चौष्ठौ चिबुकं कण्ठमेव च ॥
अंसद्वयं भुजद्वन्द्वं बाहुहस्तयुगं तथा ।
वक्षो नाभिं कटिं लिङ्गं वृषणं चोरुजानुकम् ॥
गुल्फौ पादौ समाश्रित्य मदाद्याः सर्वदेवताः ।
पितरो मुनयश्चैव स्नानाद्याहारमिश्रितैः ॥
नित्यादिकर्मभिस्तृप्ता भवामो नात्र संशयः ।



इत्येवं प्रोक्तवान् ब्रह्माऽरुणकेतुं प्रतीश्वरः ॥
श्रुतिस्तथोचे सकला हि देवाः वसन्ति देहे खलु भूसुरस्य ।
ततोऽस्य तापे तु कृते सुरास्ते पलाय्य संयान्ति शरीरतोऽस्य ॥
एनं शप्त्वा पलायन्ते देवाः शीर्षादिवासिनः ।
पतितोऽयं भवत्येव शूद्रवच्चितिकाष्ठवत् ॥
व्याधिं विना कर्मयोग्यविप्राङ्गे चिह्नमीक्ष्य च ।
लोकेश्वरं भानुमीक्षेदथवा ह्रदमाविशेत् ॥
इत्यादि वाक्यानि बहूनि सन्ति योऽन्यामितीयं श्रुतिरेव साक्षात् ।
उपासनं भेदयुतं विनिन्द्यं ब्रूते तथाऽन्या श्रुतिरेवमाह ॥
लोकान् हि सर्वान् खलु कर्मणा चितान्
नित्यत्वहीनानवलोक्य भूसुरः ।
निर्वेदमायान्न कृतेन लभ्यते
मोक्षोऽत आत्मज्ञमनन्यमानसः ॥
वेदार्थज्ञं ब्रह्मबोधाय गच्छेदित्येवं तस्माद्विमोक्षाय बोध्यम् ।
ब्रह्मैवान्यचिह्नसंधारणं तु व्यर्थं मुक्तिः केवलज्ञानतोऽस्ति ॥
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥
नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥
अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥
तस्मादुपाश्रित्य परात्मविद्यां प्राप्तां गुरोरेव कृपाकटाक्षात् ।
अभेदवादामृतपानतृप्तो भवेति संश्रुत्य गुरोर्मुखाब्जात् ॥

विद्वेषवीरनामा वै कश्चिल्लिङ्गभृदग्रणीः ।
उवाच परमप्रीतः स्वामिनं परमं गुरुम् ॥

स्वामिंस्त्वमेव शरणं मम सर्वदाऽसि
    संसारसर्पविषदष्टतनुं नयाऽऽशु ।
मामद्य युष्मदतिनिर्मलवेदवाक्यैः
    नष्टा भिदा, अस्मि शिव एव जगत्पिताऽ(हम्)[सि] ॥

महादेवस्य पूजायाः फलं त्वमसि मत्तम ।
अद्वैतामृतदाता त्वं रुद्रादप्युत्तमोत्तमः ॥

इत्येवं स्तुतिपात्रं तं स्तुत्वा नत्वा मुहुर्मुहुः ।
पीत्वा पादोदकं सम्यक् तदुक्ताचारतत्परः ॥

स्वकुलग्रामदेशस्थान् सर्वानद्वैतवर्तिनः ।
कृत्वा गुरुं नमस्कृत्य सुखमास स शंकरम् ॥

[*Vide*: *SDV*, pp. 533-36, and *ASV*, ch. 4.]

॥ ३ ॥

॥ शैवैकदेशमतनिराकरणम् ॥

ततोऽन्ये भूतिरुद्राक्षधारिणो लिङ्गचिह्निताः ।
प्रोचुर्विपक्षशूलाद्या दृष्ट्वा स्वामिनमद्भुतम् ॥
मायावेषधरः कस्त्वं प्रामाणिकमतादमुम् ।
भ्रष्टं कृत्वाऽधुना गन्तुं प्रवृत्तोऽस्यतिवञ्चकः ॥
ब्राह्मण्यादुत्तमं प्रोक्तं वैष्णवं मुनिसत्तम ।
वैष्णवादधिकं शैवमित्यजः प्राह नारदम् ॥
तस्मादारूढपतनं किमर्थं भवता कृतम् ।
नमस्त इति वेदेन स्तुतः सम्यङ्महेश्वरः ॥
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः ॥



इति श्वेताश्वतर्यां पुंसूक्तमुक्त्वोपसंहृतम् ।
ततस्तेनापि सर्वात्मा शिव एव निरूपितः ॥
पत्न्यौ ते ह्रीश्च लक्ष्मीश्च पार्श्वेऽहोरात्रके मते ।
इति वाक्यद्वयेनापि शिव एव निरूपितः ॥
गङ्गा ह्रीः पार्वती लक्ष्मीस्तत्पतिः शिव ईरितः ।
स्कान्दे च यामले चैव तद्वाक्यानि मुने शृणु ॥
हिमाग्रादपतन्मौलौ गङ्गा रुद्रस्य वेगतः ।
तदीयभारसंभ्रान्तो ह्यवादीत्तां सदाशिवः ॥
ह्रीमती भव नात्युच्चैर्वर्तसे प्राप्य मामिह ।
पुरुषं पुरुषश्रेष्ठं ब्रह्मविष्ण्वादिकारणम् ॥

सा तं नत्वा महादेवं तदाप्रभृति भक्तितः ।
ह्रिया (तं याऽऽशु) [जटासु] मिलिता ह्रीरिति प्रोच्यते बुधैः ॥
तस्याङ्क (मधुनाऽऽरूढा) [मञ्चमारूढा] शक्तिर्माहेश्वरी परा ।
महालक्ष्मीरितिख्याता श्यामा सर्वमनोहरा ॥
तस्यास्तेजःकणाज्जाता लक्ष्मीवाक्कोटयः पुरा ।
शिवतेजस्समुद्भूता हरिब्रह्मादिकोटयः ॥
क्रियन्ते पुनरेवैते तत्र तत्र लयानुगाः ।
इति तस्माच्छिवस्यैव तत्पतित्वं सुनिश्चितम् ॥
शुद्धस्फटिकसंकाशे दक्षिणे पार्श्वके मतम् ।
दिनत्वं रात्रिता वामे भागे देव्या मता यतः ॥
श्यामवर्णाऽपि चाथर्ववेदे सर्वात्मरूपताम् ।
नित्यानित्योऽहमित्यादिनाऽऽह स्वस्य सुराञ्छिवः ॥
जगत्कारणभूतस्य तथा शिवरहस्यके ।
ध्येयत्वादिकमाख्यातं शिवस्य परमात्मनः ॥
ध्येयत्वे तव साक्षिणो मुनिगणा ज्ञानप्रदत्वे शुको

वेद्यत्वे निगमाः स्वभक्तविमतक्रान्तौ कृतान्तादयः ।
नित्यत्वे भगवत्पितामहशिरस्स्रग्वृन्दमाद्यन्तयोः
शून्यत्वे च वराहहंसवपुषौ पद्माक्षपद्मासनौ ॥
एवं श्रुतिषु सर्वत्र जगत्कारणमीश्वरः ।
रुद्र उक्त इति ज्ञेयं न चैवान्यो विवेकिभिः ॥
तप्तलिङ्गादिरुद्राक्षविभूत्यादिकधारणात् ।
पीठाद्यर्चनया चैव रुद्राध्यायजपेन च ॥
सर्वपापविनिर्मुक्तः प्राप्नोति शिवरूपताम् ।
रुद्रकाण्डेऽयमर्थो हि सम्यक्त्वेन निरूपितः ॥
स्तेयं कृत्वा गुरुदारांश्च गत्वा
सुरां पीत्वा ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते सर्वपापैः ॥
कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते ।
बहुनाऽत्र किमुक्तेन यस्य भक्तिः शिवे दृढा ॥
महापा(पौघपापौघ) [पोपपापादि] कोटिग्रस्तोऽपि मुच्यते ।
इत्युक्तं शिवगीतासु पुनस्तत्र च कीर्तितम् ॥
धर्मार्थकाममोक्षाणां पारं यास्यथ येन वै ।
मुनयस्तत्प्रवक्ष्यामि व्रतं पाशुपताभिधम् ॥
कृत्वा तु विरजां दीक्षां भूतिरुद्राक्षधारणम् ।
जप्यतां वेदसाराख्यं शिवनामसहस्रकम् ।
संत्यज्य तेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ ।
ततः प्रसन्नो भगवान् शङ्करो लोकशङ्करः ॥
भवतां दृश्यतामेत्य कैवल्यं वः प्रदास्यति ।
इति कालाग्निरुद्रोपनिषद्यपि निरूपितम् ॥



अवश्यं ब्राह्मणैर्धार्या विभूतिरिति विस्तृतम् ।
अतो विभूतिमाहात्म्यं प्रवक्तुं केन शक्यते ॥
शीर्षे कण्ठे कर्णयोश्च बाह्वो रुद्राक्षधारणात् ।
नीलकण्ठो भवेन्मर्त्यो ब्राह्मणश्चेत्परात्परः ॥
इत्यगस्त्यस्य संप्रोक्तं संहितायां यतीश्वर ।
अतप्तात्मतनुर्नैव तद्धामैतीति मान्ततः ॥
लिङ्गाङ्कनमवश्यं वै कर्तव्यं मोक्षकाङ्क्षिभिः ।
इत्युक्त आह नैवात्र वह्नितापो विवक्षितः ॥
किन्तु कृच्छ्रादिकं तापः कृच्छ्रचान्द्रायणैः कृशः ।
इत्युक्तेर्नारदीयेन विरोधात् बृहता तथा ॥
लिङ्गाङ्किततनुं दृष्ट्वा शङ्खचक्राङ्कितं तथा ।
स्नानमेव तदा कार्यमथ वा सूर्यमीक्षयेत् ॥
पतितं तप्तलिङ्गाढ्यं चक्राङ्कितमथापि वा ।
वाङ्मात्रेणापि नार्चेत पाषण्डाचारतत्परम् ॥
शूद्रवत् स परित्याज्यो जीवन् शवसमाकृतिः ।
तस्मै दत्तं च हव्यं च कव्यं चापि वृथा भवेत् ॥
तद्दर्शनात् परित्याज्यं अन्नं मन्त्राभिमन्त्रितम् ।
अपि शूद्रेक्षणाद्भुञ्जेल्लिङ्गचक्राङ्कितं विना ॥
अपि चेन्निगमाचाररतो वेदाङ्गतत्परः ।
लिङ्गचक्राङ्कमात्रेण स सद्यः पतितो भवेत् ॥
इत्युक्तं हि बृहन्नारदीये किंच प्रकीर्तितम् ।
मार्कण्डेयपुराणे वै श्रोतव्यं तत्समाहितैः ॥
ब्राह्मणानां च गायत्र्याः संवादोऽभून्महान् पुरा ।
अतस्तयाऽतिसंशप्ताः पाषण्डाश्चैव देवताः ॥
वेदोक्तकर्महीनाश्च तान्त्रिकाचारतत्पराः ।

यूयं कलौ भवन्त्वेवमिति तानाह सा रुषा ॥
अतः कलियुगे प्राप्ते भविष्यन्ति द्विजाधमाः ।
वेदार्थहीनाः पाषण्डाः लिङ्गचक्रादिचिह्निताः ॥
ज्ञानकर्मपथाद्भ्रष्टाः कामक्रोधादिपीडिताः ।
दुरात्मानः सत्यधर्मवर्जिताः शापभागिनः ॥
कलौ त्रिंशत्सहस्राब्दे पुनर्नष्टा भवन्ति ते ।
निःशेषतां गताः पश्चात् अद्वैतार्थानुचिन्तकाः ॥
सत्यधर्मपरा भूयो भविष्यन्ति न संशयः ।
इति तस्मान्न कर्तव्यं लिङ्गादेर्धारणं नरैः ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
इति सत्यादिलक्ष्यस्योपास्त्यगोचरता मता ॥
ततो ब्रह्मावतारस्य शिवस्योपासनं श्रुतौ ।
प्रोक्तं तस्य निरासो नो कर्तुं केनापि शक्यते ॥
भूतिरुद्राक्षयोश्चापि कर्तव्यं धारण नरैः ।
किन्तु लिङ्गादिचिह्नानां धारणे मानशून्यता ॥
ततः प्रोवाच भक्ताग्रगण्यस्तं परमं गुरुम् ।
असमर्थाः पुरा देवास्त्रिपुरासुरनाशने ॥
इषुं ते कल्पयामासुः त्रिभिर्विष्ण्वग्निचन्द्रकैः ।
आदावग्निः शशी मध्ये विष्णुरन्ते प्रतिष्ठितः ॥
ततो विचारयामासुः क इषुं धारयिष्यति ।
रुद्रो धारयिता केचित् प्रोचुस्तत्र दिवौकसः ॥
यतो रुद्रस्य वह्न्यादि तेजः सकलमेव हि ।
तस्य नेत्रेऽग्निचन्द्रौ स्तो विष्णुस्तद्देहजः स्मृतः ।
सात्विकांशात् समुद्भूतः तस्माद्धारो न तस्य वै ।
इति देवा विचार्याऽऽशु प्रार्थयामासुरीश्वरम् ॥



सोऽब्रवीद्वरमिच्छामि देवाः कमिति चाब्रुवन् ।
सः उवाच अहं पशूनां वै प्रधानः स्यां पतिः किल ॥
ऊचुर्देवा वयं सर्वे पशवः पद्मजादयः ।
त्वमेकः पतिरस्माकमित्युक्त्वा ते सदाशिवम् ॥
लिङ्गशूलादिचिह्नानि धारयमासुरीश्वरः ।
ततो ज्यां वासुकिं कृत्वा मेरुं कृत्वा धनुर्धराम् ॥
रथं चन्द्ररवी चक्रे वेदानश्वान् विधाय च ।
ब्रह्माणं सारथिं कृत्वा स्तूयमानः शिवोऽमरैः ॥
बाणेन तेन तान् दैत्यान् ददाह परमेश्वरः ।
तस्माल्लिङ्गादिचिह्नानां धारणं युक्तमेव हि ॥
दर्शनाच्च तथा लोके सेव्यसेवकयोर्मुने ।
अस्माभिः सेवकैश्चिह्नं सेव्यस्य परमेशितुः ॥
अवश्यमेव संग्राह्यमित्युक्तः प्राह तं गुरुः ।
मानहीनमिदं वाक्यं यतो देवादिषु क्वचित् ॥
लिङ्गादेर्धारणं, नैव प्रसिद्धं किन्तु तेषु वै ।
भूत्यादेर्धारणं, किंच कैवल्योपनिषद्वचः ॥
श्रद्धाभक्तिध्यानयोगादवेहीत्येवं ब्रूते नैव शूलादिचिह्नम् ।
ज्ञानस्याङ्गं तेन नास्त्येव तस्य ज्ञानेप्सूनां धारणं भोः कदाऽपि ॥
नान्यः पन्था विद्यते कोऽपि मुक्त्या इत्याद्यैर्वै वेदवाक्यैर्मुमुक्षोः ।
नास्त्येवार्थो देहसंतापनेन निन्दा तस्य श्रूयमाणा हि शास्त्रे ॥
लोके राज्ञश्छत्रचिह्नं न भृत्ये दृष्टं शूलादेर्हि संधारणं चेत् ।
युष्माकं कोऽप्याग्रहस्तर्हि लौहं स्वीकर्तव्यं तेन तद्धार एव ॥
किंचास्य भक्तेन भुजादिभूषणं सर्पादिकं धार्यमनन्यचेतसा ।
परं तु नैतत् खलु युज्यते नरे सर्पभ्रमेणापि भयेन कम्पिनि ॥
तस्मादिमां पामरबुद्धिमाशु विहाय चिह्नं च समर्प्य कर्म ।
वेदोक्तमीशे परजीवयोश्चैक्यस्यानुसंधानमनन्यचित्तः ॥

कुर्वन्निबोधेन परस्य तस्याज्ञानस्य नाशेन भविष्यसि त्वम् ।
मुक्तो न चान्येन यथा कदापि इत्युक्तः स आचार्यवरं प्रणम्य ॥
चिह्नानि संत्यज्य सपुत्रबान्धवः शिष्यो बभूवाद्वयवादतत्परः ।
तथैव चान्येऽपि गुरोः प्रसादतो बभूवुरद्वैतपराः सुखार्थिनः ॥
[*Vide*: *SDV*, pp. 536-39 and *ASV*. ch. 5.]

॥ ४ ॥

॥ भक्तभागवतमतनिराकरणम् ॥

अनन्तशयनं नाम प्रदेशं प्राप्तवान् ततः ।
देवस्य दर्शनं कृत्वा मासमास स तत्र ये ॥
भक्ता भागवताश्चैव वैष्णवाः पाञ्चरात्रिणः ।
वैखानसाः कर्महीनाः षड्विधा वैष्णवा मताः ॥
तानाह शंकराचार्यः किं वो लक्षणमुच्यताम् ।
भक्ताः प्रथममाहुस्तं सर्वज्ञो जगदीश्वरः ॥
वासुदेवः सरामाद्यानवतारान् बिभर्त्यजः ।
तदुपास्त्या वयं मूढाः प्राप्स्यामस्तत्सलोकताम् ॥
इति बुद्ध्या वयं सर्वे कौण्डिन्यमुनिना प्रभोः ।
प्रसादितस्य सेवायामनन्तस्य सदा रताः ॥
आचारो द्विविधोऽस्माकं क्रियाज्ञानविभेदतः ।
कर्मठा ब्रह्मगुप्ताद्या, विष्णुशर्मादयो वयम् ॥
ज्ञानिनोऽत्रैव तिष्ठाम, इत्युक्तो ज्ञानलक्षणम् ।
पप्रच्छ, विष्णुशर्माऽथ प्राह तेषु विचक्षणः ॥
अनन्तभगवत्पादकमलं शरणं परम् ।
इति तूष्णीं स्थितिर्ज्ञानं यतो नैव तदाज्ञया ॥
विना तृणादिसंचारो भवतीत्युक्त आह तम् ।
जन्मना जायते शूद्रः कर्मणा जायते द्विजः ॥



नित्यं सन्ध्यामुपासीत प्रत्यवाय्यन्यथा भवेत् ।
प्रातरादिषु कालेषु ह्यग्निहोत्रादिकं बुधः ॥
कुर्वन् वै ब्राह्मणो विद्वान् सकलं भद्रमश्नुते ।
इत्यादि श्रुतिवाक्यानि नित्यं कर्म स्तुवन्ति हि ॥
अतः सर्वैः श्रुतिप्रोक्तं कर्तव्यं कर्म सर्वदा ।
वैधस्य तस्य संत्यागाद्दुःखस्यार्थि मनुर्जगौ ॥
जीवन् कर्मपरित्यागं यःकरोति नराधमः ।
स मूढो नरकं याति यावदाभूतसंप्लवम् ॥
यतीनामपि कर्मास्ति स्नानदेवार्चनादिकम् ।
ब्राह्मण्यहानिरेवातो भ्रष्टानां स्वीयकर्मतः ॥
अब्दैःकतिपयैरेवं स्थितिरित्युक्त आह तम् ।
विष्णुशर्मा, मया तुल्यः सप्तमः पुरुषः प्रभो ॥
किंचित्कर्मपरस्तस्य पिताऽभूदिति वै श्रुतं ।
बाल्ये मया, इति संप्रोक्तः प्राह दूरं व्रजाधुना ॥
एवमुक्तः स तु क्लेशापूरितः सगणस्तदा ।
प्रणम्य दण्डवद्भूमौ क्षमस्वेत्याह तं गुरुम् ॥
दृष्ट्वा तं शरणं प्राप्तं प्राह शिष्यान् दयानिधिः ।
प्रायश्चित्तविधानार्थे तेऽपि कुर्युस्तथैव हि ॥
प्रायश्चित्तेन संशुद्धा विष्णुशर्मादयोऽपि ते ।
कर्मनिष्ठास्तमाचार्यं प्रोचुस्त्वत्कृपया प्रभो ॥
ब्राह्मण्यसिद्धिरस्माकं जाता मुक्तिः कथं भवेत् ।
इत्युक्त आह परमो गुरुः करुणयाऽन्वितः ॥
ब्राह्मणाचारदेवाः स्युः ईशो विष्णुर्दिनेश्वरः ।
उमागणपतिश्चैव तेषां पूजापरा नराः ॥
ब्रह्मार्पणधिया कामान् त्यक्त्वा कर्म चरन्ति वै ।

एवं कृते नित्यकर्मण्यमले मनसि प्रभोः ॥
जीवस्य च भिदाभावो भवत्येव न संशयः ।
मूलाज्ञानस्य तत्तस्मान्निवृत्तिर्ज्ञानकारणम् ॥
तेन भग्ने लिङ्गदेहे मुक्तिर्भवति नान्यथा ।
इत्यादिष्टो विष्णुशर्मा दण्डवत् प्रणिपत्य तम् ॥
सगणः कारयमास नित्यं कर्म गुरुं स्मरन् ।
स्मार्ताचारपरिश्रान्तः पञ्चपूजाविशारदः ॥
त्रिपुण्ड्रं भस्मना कुर्वन् चन्दनेन (च सुव्रतः) [सुसंवृतः]।
स्नात्वा मृत्तिकया चोर्ध्वपुण्ड्रं कुर्वन् प्रयत्नतः ॥
एवं तेषु निरस्तेषु ब्रह्मगुप्तादयस्ततः ।
समागत्य प्रणम्य ऊचुः स्वामिन् स्मार्तेन वर्त्मना ॥
कुर्वन्तो वयमाचार्य कर्म ब्रह्मार्पणं धिया ।
कृत्वा वयं वसामोऽत्र इत्युक्तः स प्राह तान् गुरुः ॥
इतः परं पञ्चपूजातत्पराः शुद्धमानसाः ।
भेदवासनया मुक्ता भवन्तः स्वात्मबोधतः ॥
लिङ्गदेहेन निर्मुक्ताः सच्चिदानन्दमद्वयम् ।
प्राप्नुवन्तीति संप्रोक्ताः नत्वा तं स्वस्थमानसाः ॥
बभूवुः, अथ तं प्राह समागत्य परं गुरुम् ।
कश्चिद्भागवतो विप्रः स्वामिन् शृणु मतं मम ॥
सर्ववेदेषु यत् पुण्यं सर्वतीर्थेषु यत् फलम् ।
तत्फलं नर आप्नोति स्तुत्वा देवं जनार्दनम् ॥
इत्यादिवचनाद्विष्णोः कीर्तनेऽहर्निशं रतः ।
शङ्खचक्रादिसंचिह्नैः चिह्नितस्तुलसीगलः ॥
ऊर्ध्वपुण्ड्री वसाम्यत्र मुक्तिर्मम करे स्थिता ।
इत्युक्त आह मा चक्राद्यङ्कनस्य विनिन्दानात् ॥



किंच मूर्तिर्भगवतश्चतुर्धा वर्तते शृणु ।
परैकाऽऽकाशरूपा स्यात् वचसामप्यगोचरा ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
इत्यादिश्रुतिवाक्येभ्यो द्वितीया व्यूहसंज्ञिका ॥
सर्वलोकात्मिका तस्य विष्णोश्चिह्नस्य धारणम् ।
समर्थश्चेत् कुरुष्वाऽऽशु तप्तेनैकेन वा दृढम् ॥
शीर्षादिपादपर्यन्तं देहमङ्क्य नाशतः ।
तस्य सेत्स्यति ते वैष्णवत्वं यद्दुर्लभं नृणाम् ॥
विभूतिमूर्तयस्तस्य मत्स्याद्याः परिकीर्तिताः ।
तप्तलोहमयीभिर्वै ताभिरङ्क्य देहकम् ॥
किमर्थं जडशङ्खादेः कर्तव्यं चिह्नधारणम् ।
विष्णुवल्लौहचक्रादेर्धारणं कुरु वा सदा ॥
अर्चामूर्तेः शिलामय्याः स्वरूपेणाथ वाऽङ्क्य ।
शरीरं मूढ तस्मात् त्वं कर्तव्यं चिह्नधारणम् ॥
विष्णोरिति विहायाऽऽशु पाषण्डमतिमाश्रय ।
स्वकर्माणि फलं तेषां समर्पय परेश्वरे ॥
तेन शुद्धस्ततोऽद्वैतवादिनं गुरुमाश्रय ।
तस्योपदेशतो नष्टकर्मबन्धो विमोक्ष्यसि ॥
नान्यः पन्था विद्यते मुक्तये ही इत्युक्तं श्रुत्या तेन बोधेऽतियत्नः ।
कार्यो मोक्षाकाङ्क्षिभिः शुद्धचित्तैरित्युक्तोऽसौ विप्रदेवो यतीशम् ॥
सम्यङ्नत्वा प्राह पुण्यैरनेकैः [युष्मत्] (भवत) पादाम्भोजयोर्दर्शनं मे ।
जातं तस्मान्मां कृतार्थं कुरुष्व इत्येवं तेन प्रार्थितोऽसौ बभाषे ॥
भो विप्रदेवाऽऽशु विहाय चिह्नं कर्माणि कुर्वन् खलु कामहीनः ।
ब्रह्माहमस्मीति विभाव्य त्वं मुक्तो भविष्यस्यवबोधतोऽद्धा ॥

[*Vide*: *SDV*, pp. 539-40 and *ASV*. ch. 6.]

॥ ५ ॥

## ॥ वैष्णवमतनिराकरणम् ॥

पुनरन्यो गुरुं प्राह शार्ङ्गपाणिरिति श्रुतः ।
नमो नारायणायेति मन्त्रमुच्चारयन् पुनः ॥
तस्य मुद्रादिकैः शङ्खचक्राद्यैः सुचिह्नितः ।
संसारबन्धनान्मुक्तो वैकुण्ठं वैष्णवोत्तमः ॥
गमिष्यामि यतस्तत्र तथाभूता वसन्ति तत् ।
चिह्नस्य धारणे मानं पुराणं शृणु भो मुने ॥

ये बाहुमूलपरिचिह्नितशङ्खचक्रा ये कण्ठलग्नतुलसीनलिनाक्षमालाः।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्राः ते वैष्णवा भुवनमाशु पवित्रयन्ति॥

इत्युक्त आचार्य उवाच मैवं श्रुतेरभावात् कथनीयमत्र ।
अतप्तदेहो न समश्नुतेऽयं विमोक्षं एषा श्रुतिरस्ति मानम् ॥
नैवं यतः पातकनाशनार्थं महत्तपः कृच्छ्रमुखं स्वकर्म ।
यद्वाऽथवा ध्यानमधीश्वरस्य प्रोक्तं श्रुतौ चिह्नमतो न कार्यम् ॥
ब्रह्मज्ञो यः सोऽश्नुते मोक्षमित्यादेर्वाक्यात् मोक्षस्य हेतुर्विबोधः ।
क्षीणे पुण्ये मर्त्यलोकं विशन्ति इत्यादेर्वाक्यादन्यतः संसृतिः स्यात् ॥
पुराणेषु बृहन्नारदीयादिषु निषेधनम् । दृश्यते तप्तशङ्खादेर्धारणस्य प्रयत्नतः ॥

चिह्नानां धारणेनाहं भविष्यामि हरेः समः ।
इत्येतत्तु मनोराज्यमात्रं शूद्रो यथा न हि ॥
शिखायज्ञोपवीतादिधारणादेव सद्द्विजः ।
ब्रह्मात्मबोधतस्तस्मात् तत्प्राप्तिः श्रुतिमानतः ॥
तस्मात् ब्रह्माहमित्येवं चिन्तनं सर्वदा कुरु ।
तेन नष्टे भिदा गन्धे जीव एव परः शिवः ॥
शिवः शिवोऽहमस्मीति वादिनं यं च कंचन ।
आत्मना सह तादात्म्यभागिनं कुरुते भृशम् ॥



इत्युक्तं शिवगीतासु इत्युक्तो वैष्णव आहतम् ।
नमस्कृत्य कृतार्थोऽहं स्वामिन् त्वदुपदेशतः ॥
अधुनाऽद्वैतनिष्ठोऽहं भविष्यामीति सोऽब्रवीत् ।
ननाम दण्डवद्भूमौ तं प्राह गुरुसत्तमः ॥
मुक्तो भवेति सोऽप्युक्तः स्मार्ताचारेषु तत्परः ।
पञ्चपूजारतो नित्यं स्वदेशस्थान् जनानपि ॥
तथा अकरोत्............

[*Vide: SDV*, pp. 540-1 and *ASV*, ch. 7.]

॥ ६ ॥

## ॥ पाञ्चरात्रमतनिराकरणम् ॥

........ ततः पाञ्चरात्रागमसुदीक्षितः ।
आह (मुक्ति) [मूर्तिं] प्रतिष्ठादिमूलभूतोऽस्मदागमः ॥
तस्मात् यते अयमाचारो विप्रैःकार्योऽखिलैरपि ।
इत्युक्तः श्रीगुरुःप्राह यदि वेदाविरुद्धता ॥
अस्त्यागमे तदा तस्याऽऽचारो ग्राह्यः न चान्यथा ।
अन्यमन्त्राग्रहे तत्र वैष्णवत्वं प्रकीर्तितम् ॥
गायत्र्या उपदेशस्तु ब्राह्मण्याय अस्ति सर्वथा ।
एवं च वैष्णवत्वस्य भङ्ग एव समागतः ॥
तदभावे न विप्रत्वं विष्णुमन्त्रशतैरपि ।
वैष्णवत्वं कुतोऽस्त्यस्याः सत्त्वे ननु हरेरियम् ॥
शक्तिः शङ्खादिवत्त्वस्य श्रवणादिति चेत्तदा ।
रुद्रस्य शक्तिरेवास्तु चन्द्रशेखरतादिकम् ॥
श्रूयतेऽस्या यतः पञ्चमुखत्वाद्यं च देहगम् ।
अस्तु वा सर्वसंपूज्या शुभदा परमेश्वरी ॥
ननु सूर्ये स्थितस्यास्यां प्राधान्यं तेजसो यतः ।
निरूप्यते, ततो विष्णोः शक्तिरेव, यतो हरिः ॥

भानुमण्डलवर्तीति वर्ण्यते तत्र तत्र ह ।
पञ्चास्यतापि नो [1]तस्मिन् बहुरूपे विरुध्यते ॥
इति चेन्न यतस्तस्याः समुत्पत्तिर्निरूपिता ।
व्याहृतिभ्यः किलाऽऽसां तु प्रणवात् सा महेश्वरात् ॥
अस्य प्रोक्ताऽत एतस्य शक्तिर्नान्यस्य कस्यचित् ।
नारायणश्रुतौ प्रोक्तः स्वरकर्ता महेश्वरः ॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥
अष्टमूर्तिमहेशस्य मूर्तिरादित्य ईरितः ।
तस्मात् तस्यैव शक्तिः सा पञ्चवक्त्रादिसंयुता ॥
वैष्णवेन त्वया एवं नो शिवमूर्तिर्विभावसुः ।
सेव्योऽतो ब्राह्मणत्वस्य हानिरेव तवाऽऽगता ॥
तद्भावोऽस्तु का हानिः वैष्णवोऽस्मीति चेत्तदा ।
भ्रष्टोऽसि भाषणाऽयोग्यो जीवन्नेव मृतोऽसि भोः ॥
ततस्तु माधवः कश्चित् वैष्णवः प्राह तं गुरुम् ।
तप्तशङ्खादिकं धार्यं लोकं प्राप्नोति वैष्णवम् ॥
पाञ्चरात्रागमे प्रोक्तमित्येवं तस्य मानता ।
त्वदुक्त्या नाशमायाति इत्युक्तः प्राह परो गुरुः ॥
आगमाद्युक्त आचारो ग्राह्यो वेदानुकूलतः ।
विरोधे तस्य न ग्राह्यः उक्तं चेदं स्फुटं किल ॥
अतीन्द्रियार्थविज्ञाने प्रमाणं श्रुतिरेव हि ।
श्रुत्याचारमृतेऽग्राह्यताऽऽगमानां प्रसज्यते ॥
अतो वेदविरुद्धं यत्तन्मानं न कदाचन ।
अतो ब्राह्मण्यसिद्ध्यर्थं स्वकर्मनिरतो भव ॥

1. बहुरूपत्वात् विष्णोः पञ्चास्यताया अपि सम्भवे पञ्चवक्त्रेरपि पञ्चास्यत्वमविरुद्ध-मिति भावः



तेन सम्यग्विशुद्धस्सन् तत्त्वज्ञानमवाप्स्यसि ।
मुक्तिस्तस्मान्न चान्यस्मादत्रार्थे त्वं श्रुतिं शृणु ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥
तस्मात्पाषण्डचिह्नानि विहाय अद्वैतनिष्ठता ।
संपाद्या मोक्षसिद्ध्यर्थमित्युक्तः स च माधवः ॥
स्वकुलग्रामदेशस्थैः सह अद्वैतपरः सदा ।
सन्ध्याग्निहोत्रमुख्यानि कुर्वन् कर्माणि शुद्धताम् ॥
प्राप श्रीशङ्कराचार्यप्रसादात्...........

[*Vide*: *SDV*, pp. 541-2 and *ASV*, ch. 8.]

॥ ७ ॥

॥ वैखानसमतनिराकरणम् ॥

..................................तत आगतः ।
वैखानसमताचारो व्यासदास इति श्रुतः ॥
उवाच भो यते ब्रह्माऽप्यस्मत्पक्षनिवारणे ।
न समर्थो यतो देवः परो नारायणो मम ॥
तद्विष्णोः परमं धामेत्यादिवेदेन बोधिता ।
नारायणपदस्यैव श्रेष्ठता मुनिसत्तम ॥
तथा नारायणाद्ब्रह्मा जायते रुद्र एव च ।
इत्यादिश्रुतिभिस्तस्य कारणत्वमुदीरितम् ॥
तस्मात् सेव्यः सदैवायमन्तर्यामी परेश्वरः ।
लक्षणं तस्य भक्तस्य प्रोक्तं वैखानसे मते ॥
शङ्खचक्रपवित्राङ्गः ऊर्ध्वपुण्ड्रः इति प्रभो ।
इत्युक्तः प्राह विष्णुस्तु पालको वाऽथ ब्रह्म वा ॥

अस्तु तत्र विवादः कः पदं तु आवृत्तिवर्जितम् ।
लभ्यते तत्त्वबोधेन नैव तु अन्येन हेतुना ॥
यदि त्वं विष्णुभक्तोऽसि तदा तत्प्रीतये कुरु ।
कर्म नैव तु तप्तानां चक्रादीनां विधारणम् ॥
प्रमाणाभावतो वेदविरुद्धे नैव मानता ।
आगमे विप्रतानाशो नो चेत्स्यादेव सर्वथा ॥
इत्युक्त आह तं व्यासदासः पूर्वयुगे मुने ।
दत्तात्रेयः परो योगी पञ्चमुद्राविमुद्रितः ॥
आसीत् तस्मान्महद्भिः स्वीकृतो मार्गो मुमुक्षुभिः ।
ग्राह्यः किञ्च पुराणेषु चक्रादेर्धारणं श्रुतम् ॥
अन्यथा वैष्णवत्वस्य हानिरेव समापतेत् ।
तस्माद्भगवतश्चिह्नं धार्यमित्युदितो गुरुः ॥
उवाच भो विवेकस्ते किमु वाच्योऽस्ति, बालकाः ।
अपि जानन्ति, मुद्राभिरङ्कने न प्रयोजनम् ॥
दत्तात्रेयस्य नैवास्ति योगिनस्तत्त्वदर्शिनः ।
मुद्राङ्किततनुर्दत्तात्रेयोऽस्तीति केनचित् ॥
श्रुतं नैव ततो मूढबुद्धिं त्यक्त्वा सुखी भव ।
पुराणेषु श्रुतं चिह्नधारणं त्विति नोचितम् ॥
प्रह्लादस्य विभीषणस्य गजराजस्य ध्रुवस्याऽऽनिलेः
द्रौपद्या व्रजवासिनां च खलु कश्चक्राङ्कनं रे अकरोत् ।
तस्मान्मूढमतिं विहाय सकलं पाषण्डचिह्नं त्यज
ब्रह्मास्मीति विभावनेन सुसुखं गच्छाऽऽशु मोक्षं पदम् ॥
अवश्यं चेत्त्वयाकार्यं चिह्नानां धारणं तदा ।
कपोलयोर्गले चैव शेषेण गरुडेन च ॥



अङ्कनं कुरु कर्मेन्द्रियप्रधाने भुजद्वये ।
कपोलद्वितये चैव ज्ञानेन्द्रियसमीपगे ॥
चिह्निते पशुवद्वतुं योग्यो भव विबन्धनः ।
तथा च एवं विधस्यात्र वैष्णवस्य स्वकर्मणा ॥
हीनस्य शुभ्रवस्त्राणां धारणं त्ववशिष्यते ।
न तु कर्माग्निहोत्रादीत्युक्तः संप्राह सद्गुरुम् ॥
स्वामिन् तव प्रसादेन सविवेकोऽस्मि नाङ्कितः ।
किं तु मे गुरुरेवाऽऽसीत्तथेति भगवन् श्रुतम् ॥
ततः शुद्धाद्वयस्थं मां कुरु त्वं यतिशेखर ।
इति विज्ञाप्य तं भूमौ दण्डवत् प्रणिपत्य च ॥
कृताञ्जलिं समासीनमीषन्नम्रं विलोक्य सः ।
करुणानिधिराचार्यः प्रहसन्निदमब्रवीत् ॥
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावय ।
तस्मिन्विधावशक्तस्त्वं वाक्यमेतदुदीरय ॥
इत्यभ्यासपरित्यक्तद्वंद्वैषणषडूर्मिकः ।
विदित्वा परमात्मानं मुक्तो भवसि नान्यथा ॥
इति संबोधितःशिष्यः कृतार्थोऽहमितीरयन् ।
ब्रह्माहमिति संजल्पन् ययौ स्वकुलसंयुतः ॥
[*Vide : SDV*, pp. 542-3 and *ASV*, ch. 9.]

॥ ८ ॥

॥ कर्महीनवैष्णवमतनिराकरणम् ॥

तत आचार्यमागत्य नामतीर्थो हि वैष्णवः ।
कर्महीन इदं प्राह भोः स्वामिन् शृणु मे मतम् ॥

शेषणाप्यप्रकम्प्यं वै सर्वं विष्णुमयं जगत् ।
इत्यादेशात् यतो मोक्षं गुरुरेव प्रयच्छति ॥
तदानीं भगवन्तं स गुरुः प्रार्थयते प्रभो ।
मच्छिष्यं निजपादारविन्दं प्रापय सोऽप्यथ ॥
एवमुक्तः करोत्येव तथैव जगदीश्वरः ।
तस्मान्मम पुनर्जन्महेत्वभावो यतीश्वर ॥
जीवन्मुक्तोऽहमेवं वै भवन्तोऽपि मुमुक्षवः ।
कर्महीनाः सुरेशं तं विष्णुं सर्वमयं प्रभुम् ॥
समालम्ब्य अञ्जसा मुक्ता भविष्यन्तीति निश्चयः ।
एवमुक्तो गुरुः प्राह सत्यमुक्तं त्वया मतम् ॥
कर्मभ्रष्टो भवान् जीवन्मुक्त एव न संशयः ।
निन्द्यानिन्द्यविहीनस्सन् प्रवृत्तोऽसि पिशाचवत् ॥
वेदोक्तसर्वकर्माणि कृत्वा तेषां फलार्पणम् ।
कर्तव्यं ब्रह्मणीत्येवं ज्ञानमार्गोऽयमीरितः ॥
फलार्थं कर्मकरणं कर्ममार्गोऽस्ति तद्विधात् ।
भ्रष्टस्त्वं दण्डनीयोऽसि विष्णुभक्तोऽपि नो भवान् ॥
न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ।
न जहाति न च हन्ति किञ्चिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तम् ॥
श्रुतिस्मृती ममैवाज्ञे ते उल्लङ्घ्य प्रवर्तते ।
आज्ञाभङ्गी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥
आज्ञाच्छेदी मम द्रोही स याति नरकं सदा ।
इत्यादिवचनेभ्योऽतः कर्मत्यागो न शस्यते ॥
ब्राह्मणः कर्म कुर्वीतेत्यादिवाक्यान्न कर्मणः ।
त्यागो देवान्तरत्यागो ब्राह्मणानां न चास्ति हि ॥



अग्निर्देवो द्विजातीनामिति वाक्यात्ततस्तु भोः ।
ब्रह्मचार्यादिकैः सर्वैः कर्म त्यक्तुं न शक्यते ॥
सन्ध्यालयातिक्रमदोषशान्तिः कृच्छ्रत्रयेणास्ति ततो द्विजत्वम् ।
तत्त्यागतो नैव न कर्मणेति श्रुतिस्तु संन्यासममुष्य वक्ति ॥
इत्युक्तोऽसौ नामतीर्थैः प्रणामैः प्रीतं कृत्वा कर्मशीलो बभूव ।
एवं सर्वे खण्डनं स्वस्वपक्षस्य श्रुत्वा ते निष्कृतिं संविधाय ॥
शुद्धाद्वैतालम्बिनः सत्रिपुण्ड्राः वेदप्रोक्ताचारनिष्ठा बभूवुः ।

[*Vide : SDV*, pp. 543-4 and *ASV*, ch. 10.]

॥ ९ ॥

## ॥ हिरण्यगर्भमतनिराकरणम् ॥

तस्मात् सुब्रह्मण्यसञ्ज्ञं कुमारस्थानं प्राप श्रीगुरुः पञ्चघस्रैः ॥
स्नात्वा कुमारधारायां नद्यां शिष्यसमन्वितः ।
भक्त्या संपूजयामास षण्मुखं शेषरूपिणम् ॥
काषायवस्त्रदण्डाढ्यः कमण्डलुलसत्करः ।
भूतिभूषितसर्वाङ्गो बभौ रुद्र इव स्वयम् ॥
नानादेशस्थविप्रौघाः सुब्रह्मण्यं समागताः ।
दृष्ट्वा तं शङ्कराचार्यमिदमूचुः सुविस्मिताः ॥
द्विजा वयं ब्रह्मकुलोद्भवाः प्रभो मनुप्रभृत्युक्तसुकर्मतत्पराः ।
हिरण्यगर्भार्चनलब्धमानसप्रशुद्धयः स्थैर्यमुपागतास्तथा ॥
हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
इत्यादिमन्त्रात् सकलस्य कर्ता ब्रह्मा तथा पालक एष एव ।
लयस्य कर्ता निखिलोत्तमश्च सर्वाधिकानन्दकरूप उक्तः ॥
स एव सृष्ट्वा निखिलं जगत् प्रभुः प्रविश्य सर्वात्मतया स्थितो वै ।

तदैक्षत इत्यादिवचोभिरीरितः करोति विष्णुं च शिवं भुजाभ्याम् ॥
तदीयभक्ताः किल योगनिष्ठाः कर्मस्थिताः कूर्चकमण्डलुश्रिताः ।
वयं यतिं वीक्ष्य भवन्तमद्धा जाताः कृतार्थाः शृणु भोस्तथाऽपि ॥
वचोऽस्मदीयं भगवन् प्रयोजनं किमस्त्यभेदेन यतश्चतुर्मुखात् ।
जनिं गतो जीवगणः स्वकर्मणा पुनः पुनः संसृतिमेति दुःखदाम् ॥
ततो लये ब्रह्मण एव कुक्षौ लयं प्रयात्येष लयस्य काले ।
मोक्षोऽन्यथा ब्रह्मविदेष याति परं पदं ब्रह्मण एव लोकम् ॥
तस्माद्भवान् दण्डकमण्डलुश्रितः तल्लोकयोग्यो यतिशेखरो गुरुः ।
इत्युक्त आचार्य उवाच शङ्करो ब्रह्मादिभूतानि यतो भवन्ति तम् ॥
ज्ञात्वा विमुक्तिर्भवतीति हि श्रुतौ प्रोक्तं ततस्तस्य विबोधकारणम् ।
वेदान्तवाक्यश्रवणादिकं सदा कार्यं विमोक्षो हि लयो न कीर्तितः ॥
सुषुप्तितुल्यो न च लभ्यते परः कार्यस्य हि ब्रह्मण एव सेवनात् ।
श्रुत्वैवमाचार्यमुखाद्विहाय ते चिह्नानि शुद्धात्मविबोधतत्पराः ॥
शिष्या बभूवुः........

[*Vide: SDV*, pp. 541-5 and *ASV*, ch. 11.]

॥ १० ॥

॥ वन्हिमतनिराकरणम् ॥

........तत आगताः तं प्रोचुर्गुरुं वह्निमतानुवर्तिनः ।
स्वामिन् वयं वह्निपरा यतो वै मन्त्रेण देवोऽयमुदीरितोऽस्ति ॥
अग्निरग्रे प्रथमो देवतानां (संया) [संज्ञा] तानामुत्तमो विष्णुरासीत् ।
यजमानाय परिगृह्य देवान् दीक्षया एतं हविरागच्छतं नः ॥
ततश्च विस्फुलिङ्गात्ममणेः शकलधारणम् ।
कृत्वा मुक्ता भविष्यन्ति ब्राह्मणा वह्न्युपासकाः ॥
अग्निर्देवो द्विजातीनामिति वाक्याद्यतीश्वर ।
अग्निर्देवो न चान्योऽस्ति किञ्च पापहरः श्रुतः ॥



उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम ।
पशूंश्च मह्यमावह जीवनं च दिशो दिश ॥
अतः सर्वैर्द्विजैरग्निरेव सेव्यः प्रयत्नतः ।
कृतकृत्या भवन्तु अस्मात् भवन्तोऽप्यस्य सेवया ॥
इत्युक्त आह देवानामवमो वह्निरीरितः ।
परमो विष्णुराख्यातो देवास्तन्मध्यगाः स्मृताः ॥
तथा च अग्निः सुराणां वै भागदः कर्मदेवता ।
अग्निकारणवाक्यानि भूतात्माग्निपराणि तु ॥
तस्मात् यूयं वह्न्यधीनं हि कर्म कुर्वन्तोऽस्मिन् विष्णुमाराधयन्तः ।
शुद्धाद्वैते तत्परा यास्यथ अद्धा मुक्तिं प्रोक्ता एवमाचार्यवर्यैः ॥
नत्वा सर्वे स्वीकृताद्वैतनिष्ठाः स्वस्था जातास्ते सुहोत्रादयोऽन्ये ।

[*Vide: SDV*, pp. 544-45 and *ASV*. ch. 12.]

॥ ११ ॥

॥ सौरमतनिराकरणम् ॥

तत्र अथाऽऽगत्याऽऽहुराचार्यवर्यं भक्ता भानोर्मण्डिताः रक्तपुष्पैः ॥
दिवाकरादयः पूर्णमण्डलाकारमाश्रिताः ।
तिलकं शृणु भोः स्वामिन्नस्मदीयं मतं ध्रुवम् ॥
सूर्यः प्रोक्तः सर्वलोकस्य चक्षुः श्रुत्वा तस्मात् सोऽस्ति विष्ण्वादिरूपः ।
सृष्टिस्थित्यादेः स हेतुश्च तस्मात् आदित्योऽसौ ब्रह्म चेत्याह वेदः ॥
श्रीघृणिः सूर्य आदित्योमिति वेदे मनुः श्रुतः ।
स्युरस्योपासका रक्तचन्दनाश्रितमस्तकाः ॥
तन्मालालङ्कृतग्रीवाः षड्विधाः सूर्यसेवकाः ।
उद्यन्तं मण्डलं केचित् कारणं ब्रह्मरूपिणम् ॥

भजन्त्याकाशमध्यस्थमीशरूपेण केचन ।
जगल्लयस्य हेतुं तं तेनैवोपक्रमोऽपि च ॥
उपसंहारकेणेति विनिश्चित्य भजन्ति तम् ।
केचित् केचित्तु विष्ण्वात्मकत्वेन अस्तमये प्रभोः ॥
बिम्बं पालकमेतस्मादेव सृष्ट्यादिकारणम् ।
त्रिमूर्त्यात्मतया कालत्रये बिम्बस्य सेवकाः[1] ॥
केचिदन्ये तु तन्मण्डलेक्षणव्रतधारिणः ।
हिरण्यश्मश्रुकेशादियुक्तं तन्मण्डले स्थितम् ॥
भजन्ति किंच तत्रैकदेशिनस्तु तदीक्षणम् ।
कृत्वा संपूज्य पाद्याधैरन्नमश्नन्ति नान्यथा ॥
केचित्तु तप्तलोहेन फाले भुजयुगे तथा ।
वक्षस्थले च चिह्नानि मण्डलस्य विधाय ते ॥
अनुक्षणं मनस्येवं ध्यायन्तः सन्त्युपासकाः ।
सर्वैरेतैरुपास्योऽयमुक्तमन्त्रो यतीश्वर ॥
श्रुतयः सन्ति तन्मण्डलस्तुतिप्रतिपादकाः ।
बह्वृचः पुरुषसूक्तेऽपि भानुरेव निरूपितः ॥
सर्ववेदनिरूप्यत्वात् पुरुषं कृष्णपिङ्गलम् ।
इत्यादि रुद्रमन्त्रे पुरुषशब्दोऽपि तत्परः ॥
अरुणः सूर्यभानू च चन्द्रस्तपन एव च ।
मित्रो हिरण्यरेताश्च रव्यर्यमगभस्तयः ॥
विष्णुर्दिवाकरश्चेति संप्रोक्तादित्यमध्यगः ।
विष्णुरुक्तस्ततो विष्णुः स एवास्ति न चापरः ॥
आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान् ।
इति कृष्णेन संप्रोक्तं किंच ब्रह्मादिका विभोः ॥
सूर्यादेव समुत्पन्नाः तस्मात् सर्वैर्मुमुक्षुभिः ।
अयमेव समाराध्य इति प्रोक्तः परो गुरुः ॥

1. अत्र उचितः पाठः पृ. ७४ द्रष्टव्यः ।



उवाच शृणु भो मूढ दिवाकर वचो मम ।
चन्द्रमा मनसो जातः सूर्यस्तस्य तु चक्षुषः ॥
इति वेदेन जन्यत्वं यस्योक्तं तदनित्यता ।
तर्कसिद्धान्ततोऽनित्ये ब्रह्मता कथमागता ॥
सूर्यनिष्ठपरब्रह्मबोधिकाः श्रुतयस्तु ताः ।
जगदीशाज्ञया सूर्यो भ्रमतीति श्रुतं स्फुटम् ॥
भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥
न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥
इति श्रुत्या परेशस्य भासा भानं प्रकीर्तितम् ।
सूर्यादेस्तु तथा प्रोक्ता ज्योतिःशास्त्रेऽप्यनित्यता ॥
सृष्टिः सरोजासनवासरादौ वियच्चराणां विलयस्तदन्ते ।
आद्यन्तकालः स च कल्प उक्तः कल्पद्वयं (तद्दिवसं) [स्यात्
दिवसः] विरिञ्चेः ॥
एवंभूतस्य सूर्यस्य जनकत्वं त्वयेरितम् ।
ब्रह्मादिकस्य तस्मात्ते विद्या त्वत्यन्तशोभना ॥
तस्मादेकः परात्मैव सूर्यस्थो निगमैः स्तुतः ।
ततः पाषण्डचिह्नानि विहायाऽऽचारतत्पराः ॥
शुद्धाद्वैतस्य बोधेन मुक्ता भवत भो द्विजाः ।
इत्युक्तास्ते गुरुं नत्वा सर्वे तच्छिष्यतां गताः ॥

*[Vide : SDV,* pp. 545-6 and *ASV,* ch. 13.]

॥ १२ ॥

॥ गुरुस्तुतिः ॥

ततस्तत्राऽऽगतैर्विप्रैः सर्वैरपि यतीश्वरः ।
समाजितो ययौ तस्मात् वायोराशां जयेच्छया ॥

शिष्येषु त्रिसहस्रेषु केचित्तं शङ्खपूरणैः ।
केचिद्वाद्यविशेषैश्च केचित्तालैः शुभोक्तिभिः ॥
केचिद्घण्टानिनादैश्च करतालैश्च केचन ।
केचिद्व्यजनवातैश्च पिच्छवातैश्च केचन ॥
समर्चयन्ति संन्यस्तसुखदुःखं यतीश्वरम् ।
तत्तद्देशगताविप्रा दृष्ट्वा तच्छिष्यतां गताः ॥
एवं प्रतिदिनं गत्वा तत्र तत्राऽऽगतान् द्विजान् ।
कुमतस्थान् परानन्दभाजः कृत्वा शुभोक्तिभिः ॥
पुरं गणवरं प्राप गणपत्याश्रमं शुभम् ।
तत्र नद्यां हि कौमुद्यां स्नात्वा विघ्नेशमव्ययम् ॥
संपूज्य यतिराट् तत्र मासमास सहानुगैः ।
पद्मपादमुखाः शिष्याः पञ्चपूजापरायणाः ॥
दिग्गजा इति विख्याताः परविद्याप्रभेदिनः ।
परपक्षक्षये युक्तवचसः प्रौढवादिनः ॥
तद्वाक्यं शिरसाऽऽगृह्य शिष्योऽन्यः पुरजिद्ध (लः) [ली] ।
निय (तः) [न्ता] सर्वशिष्याणां पाकादिषु च कर्मसु ॥
समर्चयन् गुरुं भिक्षां दत्वा तस्मै परात्मने ।
पद्मपादस्तथाऽन्येषां शिष्याणां षड्रसैर्युतम् ॥
अददाद्भोजनं नित्यं ब्रह्मार्पणमिति स्मरन् ।
सायन्तने गुरुं शिष्याः तमाचार्यशिरोमणिम् ॥
द्विषड्धा तं नमस्कृत्य ढक्कातालकराः शिवम् ।
स्तुवन्तो नृत्यमाचक्रुः परेशं सच्चिदद्वयम् ॥
प्रपूर्णं ब्रह्माहं निखिलजनकं बुद्धिनिहितं
चिदानन्दं सत्यं सकलजगदाधारममलम् ।



अगम्यं वागाद्यैः सुजितकरणैर्ज्ञातमनघैः
सुनिर्वाणं लब्ध्वा यदिह न पुनः संसृतिरयः ॥
जल्पन्त एवं बहुधा सुनृत्यं कुर्वन्त आचार्यसमीपसंस्थाः ।
प्रीतिं गतास्तस्थुरुदारचित्ता हर्षेण युक्ता निखिला विनेयाः ॥

[*Vide*: *SDV*, pp. 546-7., and *ASV*, ch.14.]

॥ १५ ॥

॥ गणपतिमतनिराकरणम् ॥

एवमानन्दसंतुष्टमाचार्यं सेवकानपि ।
तत्पट्टनद्विजाः प्रेक्ष्य किमेतदिति चाब्रुवन् ॥
नहि युष्मन्मतं सम्यगिव भाति हि पश्यताम् ।
आकाशवन्निरालम्बमद्वयं ब्रह्म केवलम् ॥
मनोवागादिवृत्तीनामगोचरतरं परम् ।
कथमज्ञोपबोधाय योग्यं स्यान्मतमीदृशम् ॥
तन्यक्त्वाऽस्मन्मतं सम्यगाचरन्तु शुभाप्तये ।
गाणपत्यमिति ख्यातं षड्भिर्भेदैः समन्वितम् ॥
समस्तवेदतात्पर्यैः तदेव हि समीरितम् ।
तदाच (रत) [रध्व] मत्यन्तशान्तिदं मोक्षदं नृणाम् ॥
तुण्डैकदन्तचिह्नाभ्यां चिह्नितं शक्तिसंयुतम् ।
महागणपतिं यस्तु सदा ध्यायत्यनन्यधीः ॥
तन्मूलमन्त्रपठनपरः सन् ब्राह्मणोत्तमः ।
यो वर्तते स एवात्र मोक्षभाग्भवति ध्रुवम् ॥
ध्येयो वल्लभया स [पद्म] (चन्द्र) क (ल) [र] याऽऽश्लिष्टो
ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश इष्टार्थदः ।

इत्येवं गणनायकः खलु जगत्सृष्ट्यादिकर्तेरितो
युक्तं चैतदजादिकस्य विलयेऽप्यस्मिन् स्थिते हीश्वरे ॥
आसीद्गणपतिस्त्वेक इति श्रुत्या प्रकीर्तितः ।
ब्रह्मादिकगणेशोऽयं तस्मादखिलकारणम् ॥
तन्मायया विरचिता ब्रह्माद्या जगदीश्वराः ।
इत्युक्त आह भो मूढ गजास्यः कारणं कथम् ॥
किंच रुद्रसुतत्वेन प्रसिद्धः कारणं पितुः ।
कथं भवेदतो ब्रह्म कारणं श्रुतिमानतः ॥
ब्रह्म वा इदमित्यादिवाक्यतस्त्वत्समीरितम् ।
वाक्यं ब्रह्मपरं नेयमित्युक्तो गिरिजासुतः ॥
उवाच पुनराचार्यं सत्यमेतद्वचोऽस्तु ते ।
तथाऽप्यङ्केन शून्योऽयं पुमान् देवस्य संनिधौ ॥
गन्तुं योग्यः कथं भूयात् स्वेष्टस्य यतिपुङ्गव ।
इत्युक्तः श्रीमदाचार्यः प्राह मूढमते शृणु ॥
ब्राह्मणस्य कुले जन्म शिखादेश्च विधारणम् ।
वेदोक्तकर्मनिष्ठत्वं विप्रत्वं समुदाहृतम् ॥
एतावता भवेद्विप्रः कृतकृत्यस्ततोऽस्य तु ।
पाषण्डमात्रमेवास्ति तत्तच्चिह्नस्य धारणम् ॥
वेदेन हि विरुद्धं यत् पुराणेषु च निन्दितम् ।
न तत् कार्यं प्रवृत्तेन मोक्षस्यार्थे विवेकिना ॥
किञ्च हेमनिभे चक्रे मूलाधारे चतुर्दले ।
गणेशोऽस्ति तथा चक्रे स्वाधिष्ठानकसंज्ञके ॥
षड्दले विद्रुमाकारे ब्रह्मास्ति मणिपूरके ।
द्विपञ्चदलसंयुक्ते नीलवर्णे स्थितो हरिः ॥



द्विषड्भिस्तु दलैर्युक्ते ऽनाहते पिङ्गले स्थितः ।
रुद्रो भूतपतिर्देवो जीवात्मा धूम्रवर्णके ॥
विशुद्धे द्व्यष्टिभिर्युक्ते दलैराज्ञाभिधे तथा ।
सहस्रदलसंयुक्ते चक्रे कर्पूरवर्णके ॥
परमात्मा स्थितस्तस्माद्देह एव व्यवस्थितः ।
गणेशस्तस्य चिह्नेन न प्रयोजनमण्वपि ॥
तथाचाऽऽज्ञाभिधे चक्रे सर्वगोऽपि व्यवस्थितः ।
सर्वान् संप्रेरयित्वा हि स्वयं साक्षी स निर्गुणः ॥
सच्चिदानन्दरूपोऽसौ सर्वातीतोऽखिलोत्तमः ।
सम्यग्वेदेषु संप्रोक्तः तं परेशं विचिन्तय ॥
मुक्तो भविष्यसीत्युक्तः सगणः शिष्यतां गतः ।
त्यक्तचिह्नो गुरोस्तस्य शङ्करस्य महात्मनः ॥
पञ्चपूजापरोनित्यं पञ्चयज्ञपरायणः ।
गुरुशुश्रूषणासक्तः समभूद्गिरिजासुतः ॥

[*Vide: SDV*, pp. 547-8 and *ASV*, ch. 15.]

॥ १४ ॥

॥ हरिद्रागणपतिमतनिराकरणम् ॥

आगत्यान्यो हरिद्रागणपतिमतवादी गुरुं तं जगाद
ब्रह्मादीनां गणानामधिपतिममरेशोपदेष्ट्रादिकानाम् ।
आदेष्टारं कवीनां सलिलजजपतिं ज्येष्ठराजं परेशं
ध्यायेमेत्यादि वेदो वदति यतिपते सर्वकार्येषु पूज्यम् ॥
तस्माद्देवादिभिः सर्वैः संपूज्योऽयं गणेश्वरः ।
ध्यानमस्य तु संप्रोक्तं स्कान्दे सम्यक् यतीश्वर ॥
पीताम्बरधरं देवं पीतयज्ञोपवीतिनम् ।
चतुर्भुजं त्रिनयनं हरिद्रालसदाननम् ॥

पाशाङ्कुशधरं देवं दण्डाभयकराम्बुजम् ।
एवं यः पूजयेद्देवं स मुक्तो नात्र संशयः ॥
जगत्कारणमेवायं ब्रह्माद्या अंशरूपिणः ।
अस्मादेव समुत्पन्नाः तस्मात् सर्वपितामहम् ॥
विघ्नेशानं भवन्तोऽपि भजन्तु जगदीश्वरम् ।
तुण्डाकारेण लोहेनैकदन्ताकारकेण च ॥
संतप्तेनाङ्कितस्यैव मुक्तिरस्ति भुजद्वये ।
इत्युक्त आह सर्वज्ञो गुरुस्तं करुणानिधिः ॥
अस्त्वेवं परमात्मैव जगत्कर्ता त्वयेरितः ।
गणाधिपतिशब्देन सर्वनामा महेश्वरः ॥
अंशांशिनोरभेदेन रुद्रपुत्रोऽपि च स्वयम् ।
संभवत्येव सर्वात्मा सर्वविघ्ननिवारकः ॥
उपासनीय एवायं निखिलैरस्तु सर्वदा ।
किंच विप्रैर्गणेशाद्याः पञ्चपूज्या मुमुक्षुभिः ॥
किंतु तुण्डादिचिह्नस्य धारणं संविरुध्यते ।
वेदेन च पुराणेन तस्माच्चिह्नं विहाय भोः ॥
पञ्चपूजादिसंपन्नोऽद्वैतनिष्ठो विमोक्ष्यसे ।
एवमुक्तो गुरुं नत्वा द्विषड्धा तत्कटाक्षतः ॥
पवित्रतां गतो ध्यायन् तमेव परमं गुरुम् ।
पञ्चपूजादिकं कुर्वन् सुखमापादितं द्विजः ॥

[*Vide*: *SDV*, p. 548 and *ASV*. ch. 16.]

॥ १५ ॥

॥ उच्छिष्टगणपतिमतनिराकरणम् ॥

ततो गणकुमाराख्ये निरस्तेऽन्यः समागतः ।
आचार्यमाह हेरम्बसुतस्तं परमं गुरुम् ॥



महागणपतेस्त्वेकं हरिद्रागणपस्य च ।
उच्छिष्टगणपस्यैकं नवनीतगणेशितुः ॥
मतमेकं तथा स्वर्णगणपस्यैकमीरितम् ।
संतानगणपस्यैकमागमे शैवसंज्ञके ॥
उच्छिष्टगणपस्याहमुपासनपरायणः ।
उच्छिष्टगणपः प्रोक्तः वाममार्गावलम्बनात् ॥
चतुर्भुजं त्रिनयनं पाशाङ्कुशगदाभयम् ।
तुण्डाग्रपीतमधुकं गणनाथमहं भजे ॥
महापीठनिषण्णं तं वामाङ्कोपरिसंस्थिताम् ।
देवीमालिङ्ग्य चुम्बन्तं स्पृशंस्तुण्डेन वै भगम् ॥
इति ध्यानं हि संप्रोक्तं तस्माद्युक्तं तु चिन्तनम् ।
जीवेशयोरिवैक्यस्य तयोस्तु यतिनायक ॥
कुङ्कुमाङ्कितफालोऽहं भक्तो मार्गद्वये स्थितः ।
इच्छाधीनानि कर्माणि कृत्वा देवं भजे सदा ॥
एतत् समं मतं नास्तीत्येवं मत्वाऽतिहृष्टधीः ।
संपन्नोऽस्मि यते किंच धर्मोऽस्त्यस्मिन् मते नृणाम् ॥
सर्वेषामेक एव एक जातित्वात्तद्वदेव हि ।
समस्ता योषितस्तेषां तासां चैव वियोगतः ॥
संयोगतश्च नो दोषः कश्चिदस्ति यतीश्वर ।
अयमेवपतिर्ह्यस्या इति नास्ति नियामकः ॥
अन्योऽन्यसङ्गजानन्दप्राप्तिरेव विमुक्तता ।
आनन्दात्मा गणेशोऽयं तदंशाः पञ्चजादयः ॥
अंशांशिनोरभेदस्तु वेदे सम्यक् प्रकीर्तितः ।
गणेभ्यो गणपेभ्यश्च नम इत्यादिना यते ॥
रुद्रस्तु गणपात्मैव न त्वन्यो मुनिपुङ्गव ।
न कर्मणेति हि श्रुत्या कर्म नो मोक्षकारणम् ॥

किं तु त्यागः सहिष्णुत्वमुखैर्युक्तः समीरितः ।
द्वन्द्वता पुण्यपापादावप्यस्ति हि मते मम ॥
अनुकूलमिदं तस्मात् एतदेव मुमुक्षुभिः ।
सेव्यमित्युक्त आचार्यस्तमुवाच यतीश्वरः ॥
सुरां नैव पिबेन्नैव परभार्यां समाप्नुयात् ।
इत्यादिबहुभिर्वेदवचोभिर्निन्दितं मते ॥
गृह्यते यत्र तत्त्याज्यं दूरतः सुखकाङ्क्षिभिः ।
न कर्मणेत्यादिका तु श्रुतिस्तत्त्वविदो यतेः ॥
सर्वपापविहीनस्य ब्रूते मोक्षं न पापिनः ।
सुरापानपरस्याथ परदाररतस्य च ॥
सुरापानादिना मुक्तिं प्राप्स्याम इति जल्पनम् ।
दुःखदं दूष्यमेवास्ति त्यक्त्वा तस्मादिदं मतम् ॥
विप्राणां वाक्यतस्तेषां प्रसादेन त्रिनिष्कृतिम् ।
विधाय मोक्षमार्गस्थाः पञ्चपूजापरायणाः ॥
पञ्चयज्ञादिनिरता मूलाधारादिचक्रके ।
संध्यायन्तो गणेशादीनजपामन्त्रतत्पराः ॥
तद्देवध्यानतो मुक्ता भविष्यथ न संशयः ।
एवमुक्तास्तथा चक्रुः हेरम्बसुतपूर्वकाः ॥
[*Vide*: *SDV*, pp. 548-9., and *ASV*, ch.17.]

॥ १६ ॥

॥ गणपतिमतत्रयनिराकरणम् ॥

आगत्याथ गुरुं प्रोचुरवशिष्टास्त्रयोऽपि ते ।
स्वामिन्नेतज्जगत्सर्वं गणपत्यात्मना वयम् ॥
चिन्तयामो विमोक्षाय पूज्यं सर्वैः शुभार्थिभिः ।
तस्माद्दूषितवन्तो वै कथमेतन्मतत्रयम् ॥



भवन्त, इति संप्रोक्तस्तानाह यतिपुङ्गवः ।
मूढा यूयं ततः शास्त्रतत्त्वं शृणुत निश्चितम् ॥
पुरुषाधिष्ठितायाः प्रकृतेरादौ महानभूत् ।
ततोऽहंकार उत्पन्नस्त्रिगुणात्मा स एव हि ॥
रुद्रविष्ण्वादिरूपोऽभूत्तत्र रुद्रस्य सूनवः ।
गणेशश्च कुमारश्च भैरवश्चेति विश्रुताः ॥
स्वस्वाधिकारनिर्वाहे तत्पराः पूज्यतां गताः ।
तस्माद्द्विप्रैर्गणेशाद्यास्तत्तच्चक्रेषु संस्थिताः ॥
चिन्तनीयाः प्रयत्नेन तदशक्तौ तु देवताः ।
पञ्चपूज्यामहेशाद्या इत्युक्तास्ते परं गुरुम् ॥
वीरभद्रादयो नत्वा त्यक्तचिह्नाः सुशिष्यताम् ।
गतास्ते पञ्चपूजादिरता अद्वैतवादिनः ॥
[*Vide*: *SDV*, pp. 549-550 and *ASV*, ch. 18.]

॥ १७ ॥

॥ शक्तिमतनिराकरणम् ॥

तत्रस्था गुरुशेखरं यतिवरं मूर्ध्नाऽभिवाद्योचिरे
स्वामिन्नस्मदिदम्मतं शृणु सितं चित्तं परं पावनम् ।
आद्या शक्तिरशेषकार्यजननी शंभोर्गुणेभ्यः परा
यन्मायावशतो महत्प्रमुख(रं) [जं]सर्वं जगज्जायते ॥
तस्या वागाद्यगम्यत्वात् सेवायोग्यत्वहेतुतः ।
तदंशाया भवान्यास्तु पादसेवा परा वयम् ॥
स्वर्णनिर्मिततत्पादैः बद्धग्रीवाः सुबाहवः ।
जीवन्मुक्तिर्यतो विद्योपासकानां फलं श्रुतम् ॥
विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥

तस्मात् कटाक्षलेशेन मुक्तिदा या मुमुक्षुभिः ।
सेवनीया प्रयत्नेन प्रकृतिः सेशरूपिणी ॥
प्रकृतिश्चेश्वरश्चेति श्रुतितस्तदभिन्नता ।
सदेवेत्यादिवाक्यानि तत्पराणि मतानि तु ॥
अकारादेर्यथोत्पत्तिः प्रणवस्थस्य संमता ।
तच्छक्तीनां भवानीलक्ष्म्यादिकानां तथाऽस्ति सा ॥
सिद्धान्तः सर्वदेवानां कारणस्य प्रभोः परा ।
चन्द्रस्य चन्द्रिकावत् या रुद्रोद्बोधकरूपिणी ॥
स्वाधीनवल्लभेत्युक्ता शक्ती रुद्रस्य भो यते ।
सैवास्तीयं भवानीति निश्चयेन युता वयम् ॥
नख्याद्यैर्भवद्भिश्च कृत्वा तच्चिह्नधारणम् ।
सैवोपास्या सतो माता मुक्तिदा परमेश्वरी ॥
इत्युक्त आचार्यवरो महेशः संप्राह तान् सत्यमिदं तथाऽपि ।
श्रेष्ठस्य बोधात् पुरुषस्य मुक्तेः संप्रोदितत्वात्सकलेऽपि शास्त्रे॥
आत्मानमात्मना ध्यात्वा मुक्तो भवति नान्यथा ।
तमेवेत्यादिवाक्यानि प्रमाणान्यत्रकोटिशः ॥
अजामित्यादिमन्त्रे ऽजास्वरूपमभिधाय वै ।
ततस्तत्त्वं परेशस्य मुक्त्यर्थं संप्रकाशितम् ॥
किञ्चापि सांख्यैः प्रकृतेः परस्य विकारहीनस्य सुबोधतः सा ।
उक्ताऽत ईशस्य सुखैकधाम्नो ज्ञानाद्विमुक्तिः परमस्य भूम्नः ॥
ऐक्यं चोक्तं ब्रह्मणा ज्ञानिनो हि
ब्रह्मज्ञो ब्रह्मैव नान्योऽस्ति कश्चित् ।
ब्रह्मेत्यादौ वेदवाक्येऽत एव
ज्ञानं सम्यक् साधनीयं भवद्भिः ॥



विद्यारूपा भवानी या संप्रोक्ताऽद्वैतबोधिनी ।
तस्याः संसेवनादाशु चित्तशुद्धिर्विजायते ॥
तस्मात् कुङ्कुमपुण्ड्रादिपरित्यज्य तथैव च ।
हैमपादादिचिह्नानि विद्यायां रतिमागताः ॥
ब्रह्माहमिति रूपायां मुक्ता भवत नान्यथा ।
एवमुक्तास्त्यक्तचिह्नाः सर्वे नत्वा परं गुरुम् ॥
स्नानसंध्यापराः पञ्चपूजादिनिरतास्तथा ।
शुद्धाद्वैतकृतश्रद्धाः सच्छिष्यत्वमुपागताः ॥
[*Vide: SDV*, p. 530 and *ASV*, ch. 19]

॥ १८ ॥

॥ लक्ष्मीमतनिराकरणम् ॥

महालक्ष्म्या भक्ताः परमपुरुषं शङ्करमथो
समेत्योचुर्नत्वा निखिलपलदा सर्वजननी ।
महालक्ष्मीराद्या प्रकृतिरसदित्यादिनिगमैः
सदेवेति श्रुत्योक्तपरपुरुषस्यामलतनोः ॥
ब्रह्मादयोऽपि जायन्ते यस्या यस्यां परेशितुः ।
अप्यन्तर्भाव एवास्ति सैव सेव्या मुमुक्षुभिः ॥
लक्ष्म्याः समाराधनतत्पराणां पद्माक्षमालाभिरलङ्कृतानाम् ।
बाह्वोश्च कञ्जाङ्कविभूषितानां सुकुङ्कुमेनाङ्कितमस्तकानाम् ॥
हस्तस्थिता मुक्तिरतो भवद्भिः उपासनीया सकलेश्वरेश्वरी ।
इत्युक्त आहाद्भुतमेतदुक्तं मतं भवद्भिः शृणुतापि तत्त्वम् ॥
स्रष्टा परात्मा न तु कश्चिदन्यः एकोऽद्वितीयः सदसत्स्वरूपः ।
तत्त्वं स आत्मेति निबोधितः श्रुतौ आनन्दरूपः स तु वर्तते सदा॥
प्रकृतेस्तदधीनाया मोचकत्वं न सङ्गतम् ।
अहं ब्रह्मेति यो ध्याता तस्य मुक्तिः करेस्थिता ॥

अनित्योपासकानां तु लोकावाप्तिस्तथाविधा ।
अतो यूयं परित्यज्य पद्मकुङ्कुमधारणम् ॥
शुद्धामद्वैतविद्यां वै समाश्रित्य सुसाधवः ।
मुक्ता भविष्यथेत्युक्ताः शिष्यतां समुपागताः ॥
[*Vide: SDV*, pp. 530-1 and *ASV*, ch. 20]

॥ १९ ॥

॥ शारदामतनिराकरणम् ॥

तत आगत्य चाचार्यं शारदोपासने रताः ।
पुस्तपुण्ड्रकचिह्नेन युक्ता नत्वा बभाषिरे ॥
स्वामिन् वेदस्य नित्यत्वाच्छारदा नित्यरूपिणी ।
कारणं सर्वलोकानां परात्परतरा मता ॥
जगत्कर्त्रीति नित्या वागिति च श्रुतिवाक्यतः ।
सैवाऽऽत्मब्रह्मविष्ण्वादिशब्दजालैरुदाहृता ॥
गुणातीतस्वरूपा च सेव्या सर्वैर्मुमुक्षुभिः ।
वागुपासनमेवातः कुरुध्वं सुप्रयत्नतः ॥
ना वेदेत्यादि वाक्येन वेदार्थज्ञानवर्जितः ।
तत्परं वाक्स्वरूपं ना न वेदेति प्रकाशनात् ॥
वाक्स्वरूपानुसन्धानं सर्वदा निश्चयेन हि ।
वेदार्थज्ञानपूर्वं वै प्रकर्तव्यं द्विजातिना ॥
इत्युक्तो भगवानाह कण्ठताल्वादिसङ्गमात् ।
समुद्भूतस्य वेदस्य नित्यता कथमुच्यते ॥
वर्णमात्रस्य नित्यत्वं वर्णानां संततेरुत ।
नाऽऽद्यः सर्वलये तेषां लयसंभवहेतुतः ॥
यस्य निःश्वसितं वेदा इति जन्यत्वदर्शनात् ।
यज्जन्यं तदनित्यं चेति प्रमाणात्र चान्तिमः ॥



महर्षिभ्यो रविःप्राह सृष्टिकालेऽखिलप्रभुः ।
युगान्ते प्रलयं यातं वेदमङ्गसमन्वितम् ॥ ३७ ॥
इत्युक्तं सूर्यसिद्धान्ते वेदराशेः प्रवर्तनम् ।
गतस्य प्रलयं सूर्यात् शारदानित्यता कुतः ॥ ३८ ॥
अनित्यत्वेऽपि वेदानां ब्रह्मणो नित्यता मता ।
नित्या सा शारदाऽतश्चेन्नैव रम्यमिदं यतः ॥ ३९ ॥
आद्यस्य जीवस्य चतुर्मुखस्य नित्यत्वशून्यस्य मुखे स्थितायाः ।
अनित्यतायां खलु शारदाया न संशयो बुद्धिमतोऽस्ति कश्चित् ॥४०॥
प्रकृतिः परमा सरस्वती या महदादेः सकलस्य कारणं सा ।
इति चेन्न समञ्जसं यतो वै परमात्मव्यतिरेकिणो मृषात्वम् ॥
वागाद्यतीतःपर एव भूमा सदादिबोध्यः प्रकृतिर्न वाच्या ।
सदादिशब्दैरत एव तस्य ज्ञानं सुसम्यक् परिसाधनीयम् ॥
ज्ञात्वा तमेव खलु मुक्तिपदं प्रयाति मार्गो न चान्य इति वेद उदाजहार ।
शुद्धाद्वये सततमेव रता भवन्तः स्नानादिकर्म परमार्पणबुद्धिमन्तः ॥
कुर्वन्ननेकदुरितान्यपहाय दूरं शुद्धिंगताः सुखघनस्य विबोधतो वै ।
मुक्ता भविष्यथ कदापि नचान्यथा हीत्युक्ता बभूवुः अखिला यमिनः सुशिष्याः ॥
[*Vide*: *SDV*, pp. 531-2., and *ASV*, ch. 21.]

॥ २० ॥

॥ वामाचारमतनिराकरणम् ॥

वामाचाराः समेत्याहुस्ततो ज्ञानवतां वरम् ।
संवित्स्वरूपमज्ञात्वा वृथा वेषधरो भवान् ॥
निरतोऽद्वैतविज्ञाने वन्ध्यापुत्रसमे यतः ।
लयेऽपि भेदसत्वातोऽद्वैतं नैव कदाचन ॥
ईश्वरेऽपि विमर्शोऽयं पृथगेवास्ति सर्वदा ।
यया विना परेशस्य क्रिया स्वल्पाऽपि दुर्लभा ॥

सा शक्तिरस्तीह सदा स्वतन्त्रा जगद्विधात्री च शिवस्य बीजम् ।
विद्यात्मिका तत्र रतिं गतानां मुक्तिः करस्था किल नेतरेषाम् ॥

विमर्शसंज्ञमव्यक्तं ब्रह्म भृग्वादयो जगुः ।
तत्परास्तत्त्वतोऽस्त्यन्यत्ततो यद्यत्तु तद्वशम् ॥

तस्याः सेवानिरतमनसां नो निषेधेऽधिकारो
नास्त्येवैवं विहितकरणे सिद्धतामागतानाम् ।
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधो
भृग्वादीनाममलमनसां नः प्रवृत्तिर्हि मानम् ॥

तस्माद्भवन्तोऽपि विहाय सर्वं विद्यां परामाश्रयताऽऽत्ममुक्त्यै ।
इत्युक्त आचार्य उवाच मैवं यत्नेति वेदेन हि बोधकाले ॥
आत्मातिरिक्तस्य निषेध एव कुतस्तदानीं न विमर्शलेशः ।
न ह्यस्ति सत्यत्वमनात्मनो नो मुक्तिस्त्वनित्यप्रकृतेरुपास्त्या ॥
मायाभिरिन्द्रः पुरुरूप ईयत इत्येवमस्या बहुरूपता श्रुता ।
तस्माच्चिदात्मा प्रकृतेः परः प्रभुः ज्ञेयोऽस्ति मोक्षाय मुमुक्षुभिर्मुदा ॥

ईशानो भूतभव्यस्येत्यादिकश्रुतिबोधिते ।
आकिंचित्कर इत्युक्तिर्मौढ्यादेव न चान्यथा ॥
कलञ्जादनशीलानां सुरापानादिकुर्वताम् ।
ब्राह्मण्यं नास्ति युष्माकं कुरुत अतो विनिष्कृतिम् ॥
भृगुणा ताडितो विष्णुःकुम्भजेन सरित्पतिः ।
पीतः कथं न भवतामस्ति शक्तिस्तथाविधा ॥
तस्माद्विमूढतां त्यक्त्वा भ्रष्टैर्ब्राह्मणजातितः ।
प्रायश्चित्तमनुष्ठेयमित्युक्तास्ते परं गुरुम् ॥

नत्वा प्रायश्चित्तमेवाऽऽशु कृत्वा शुद्धाद्वैते संरताः साधुवृत्ताः ।
सत्कर्मस्थाः पञ्चपूजापरास्ते जाताः शिष्याः सर्वपापैर्विहीनाः ॥ *

[*Vide: SDV*, p. 532, and *ASV*, ch. 22.]



* एतत्सर्वं संग्रहेण दर्शयति—

स हि युक्तिभरैर्विधाय शाक्तान्प्रति वाग्व्याहरणेऽपि तानशक्तान् ।
द्विजजातिबहिष्कृताननार्यानकरोल्लोकहिताय कर्मसेतुम् ॥ इति—

[*SDV*, १५-३]

## ॥ २१ ॥

## ॥ कापालिकमतनिराकरणम् ॥

संहारभैरवं नत्वा समासीनः किलाब्रवीत् ।
स्वामिन् वेदेषु शास्त्रेषु पुराणेषु च कर्म यत् ॥
प्रतिपादितमस्तीह तत्कर्तव्यं हि धर्मतः ।
विप्राणां कर्मणा धर्मः साध्यः स्यादिति मे मतम् ॥
धर्मेण सर्वपापौघो नाशं याति शुचिव्रतात् ।
पापसंघे तथा नष्टे मनःशुद्धिः प्रजायते ॥
शुद्धे मनसि सर्वात्मसाक्षात्कारो भवत्यलम् ।
एवं सदसि सर्वेषां ब्राह्मणानां मयेरितः ॥
त्वद्भक्तः सहसा अवादीत् दुष्टयुक्तिपरम्पराम् ।
एतन्नोचितमित्युग्रो मच्छिष्यैः ताडितः स तु ॥
अक्रोदागतं त्वां तु मन्त्रबीपरायणम् ।
इतः परं त्वमेवैतत् सत्यासत्यं विवेचय ॥
इत्युक्तो भैरवः प्राह विप्रदण्डार्थमागतः ।
शङ्करस्त्वं सदा पूज्यः सर्ववेदपदार्थभाक् ॥
भवत्कृतं हि यत्कर्म मयाऽपि च कृतं हि तत् ।
तेषां कापालिकानां तु ब्राह्मण्याचरतां कुरु ॥
विकले तु कलौ प्राप्ते तेषां वृत्तिर्यथेप्सिता ।
बभूव मन्त्रबद्धोऽहं प्रत्यक्षोऽस्मि न धर्मतः ॥

इत्युक्त्वाऽन्तर्दधे देवः, कापालिकमतानुगाः ।
तद्वाक्यश्रवणाद्भीताः परिव्राट्कुलशेखरम् ॥
नत्वा द्वादशधा सर्वे वटुकाद्याः सुविस्मिताः ।
स्वामिन् मूढा वयं यस्मात् पालयास्मांश्च सादरम् ॥
एवमालापिनो दृष्ट्वा करुणापूर्णविग्रहः ।
आज्ञापयामास यतिः शिष्यांस्तेषां विशोधने ॥
पद्मपादमुखाः शिष्याः चक्रुस्तान् ब्राह्मणाध्वगान् ।
प्रातः स्नानरतान्नित्यं संध्याकर्मदृढव्रतान् ॥
पञ्चपूजापञ्चयज्ञपरान्निश्चलमानसान् ।
परं गुरुं समाश्रित्य तेऽपि सच्छिष्यतां गताः ॥
[*Vide*, *SDV*, p. 554 and *ASV*, ch. 23]

॥ २२ ॥

॥ कापालिकैकदेशिमतनिराकरणम् ॥

तत्राऽऽगत्य गतः कश्चित् कपाली दारुणाकृतिः ।
प्राहेदं न्यूनता चेत् कापालिकानां मते तदा ॥
फलं किमपि नान्यत्र विद्यते वटुकादयः ।
बभूवुः स्वमतभ्रष्टा यत्तु तत्रास्ति दूषणम् ॥
महद्ब्राह्मणजातित्वं न मे जात्या प्रयोजनम् ।
किंच देहस्य सर्वस्य भौतिकत्वान्न कस्यचित् ॥
वक्तुं हि शक्यते जातिः तस्मात् संकल्पिता त्वियम् ।
जातिर्नातः प्रमाणं तत् किंतु जातिद्वयं मतम् ॥
स्त्रीजातिरेका नरजातिरन्या तत्रापि श्रेष्ठत्वमुपागताऽऽद्या ।
प्राकट्यमानन्द उपैति यस्याः संयोगतोऽतो न विचार इष्टः ॥
गम्या हीयं नैव गम्येयमस्ति गच्छेन्नासावन्यभार्यामितीदम् ।
वाक्यं नाङ्गीकुर्महे दोषभावात् यस्मात्सर्वाः स्वीयतामाव्रजन्ति ॥



आनन्दार्थं चर्मणश्चर्मयोगं कुर्वञ्जीवः प्राप्नुयात् कं ह्यनर्थम् ।
जीवस्यासौ मोक्ष एवास्ति तृप्तिः सर्वोत्कृष्टाऽऽनन्दतो दर्शिताऽतः ॥
आनन्दो यो व्यक्तिमायाति सङ्गात् तद्रूपोऽसौ भैरवो देहपाते ।
तस्य प्राप्तिर्मोक्ष इत्येव तत्त्वमित्युक्तः श्रीशङ्कराचार्य आह ॥
उक्तं भोः कापालिक इदं सुसम्यक् सत्यं वाच्यं कस्य पुत्री त्वदीया ।
मातेत्युक्तः प्राह कापालिकोऽसौ स्वामिन् माता दीक्षितस्यास्ति पुत्री ॥
दीक्षितत्वमिदमागतं कुतः तत्पितुः स तु जगाद भो यते ।
तालमुख्यतरुगां सुरामसौ आहरन्ननु रसे विशेषतः ॥
ज्ञानवानपि न च स्वयं स तां पातुमिच्छति परं तु विक्रये ।
शीलवानत इमं सदा जनो दीक्षितं वदति तस्य पुत्रिका ॥
मातृतामुपगता ममाऽऽत्मदेहार्पणेन सुखसागरे जनान् ।
आगतान् खलु नरान् सदाऽकरोत् संप्लुतान् सुसुखलब्धये यते ॥
उन्मत्तभैरवसमाख्यमिमं विबोध तस्याः सुतं मम पिताऽपि सुराकरोऽभूत् ।
तत्सन्निधौ स्थितिमपीह सुरां लभन्ते नो मद्यगन्धविमुखा हि पलायितास्ते ॥
तस्मादेवं सत्कुलेऽहं प्रसूतः सम्यक्पूज्योऽहं भवद्भिः सुभक्त्या ।
इत्युक्तोऽसौ प्राह कापालिक त्वं गच्छ एतस्मात् स्वेच्छया संचराऽऽशु ॥
ब्राह्मणाधमनु सुदुष्टमतस्थानेव दण्डयितुमत्रसमागाम् ।
नेतरान् अत इतोऽयमभाष्यो दूर आशु करणीय इतीत्थम् ॥
प्रोदिता यतिवरेण तदागृह्य आश्रवाः सुवचनं शिरसा ते ।
प्रात्यजन् खलममुं सुविदूरं शङ्करं तु तत एत्य दृष्ट्वा ॥
[*Vide*: *SDV*, pp. 554-5 and *ASV*, ch. 24]

॥ २३ ॥

॥ चार्वाकमतनिराकरणम् ॥

चार्वाक इत्थं ह्यकरोद्विचारं मूर्खैर्जनैर्व्याप्तमिदं समस्तम् ।
देहाद्यतीतात्मविबोधिभिस्तत् सङ्गाद्गता मूढतमत्वमन्ये ॥

दुष्टा मतिर्नो भविताऽपि तस्मात् तथापि तेषामयमग्रचारी ।
सन्यासवानस्ति तु कश्चिदेष विवेकयुक्तो यति चेत्तदग्रे ॥
स्थास्यामि नोचेदहमेमि शीघ्रं एवं विचार्य अस्य सभां प्रविश्य ।
उवाच तत्त्वं विदितं तवास्ति तदा विमुक्तेर्वद लक्षणं त्वम् ॥
आदौ विवेको मम बुध्यतामयं कायात्मदेहस्य तदादिरूपिणः ।
जीवस्य मोक्षो विलयो न चेतरः तस्याऽऽगमं मूढधियो ब्रुवन्ति भोः ॥
लयं गतानां सरितां समुद्रे यद्यागमः स्यान्मरणं गतानाम् ।
स स्यादतो मोक्ष इयं मृतिर्हि श्राद्धादिकं कर्म तु कुर्वते ये ॥
तृप्तिस्त्वनेनेति मृतिं गतानां तेषां विवेकः किमु वाचनीयः ।
किञ्च प्रजल्पन्ति परोऽस्ति लोकः स्वर्गस्तथाऽन्यो नरकोऽतिघोरः ॥
पुण्येन पापेन च यान्ति तत्र क्षयात्तयोर्मर्त्यमिमं विशन्ति ।
तेषां मतं तत्सुतराममानं यतस्त्विहैवास्त्युभयानुभूतिः ॥
स्वर्गी भोक्ता कथ्यतेऽसौ सुखस्य यो वा भुङ्क्ते क्लेशमेष द्वितीयः ।
तस्माद्युक्ता कल्पना नो परोक्षा प्रत्यक्षेणैवानुभूतिं गताऽस्ति ॥

देहेन्द्रियेषु भूतेषु नष्टेषु परलोकगः ।
को वा जीवस्य भेदेऽपि घटाकाशवदस्य तु ॥
गमनं रूपहीनत्वात् नैव संभवति क्वचित् ।
तस्मादस्मन्मतं सम्यगित्युक्तः प्राह शङ्करः ॥

श्रुतिबाह्यमिदं मतं यतोऽतो न च सम्यक् शृणु मे मतं ततस्त्वम् ।
स तु देहमुखाद्विभिन्न आत्मा परमात्मा परिपठ्यते विमुक्तः ॥
विबद्धः परात्माऽप्रबोधाद्विमुक्तः परिज्ञानतो देहपाताद्विमुक्तिः ।
त्वदीयेयमुक्तिर्भ्रमादेव नूनं श्रुतिर्ज्ञानमात्राद्धि मुक्तिं जगाद ॥
ज्ञानाग्निदग्धकर्माणो यान्ति ब्रह्म सनातनम् ।
इत्याद्याऽस्ति श्रुतिः साक्षात् तद्वाक्यं न प्रमेति चेत् ॥



भवद्वाक्यं कथं मानं कुत्सितं किल वह्निना ।
स्थूले दग्धेऽपि देहेऽस्मिन् लिङ्गयुक्तो व्रजत्यमुम् ॥
ज्योतिष्टोमादिकं वाक्यं मानमत्र दृढं स्मृतम् ।
जलौकाजन्तुतुल्योऽयं जीवः प्रोक्तस्तथा श्रुतौ ॥
देहाद्देहान्तरं याति परलोकं स गच्छति ।
श्राद्धादिकर्म कर्तव्यं तस्य पुत्रादिना खलु ॥
तत्प्रेतत्वविमुक्त्यर्थं पुण्यलोकस्य चाप्तये ।
गयादौ पिण्डदानं च कर्तव्यं तस्य मुक्तये ॥
इत्यर्थस्तु पुराणादौ बहुधा संप्रदर्शिता ।
तस्मात् सप्तदशाङ्गं स लिङ्गं स्वात्मतया गतः ॥
परत्र पक्षिवद्याति सिद्धान्तोऽयमुदीरितः ।
मूढ चार्वाक तस्मात्त्वमितस्तूष्णीं व्रजाधुना ॥
इत्युक्तो वेषभाषादि त्यक्त्वा, गुरुपदद्वयम् ।
नत्वा तत्पुस्तभारस्य भरणे ह्युद्यतोऽभवत् ॥

[*Vide: SDV*, pp. 555-6 and *ASV*, ch. 25.]

॥ २४ ॥

## ॥ सौगतमतनिराकरणम् ॥

ततः सौगतः शङ्करं पीनकायः प्रणम्य आह लोका इमे मूढभावात् ।
सदा कर्मशीला यतो भौतिकस्य विशुद्धिर्न च स्नानदानादिनाऽस्ति ॥
सदा निर्मलो देहपाताद्विमुक्तस्तु जीवः पुनर्जायतेऽसावृणेन ।
प्रजल्पन्ति मूर्खा धनं तद्धि देहाद्यदृष्टे न लभ्यं ततो नास्ति भीतिः ॥

देहान्ते वा ऋणाभावादृणं कृत्वा घृतं पिबेत् ।
इति वाक्यस्य मानत्वाद्देहपुष्टिः सदैव हि ॥
कर्तव्या बुद्धियुक्तेन तत्कृत्वा तत्र तत्र च ।
सर्वभक्षणशीलस्य सुखस्याऽऽवाप्तिराप्तितः ॥

विमोक्षस्येति संप्रोक्तः शङ्करः प्राह सौगतम् ।
वृथा ते जल्पनं यस्मात् परलोकगमादिकम् ॥
श्रुतिस्मृतीतिहासादौ प्रोक्तं भोगाय कर्मणः ।
तस्माद्दणादिकं कर्तुः पुनर्जन्म सुनिश्चितम् ॥
तथाच अज्ञानबुद्धिं त्वं पापदिग्धां विहाय वै ।
सन्मार्गस्थो भवेदानीमित्युक्तः पुनराह सः ॥
सुगताख्यो मुनिः सर्वां भुवं दृष्ट्वा सुविस्मितः ।
विचार्य जगतः सत्त्वं प्राण्युपासनतत्परः ॥
काले मदुपदेशस्य करुणाविष्टमानसः ।
इदमाह स धर्मोऽस्ति परः प्राण्यविहिंसनम् ॥
तथाविधेन धर्मेण कपालस्य निवर्तनात् ।
मुक्तो भविष्यसीत्युक्तः तदारभ्याहमप्ययम् ॥
तत्पादयुगलध्यानी शिरसाऽऽगृह्य तद्वचः ।
दयापरोऽस्मि सर्वेषु प्राणिजातेषु सर्वदा ॥
यस्माद्धर्मोऽतो न चान्योऽस्ति सारः तस्माद्धर्मस्थानमेतन्मतं मे ।
सर्वैरङ्गीकार्यमित्येवमुक्तो भूयः प्राहाऽऽचार्य इत्थं महात्मा ॥
किं त्वं जल्पसि दुष्टसौगत कथं धर्मोऽस्त्यहिंसापरो
यागीयस्य हि हिंसनस्य निगमे धर्मत्वमुक्तं स्फुटम् ।
अग्निष्टोममुखे क्रतौ खलु पशोः स्वर्गप्रदं हिंसनं
श्रुत्याचाररतैरुपेयमपरे पाखण्डिनो विस्फुटम् ॥
वेदनिन्दापरा ये तु तदाचारविवर्जिताः ।
ते सर्वे नरकं यान्ति यद्यपि ब्रह्मवीर्यजाः ॥
इत्येवं (मनुना) उक्तत्वात् तदाचाररताः किल ।
पच्यन्ते नरके घोरे यावद्ब्रह्मलयो भवेत् ॥
तस्माद्विप्रादिवर्णानां वेदादिषु निरूपितः ।
आचारः परमं मानं यस्य तन्नास्ति सोऽधमः ॥



इत्युक्तोऽसौ सौगतो मानशून्यो नत्वाऽऽचार्यं पद्मपादादिकानाम् ।
तच्छिष्याणां पादुकावाहकोऽभूत्तेषामुच्छिष्टादनेनातिपुष्टः ॥

[*Vide SDV*, pp. 556-7 and *ASV* ch. 26.]

॥ २५ ॥

॥ क्षपणकमतनिराकरणम् ॥

कौपीनमात्रधारी तु कश्चित् क्षपणकः स्मृतः ।
स एकस्मिन् करे धृत्वा गोलयन्त्रं द्वितीयके ॥
तुरीयन्त्रं समाधाय समागत्याऽह शङ्करम् ।
स्वामिञ्छृणु विचित्रं मे मतं परमशोभनम् ॥
पूर्णसमयनामाऽऽहं सूर्यं कालप्रवर्तकम् ।
बद्ध्वा ताभ्यां सुयन्त्राभ्यां समयज्ञानतः शुभम् ॥
अशुभं च त्रिलोक्यां यल्लभ्यं तद्वच्मि संस्फुटम् ।
किंच कालः परो देवो मत्पक्षस्य विचालने ॥
परेशोऽपि समर्थो नेत्युक्तस्तं प्राह शङ्करः ।
सम्यगुक्तं त्वया त्वं यत्कालवित्तं च वेद्म्यहम् ॥
तस्मात् मदाश्रयस्तिष्ठ परीक्षाकाल आगते ।
त्वां प्रच्छामीति संप्रोक्तः तथेत्यङ्गीचकार सः ॥
कौपीनमात्रसंधारी जैनस्तत्र तत आगतः ।
मलेन दिग्धसर्वाङ्गः सदाऽर्हन्नम इत्यसौ ॥
उच्चरन्नसकृच्चोच्चैः शून्याङ्गः शून्यपुण्ड्रकः ।
बिन्दुपुण्ड्रसमेतश्च शिष्यैः सर्वभयङ्करः ॥
पिशाचवत् समागत्य प्राह श्रीशङ्करं गुरुम् ।
जिनो देवोऽस्ति सर्वेषां मुक्तिदः प्राणिनां हृदि ॥

जीवात्मना स्थितः सोऽतिज्ञानमात्रेण सर्वदा ।
मुक्तत्वात् तस्य देहस्य पातात्तु समनन्तरम् ॥
जीवः शुद्धः सदैवास्ति मलपिण्डस्तु देहकः ।
स्नानादिकर्मणा नैव शुद्धिं याति कदाचन ॥
तस्मात् स्नानादिकं नैव प्रकर्तव्यं वृथा यतः ।
इत्युक्तोऽसौ जगादेदं मैवं भो जैनदुर्मते ॥
जीवस्य देहत्रितयं हि विद्यते स्थूलश्च सूक्ष्मश्च तथैव कारणम् ।
तेषां क्रमाज्जातु लयो भवेद्यदा स्यात् सच्चिदानन्दवपुस्तदा स्वयम् ॥
भिन्नोऽहमीशादिति धीः अविद्या बद्धस्तयाऽभेदधिया विमुक्तः ।
एवं विमोक्षस्य सुदुर्लभस्य देहस्य पातान्न समाप्तिसंभवः ॥
एवं श्रुत्वा शिष्ययुक्तस्य जैनो मायावेषैर्विमुक्तो गुरूणाम् ।
नित्यं धान्याकर्षणे संप्रयुक्तः पद्माख्याद्यैरेष जातो वणिग्वै ॥

[*Vide*, *SDV*, p. 557 and *ASV*, ch. 27 ]

॥ २६ ॥

॥ बौद्धमतनिराकरणम् ॥

बौद्धस्ततस्तं शबलाख्य एत्य प्रोवाच बोधस्तव भो निरर्थः ।
नरस्य शृङ्गेण समो ह्यभेदः सर्वोत्तमः सन् किमतः प्रवृत्तः ॥
दृष्टं फलं त्वं परिहाय दूरं अदृष्टमाकाङ्क्षसि दृष्टशत्रुः ।
तत्रापि ते नैव फलं परोक्षे शून्यं परोक्षं न फलाय कल्प्यम् ॥
निर्जीवत्वाचाप्यपार्थं मतं त एकोऽप्यात्मा चेतनो मे मते तु
भूत्वाऽनेकः प्रेरको ह्यमुखानां नित्यं मुक्तो द्वैतशून्यस्सुखात्मा ॥
कर्ता भोक्ताऽहं परानन्दरूपो मन्वानः स्वाभीष्टमस्यास्ति यावत् ।
तावत्क्रीडन्नेषु देहेषु पश्चात् देहं त्यक्त्वा मुक्त इत्युक्त आह ॥



सत्यशौचपरो यस्तु देवतातिथिपूजने ।
स याति ब्रह्मणो लोकं यावदिन्द्राश्चतुर्दश ॥
अग्निष्टोमं देवताप्रीतिदं चेत् कुर्यादस्मादिन्द्रलोकं स याति ।
सत्याख्यं सत्पौण्डरीकात्प्रयाति तत्तद्देवोपासकास्तं तमेव ॥
यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
इत्यादिवचनादस्य परलोकगमादिकम् ।
सिद्धं तस्मान्न देहस्य पातमात्राद्विमुच्यते ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥
इत्यादिश्रुत्या ज्ञानेन विना मोक्षो न लभ्यते ।
इत्युक्तमत आत्मानं परं ज्ञात्वा विमुच्यते ॥
कल्पितां जीवतां हित्वा सर्वानर्थप्रदायिनीम् ।
सच्चिदानन्दरूपेण मुक्तिरुक्ता सदा स्थितिः ॥
परं गुरुं नमस्कृत्य तद्यशः स्तवतत्परः ।
बन्दिमागधसूतानां वेषधारी बभूव ह ॥

[*Vide*: *SDV*, pp. 557-8., and *ASV*, ch. 28.]

॥ २७ ॥

॥ मल्लारिमतनिराकरणम् ॥

तस्माच्छिष्ययुतः प्राप प्रोद्यद्दिनकरप्रभः ।
अनुमल्लपुरं तत्र दिनानामेकविंशतिम् ।
स्थित्वा तत्र स्थितान्वीक्ष्य तानुवाच परो गुरुः ॥
प्रभातमुखकाले स्वं कृत्यं वदत भो द्विजाः ।
एवमुक्त्वा नमस्कृत्य प्रोचुस्ते पुरवासिनः ॥

मल्लासुरहरः स्वामिन् मल्लारीति प्रसिद्धताम् ।
लोके प्राप्तः परेशो यस्तस्य मूर्तिमिमे वयम् ॥
संपूज्यानुदिनं भक्त्या शुनस्तद्वाहनस्य च ।
वेषभाषादिसंयुक्ताः कण्ठे धृतवराटिकाः ॥
निःशङ्कास्त्रिषु कालेषु नाट्यवाद्यादिभिः प्रभुम् ।
मल्लारिं सुप्रसन्नं तं कृत्वा वासं प्रकुर्महे ॥

तत्कटाक्षजनिते हि सर्वदा वर्धमानसुखसागरे प्लुताः ।
तस्य गर्भगमिदं तु नित्यदा चिन्तयाम न सुखेच्छया युताः ॥

किंच वेदेऽस्य सार्वात्म्यं प्रोक्तं तद्वाहनस्य च ।
तद्विद्धि तत्वमेवातस्तद्वेषादिकधारणम् ॥
इच्छा न जायतेऽन्यत्र तत एव भवानपि ।
वेदोक्तमिममाचारं स शिष्यः स्वीकरोतु मे ॥
श्रुतिराह नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ।
वराटकानि दास्यामो योग्यानीत्युक्त आह तान् ॥

एकोऽद्वितीयः खलु सर्वसाक्षी स्वमायया सर्वजगद्विधाता ।
सदादिवेदाभिहितः परेशो यद्गर्भजा रुद्रविरिञ्चिमुख्याः ॥
यथा वीरभद्रादिकैरंशभूतैः लयः साध्यते क्वापि रुद्रस्य नैव ।
तथाप्यस्ति तेषां विबोधाद्विमुक्तिः तथा ब्रह्मणोंऽशस्य रुद्रस्य बोधात् ॥
किञ्च एकादशरुद्राणामियं स्तुतिरुदाहृता ।
तदंशानां कथं सा स्यादेकस्य बहुता तथा ॥
यस्य स्पृष्ट्या मृदा स्नानं विप्राणां परीकीर्तितम् ।
तस्य वेषादिचिह्नस्य धारणं बहुदोषदम् ॥
एवं वंशप्रवृत्त्या हि श्ववेषादिविधारणम् ।
नित्यादिकर्मसंत्यागस्त्रिकालं नाट्यसक्तता ॥



चरितं भवतां सर्वं ब्राह्मण्यस्य विघातकम् ।
तस्मान्निरीक्षणेनापि मुखस्य भवतां किल ॥
सूर्यावलोकनं शास्त्रे चोदितं मौ· मेव तु ।
कर्तव्यमिति संप्रोक्ता न्यपतन् गुरुसंनिधौ ॥
कृत्तमूला यथा वृक्षा राज्ञो मूलेऽपराधिनः ।
तानवेक्ष्य दयायुक्तो ह्युत्तिष्ठतेति सोऽब्रवीत् ॥
अथाऽऽज्ञया गुरोः शिष्याः पद्मपादमुखाः खलु ।
तच्छिरोमुण्डनं नद्यामयुतस्नानमेव च ॥
मृदाऽथ मुण्डनं भूयः शतस्नानं मृदा तथा ।
योग्यं च कारयित्वाऽन्यत्प्रायश्चित्तमतन्द्रिताः ॥
ब्राह्मण्यमार्गगांश्चक्रुस्तांस्तेऽपि तु परं गुरुम् ।
नत्वा सच्छिष्यतां याताः शौचस्नानादितत्पराः ॥
पञ्चपूजारता जाताः शास्त्राध्ययनसंरताः ।
श्रीशङ्करप्रसादेन मुक्तिभाजनतां गताः ॥
[*Vide: SDV*, pp. 558-9 and *ASV*, ch. 29]

॥ २८ ॥

॥ विष्वक्सेनमतनिराकरणम् ॥

तस्मात् पुरात् पश्चिममार्गगामी मरुन्धसंज्ञं पुरमाप शिष्यैः ।
ढक्कादिवाद्यानुचलत्करौघैः विचित्रबन्धादिबहुप्रपद्यैः ॥
तत्र पुर्यां विचित्रं वै विष्वक्सेनस्य गोपुरम् ।
तत्पूर्वतः प्रपाशालां विपुलां तत्र कल्पनाम् ॥
गृहादीनामसौ कृत्वा सम्यग्दर्भासनस्थितः,
मनोन्मन्यभिधाङ्गुष्ठमात्रलक्ष्यं परं प्रभुम् ॥
संपूर्णमण्डलाकारमात्मानं संनिरीक्ष्य सः ।
पीयूषबिन्दुसन्दोहपानतृप्ताङ्ग एव हि ॥

कुण्डलिनीं पुनर्मूलाधारं नीत्वा तदीश्वरम् ।
स्तुत्वा गणपतिं तत्र चिरमास सुखं गुरुः ॥

तत्रत्याः स्वामिनं नत्वा विष्वक्सेनपरायणाः ।
शङ्खचक्रविराजद्भुजदण्डास्तोलपाणयः ॥

ऊचुरस्मन्मतं सुष्ठु विष्वक्सेनाधिदैवतम् ।
पुण्यदं स तु वैकुण्ठे सेनापतिरुदाहृतः ॥

तस्य भक्ता वयं नास्ति भयं नो यमराजतः ।
देहपाताद्भटैस्तस्य चोदितेन पथा किल ॥

वैकुण्ठ एव गन्तव्य, इत्युक्तः प्राह तान् गुरुः ।
मैवं नारायणस्यैव विष्वक्सेनः प्रकीर्तितः ॥

भक्तास्तथैवेशभक्ता वैकुण्ठे सन्त्यनेकशः ।
तद्भक्ता अपि संपूज्याः तद्भक्तैरित्यनुज्ञया ॥

कथं तेषामुपास्यत्वं स्वातन्त्र्येण भवेत्किल ।
प्रमाणाभावतस्तस्मात् सगुणत्वात्स एव हि ॥

तल्लोकप्रेप्सुभिः सेव्यः पारम्पर्येण मुक्तिदः ।
नारायणस्तमेकं तु ध्यातुः प्रत्यगभेदतः ॥

मुक्तिः साक्षादतो यूयं यदि चेन्मुक्तिकाङ्क्षिणः ।
तदाऽद्वयमखण्डं तं गुरुशास्त्रोपदेशतः ॥

ध्यात्वा सम्यक् प्रयत्नेन मुक्ता भवत मा चिरम् ।
इत्युक्तास्त्यक्तलिङ्गास्ते प्रणम्य शिरसा गुरुम् ॥

तदादेशेन संप्राप्य विद्यां स्मृत्यादिदर्शिताम् ।
कर्मादौ सुरताःसर्वेब भूवुः साधुवृत्तयः ॥

[*Vide : SDV*, pp. 559 and *ASV*, ch. 30.]

॥ २९ ॥

॥ मन्मथमतनिराकरणम् ॥

ततः समागत्य तु मन्मथस्य भक्ता नमस्कृत्य गुरुं समूचुः ।
शृण्वस्मदीयं मतमद्भुतं त्वं यो मन्मथः सर्वहृदि स्थितः सः ॥
सर्गादिकर्ताऽत उपासनीयः सर्वार्थिभिः सर्वनुतः परात्मा ।
सुवर्तुलाकारत्रिभूषणाभ्यां वशीकृतं येन हृदि स्थिताभ्याम् ॥
कान्ताकदम्बेन तदीयदर्शप्रस्पर्शनाभ्यां बहुसौख्यदाभ्याम् ।
कामात्मनः पूर्णसुखस्य लब्धिः मोक्षोऽस्त्यतो यूयमपीह तस्य ॥
समुत्सवे पञ्चशरस्य चिह्नं धृत्वा ह्यनन्तेन सुखेन युक्ताः ।
तज्जेन मुक्ता भवतेति सोक्तः प्रोवाच मैवं वदताप्रमाणम् ॥
कमलजप्रमुखा जगतः स्मृता उदयपालनसंयमने रताः ।
न च हरेः सुत एष पालको न च सुते सवितुर्हि तथा प्रभा ॥

स्त्रीणां तत्सङ्गिनां सङ्गं दूरतःपरिवर्जयेत् ।
इत्येवं प्रतिषेधस्य सत्त्वाद्दुष्टं भवन्मतम् ॥

किञ्चानङ्गस्य मोक्षादिदातृत्वे शक्तता कुतः ।
प्रद्युम्नस्य च कर्तृत्वं सृष्ट्यादेर्न विरोधतः ॥

प्रत्यक्षादेरिति श्रुत्वा नत्वा क्रौञ्चविदादयः ।
त्यक्तचिह्ना बभूवुस्ते पञ्चपूजादितत्पराः ॥

[*Vide*. *SDV*, pp 559 — 60 and *ASV*, ch. 31.]

॥ ३० ॥

॥ कुबेरमतनिराकरणम् ॥

तस्मादुदक्पथायातं पुरं मागधमद्भुतम् ।
कुबेरोपासकास्तत्र कुबेरप्रमुखाः स्थिताः ॥

नवनिध्यात्मसौवर्णपदकावलिशोभिताः ।
ऊचुर्नवनिधीशत्वात् सर्वाधिकधनः किल ॥

कुबेरस्तस्य भक्तानामस्माकं न दरिद्रता ।
ततो नः पूर्ण आनन्दो ब्रह्मरूपोऽस्ति भो यते ॥
कर्मणोऽप्यर्थमूलत्वात् तत्पतेः सेवने वरम् ।
मोक्षाद्याकाङ्क्षिभिः सर्वैः कर्तव्यं सुप्रयत्नतः ॥
किंच ब्रह्मादिकानां स धनदानेन पालकः ।
तस्मात् समग्रलोकानां स्वाम्यं सेव्यतां गतः ॥
तस्य सेवाकरी काचित् यक्षिणी सुरसुन्दरी ।
महदैश्वर्यलाभस्तत् सेवनादपि जायते ॥
तस्मात्तदन्यसेवां ये कुर्वन्ति मनुजादयः ।
मोक्षाद्याकाङ्क्षिणस्ते तु मन्दा भाग्यविवर्जिताः ॥
तस्माद्भवन्तोऽपि कुबेरसेवां कुर्वन्तु मोक्षार्थमनन्यचित्ताः ।
इत्युक्त आचार्य उवाच युष्मन्मतं प्रमाणेन विहीनमेव ॥
स्वामी कुबेरोऽस्तु परो धनस्य तथापि कश्चिन्न हि तेन तृप्तः ।
लोभेन युक्तस्य कुतोऽस्ति तृप्तिः अतोऽस्य धर्मोऽपि न विद्यतेऽणुः ॥
मोक्षस्य वार्ता त्वतिदूरगाऽस्ति तस्मात्परित्याज्यमनर्थरूपम् ।
द्रव्यं प्रयत्नेन मुमुक्षुभिस्तत् सेव्यं न यस्यास्ति पुनर्वियोगः ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशस्सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्र एषा विहिता (नी)[री] तिः ॥
इत्युक्तेर्ननु धर्मोऽपि तत्साध्य इति चेत्तथा ।
अस्तु नाम कुबेरस्तु सेव्यो नैव धनार्थिना ॥
यतः प्राक्सुकृतादेव धनभाजो जना मताः ।
ब्रह्मा हिरण्यगर्भोऽस्ति विष्णुलक्ष्मीपतिर्हरः ॥
हिरण्यवीर्य इन्द्रस्तु सुवर्णाचलसंस्थितः ।
एवंविधा धनेनानास्य जीवन्तीत्यतिसाहसम् ॥



महन्निन्दार्थकं वाक्यं नैव वाच्यमितः परम् ।
चिह्नानि संपरित्यज्य स्नानसंध्यादितत्पराः ॥
अद्वैतविद्यया युक्ताः पञ्चपूजारताः सदा ।
भवतेत्युदिताः सर्वे गुरुपादाम्बुजे रताः ॥
त्यक्तचिह्ना बभूवुस्ते पञ्चपूजादितत्पराः ।
[*Vide : SDV*, pp. 560 — 1 and *ASV*, ch. 32.]

॥ ३१ ॥

॥ इन्द्रमतनिराकरणम् ॥

इन्द्रभक्तास्ततो नत्वा तमूचुः परमं गुरुम् ॥
इन्द्रः स्वामिन् देवगन्धर्वयक्षैः सर्वेशः सर्गादिकर्ता सुसेव्यः ।
ब्रह्मा विष्णू रुद्र इत्येष वेदे तत्तच्छब्दैर्वाच्य एवैष नान्यः ॥
सर्वेशत्वं सर्वदातृत्वमस्य वेदे प्रोक्तं वामनश्चानुजोऽस्य ।
रत्नं सर्वं तद्गृहे चामृताद्यं देवाः सर्वे यस्य कुर्वन्ति सेवाम् ॥
सर्वस्यात्मा निर्विशेषः परात्मा सर्वातीतः शिक्षकोऽसौ यतीनाम् ।
प्रायच्छत् तान् स्वार्थहीनान् वृकेभ्यः तस्मादिन्द्रः सेवनीयो भवद्भिः ॥
श्रेयस्कामैरित्यसौ प्रोक्त आह मैवं वाच्यं ब्रह्मशब्दादिवद्धि ।
पूर्णैश्वर्ये सच्चिदानन्दरूप इन्द्रः शब्दो नैव वज्रादियुक्ते ॥
सदेवेत्यादिवाक्येषु परं ब्रह्म निरूपितम् ।
कारणं जगतो यस्माद् ब्रह्मविष्ण्वादिसंभवः ॥
ब्रह्मणस्त्विन्द्रवह्न्यादिदेवादीनां समुद्भवः ।
इन्द्रः स्रष्टेति चेदन्ये लोकपालाः कुतो न हि ॥
सर्वदातृत्वमप्यस्य सापेक्षं सर्वजन्तुवत् ।
ब्रह्मतायां सुधापानात्तदानन्त्यं प्रसज्यते ॥
एकमेवेति वेदो हि व्यर्थः स्यात्तु तथा सति ।
सहस्रयुगकालस्य ब्रह्मणो दिवसस्य वै ॥

चतुर्दशांशसञ्जीवी कथं स्यात् परमेश्वरः ।
तस्मात्सर्वलये शिष्टं सदादिप्रतिपादितम् ॥
जगत्कारणमैश्वर्यं श्रुतिरूपात्प्रमाणतः ।
एवमुक्ता गुरुं नत्वा स्मार्तकर्मपरायणाः ।
भद्रहर्यादयः शुद्धाद्वैतविद्यामुपाश्रिताः ॥
बभूवुः पञ्चपूजादितत्पराः शिष्यतां गताः ॥

[*Vide: SDV*, p. 561 and *ASV*, ch. 33]

॥ ३२ ॥

## ॥ यममतनिराकरणम् ॥

तस्माद्यमप्रस्थपुरं प्रयातः तत्र स्थितो मासमथाऽऽगता ये ।
यमस्य भक्ता महिषात्मतप्तलोहाङ्किता बाहुषु नृत्यवन्तः ॥
नत्वोचिरे किंकरसंज्ञकाद्या लयस्य हेतुर्यम एव तस्मात् ।
सृष्ट्यादिकर्ताऽपि स एव नूनं ततस्तदीयाः खलु मुक्तिभाजः ॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः ॥
इत्येवं यज्ञभोक्तृत्वं श्रुतौ प्रोक्तं यमस्य हि ।
तस्मादयं परं ब्रह्म सृष्ट्युत्पत्त्यादिकारणम् ॥
तस्य मूर्तिर्द्विधा ज्ञेया शुक्लकृष्णविभेदतः ।
यच्छुक्लं तत्परं ब्रह्मेति श्रुतेः शुक्लरूपिणी ॥
या मूर्तिः सा परं ब्रह्म तस्मान्निर्गुणतो यमात् ।
महत्तत्त्वादिसंभूतिद्वारा रुद्रो यमस्य ह ॥
जातोऽवतार एतस्मात् कृष्णवर्णो यमः किल ।
विष्णुनामा समुत्पन्नस्तस्य नाभिसरोजके ॥
रक्तवर्णो विधिस्तस्मात् अष्टौ दिक्पतयोऽभवन् ।
ग्रहाः सूर्यादयः सर्वं जगज्जज्ञे चराचरम् ॥



एवं कृत्वा स शिक्षार्थं दक्षिणाशाधिपालकः ।
दण्डपाणिर्महानीशो महिषारूढ आभवत् ॥
इन्द्रादीनां निजांशानां मध्ये तद्वद्विलक्ष्यते ।
भस्मनोऽन्तर्गताङ्गारवत् स सत्यादिरूपकः ॥
तस्माद्विशुद्धबुद्धादिरूपः सर्वस्य कारणम् ।
तस्यांशः सगुणो, नैव निर्गुणोपासने प्रभुः ॥
कश्चित्, तस्माद्वयं नीलवर्णोपासनं सदा ।
कुर्मस्तेन यतो नाशं मूलाज्ञानं प्रपद्यते ॥
तस्मिन्नष्टे यमस्सर्वमिति बोधो विजायते ।
ततः शुक्लयमस्याऽऽप्तिरूपो मोक्षो भवत्यतः ॥
यूयं मोक्षार्थिनः सर्वे कुरुतानन्यचेतसः ।
तदीयोपासनं तस्य मुक्तिं प्राप्स्यथ बोधतः ॥

इत्युक्त आचार्य उवाच मैवं वाच्यं विरुद्धं श्रुतितो भवद्भिः ।
पुरा पितुः शापवशाद्धि कश्चित् द्विजः पुरं प्राप्य यमस्य गेहम् ॥
स नाचिकेता अवसत् त्रिरात्रं अन्नं विना तं ह्यतिथिं सुकान्त्या ।
युक्तं यमः प्रेक्ष्य सुवेपमानः प्रोवाच भूदेवमतीव नम्रः ॥
तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥

इत्येवं तु यमेनासौ नमःपूर्वमुदीरितः ।
नचिकेता उवाचैनं वचनं सुमनोहरम् ॥

शान्तसंकल्पः सुमना यथा स्यात् वीतमन्युर्गौतमो माऽभि मृत्यो ।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥

यम उवाच—

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखं रात्रीः शयिता वीतमन्युः त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम् ॥

नचिकेता उवाच—

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति।
उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥
स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्धधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥
एवमुक्तः उवाचाग्नेः स्वरूपं यम आदरात् ।
नचिकेतास्ततः प्राह मृत्युं बुद्धिमतां वरः ॥
येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥

एवमुक्तो यमस्तस्य लोभमुत्पादयन् बहु ।
धनादिना वरस्यास्य गोप्यतामभिलक्ष्य सः ॥
अथैनं लोभनिर्मुक्तं विद्यार्थिनमकल्मषम् ।
दृष्ट्वा प्राह यमस्तत्वं सुगोप्यमधिकारिणे ॥

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥
इत्यादिनोपदिष्टः सः कृतार्थो गृहमागमत् ।
इति श्रुतौ यमेनैव मृत्युर्ब्रह्मोपसेचनम् ॥
प्रोक्तं न च स्वयं स्वस्य भक्ष्यं भवितुमर्हति ।
ततो यमात्परं ब्रह्म कारणं सर्ववस्तुनः ॥
ब्रह्मविष्ण्वादिरूपेण सेवनीयं प्रयत्नतः ।
उपसेचनलिङ्गानां धारणेन विमुक्तता ॥



इत्युक्तिरवबोधान्नो भवतां साहसात्मिका ।
मार्कण्डेये शृणु प्रोक्तं पुराणे भक्तवत्सलः ॥
महादेवो यमं निष्पीड्य भक्तपरिपालनम् ।
अकरोत् किञ्च पापात्मा सुन्दराख्यो बभूव ह ॥
कृतं जागरणं तेन धनलोभात् कदाचन ।
शिवरात्रौ ततो दूतैः यमस्याऽऽकृष्यतां गते ॥
जीवेऽस्य तत आगत्य शिवदूतैः सुताडिताः ।
परित्यज्य गता याम्याः शिवलोकं स सुन्दरः ॥
नीतः शैवैर्हि भक्तानामग्रगण्यो बभूव ह ।
अजामिलोऽपि कर्माणि ब्राह्मणानां विहाय तु ॥
नीचस्त्रीसङ्गतः पुत्रान् पञ्च प्राप्य कनिष्ठकम् ।
नारायणं ब्रुवन् प्राणान् त्यजन् याम्यैः प्रपीडितः ॥
विष्णुदूतैस्तदाऽऽगत्य रक्षितः, ते तु किंकराः ।
यमस्य भग्नसंकल्पाः तन्मन्दिरमथो ययुः ॥
तस्माद्यूयं परित्यज्य चिह्नान्यद्वैततत्पराः ।
वैदिकं कर्म कुर्वन्तः शुद्धास्तेन ततः परम् ॥
